प्रक्रियासर्वस्वम्

सप्तमो भागः

छान्दसखण्डः

मेलपुत्तूर् नारायणभट्टतिरि

Oriental Research Institute Manuscripts Library
University of Kerala
Kariavattom, Thiruvananthapuram
1993

प्रक्रियासर्वस्वम्

सप्तमो भागः

छान्दसखण्डः

मेलपुत्तूर् नारायणभट्टः

अनन्तशयनग्रन्थावलीग्रन्थाङ्कः २६३

मेलपुत्तूर नारायणभट्टविरचिते
प्रक्रियासर्वस्वे सप्तमो भागः

छान्दसखण्डः

मुख्यसम्पादकः

डा. के. विजयन्

सहसम्पादिके

डा. पि. विशालाक्षी
श्रीमती. आर्. गिरिजा

स्यानन्दूरपुरान्तर्गतपोत्तन्कोट्टुदेशस्थे
शान्तिगिरिमुद्रनालये मुद्रितम् ।

मुद्रणवर्षः १९९२

मूल्यम्: ३५

PRAKRIYĀSARVASVA
Part VII
CHĀNDASAKHAṆḌA

Melputtūr Nārāyaṇabhaṭṭa

Edited by

M. Madhavan Unni

Oriental Research Institute & Manuscripts Library
University of Kerala
Kariavattom, Thiruvananthapuram
1992

Thiruvananthapuram Sanskrit Series No. 263

Prakriyāsarvasva - Part VII

Melputtūr Nārāyaṇabhaṭṭa

CHANDASAKHAṆḌA

General Editor
Dr. K. VIJAYAN

Asst. Editors
Dr. P. VISALAKSHY
Smt. R. GIRIJA

Printed at Santhigiri Mudranalayam
Pothencode, Thiruvananthapuram

November 1992

Price: Rs. 35.00

PREFACE

It gives me great pleasure to present before the Sanskrit savants Prakriyāsarvasva Part - VII comprising the concluding portion of the monumental work on Sanskrit grammar by Melputtūr Nārāyaṇabhaṭṭa. Parts I - VI of the work have already been issued as TSS Nos. 106, 139, 153,174, 258 and 262 covering the following nineteen Khaṇḍa-s, viz. (1) Saṁjñā, (2)Paribhāṣā, (3) Sandhi (4) Kṛt, (5) Taddhita ,(6) Samāsa, (7) Strīpratyaya, (8) Subartha,(9) Subvidhi,(10) Ātmanepadavibhāga, (11) Tiṅ, (12) Larthaviśeṣa, (13) Sannanta, (14) Yaṅanta, (15) Yaṅluganta, (16) Subdhātu, (17) Nyāya, (18) Dhātu and (19) Uṇādi.

The present part consists of the last section entitled 'Chāndasakhaṇḍa'. It explains the sutra-s relating to the vedic language in the order in which they occur in the Aṣṭādhyāyī of Pāṇini. This is followed by Svaraprakaraṇa dealing with in succession the accents relating to Sandhi, Kṛt, Taddhita, Samāsa, Strīpratyaya, Prātipadika (Phiṭsutras) Tiṅanta and Ekaśruti.

In the preparation of the text of 'Chandasaprakaraṇa' the following transcript and manuscripts have been used.

(1)	T.	466 - F	क
(2)	Ms.	586 - C	ख
(3)	Ms.	1038 -	ग
(4)	Ms.	1224	घ

T. 466-F is incomplete in that it gives the text only upto ninety-six pages of the printed text. Ms. 586-C is used as the Ur-text. It represents the text well, but breaks off in the middle of Ekaśruti leaving the work incomplete. Ms. 1038 also being incomplete has been useful only in fixing up the text of Svaraprakaraṇa up to the Dvigu compound. Ms. 1224 contains a number of mistakes but has rendered help in determining the text to the extent of the beginning thirty-five pages of the printed book.

The celebrated transcript of Prakriyāsarvasva prepared by Keralavarma Valiyakoil Thampuran was of immense use for bringing the text of Prakriyā sarvasva upto Uṇādi. But it stops there with the remark: अथ छान्दसखण्डः। स च बहुषु स्थलेषु गवेषितोऽप्येतावत्पर्यन्तं नाधिगतः। Hence we had to depend solely on the transcript and manuscripts detailed above.

The press copy of Chāndasaprakaraṇa was prepared long before by Sri. M. Madhavan Unni, Retired Senior Research officer of this Institute. Dr. P. Visalakshy and Smt. R. Girija, Lecturers here have rendered me much help in seeing the work through the Press. I thank them all.

Thiruvananthapuram,
November 23, 1992.

Dr. K. VIJAYAN
Director & Professor
of Sanskrit.

विषयानुक्रमणी

नारायणभट्टप्रणीतं

प्रक्रियासर्वस्वम्

अथ छान्दसखण्डः ॥

उरः[1] कण्ठजिह्वाङ्घ्रितालूनि मूर्धा
ततो [2]*वस्य दन्ताङ्घ्रिदन्तास्तथोष्ठौ ।
मुखान्तर्विभागाः क्रमात् स्थानसंज्ञाः
समं नासयोक्ता दश ऋक्प्रातिशाख्ये ॥

॥ शे ॥ १-१-१३ ॥

शे इति सुबादेशश्छान्दसो वक्ष्यते । स प्रगृह्यसंज्ञः स्यात् । अस्मे इन्द्रा बृहस्पती । युष्मे इद्वः । त्वे इति ।

॥ संबुद्धौ शाकल्यस्येतावनार्षे ॥ १-१-१६ ॥

तन्मते अवैदिके इतौ परे संबुद्धावोत् प्रगृह्य संज्ञः स्यात् । विष्णो इति । अत्र पदव्यक्त्यर्थं लौकिक इति प्रयोगः । अन्यमते विष्णविति ।

॥ उञः ॥ १-१-१७ ॥

उञिति निपातस्यानार्षे इतौ परे वा प्रगृह्यत्वं स्यात् । उ इति । विति ।

॥ ऊँ ॥ १-१-१८ ॥

उञोऽनार्षे इतौ परे शाकल्यमते ऊँ इति प्रगृह्य आदेशोऽपि स्यात । तेन ऊँ इतीत्यपि सिद्धम् ।

---

1 शिरः – घ । 2 – बस - घ ।

*'बर्त्स्य' इति; 'बर्स्व' इति चोभयथा ऋक्प्रातिशाख्ये दृश्यते ।

उत्र ॐ इत्येकसूत्रं पाणिनिः प्राह, तत्पुनः ।
संज्ञादेशविकल्पाभ्यां त्रैरूप्यार्थं विभज्यते ।।

॥ ईदूतौ च सप्तम्यर्थे ॥ १ - १ - १९ ॥

सप्तम्यर्थवन्तावीदूदन्तौ[1] प्रगृह्याख्यौ । गौरी[2] अधिश्रितः । स्वाया[3]न्तनू इति। छन्दसि सुपां सुलुग्वक्ष्यते । अनेन[4] ङेर्लुक् । गौर्यां, तन्वां, इति चार्थः । सर्वनामसु त्वशब्दोऽनुदात्तः । उदात्तोऽप्यस्तीति केचित । अनुदात्तस्त्वच्छब्दः पढचते इत्यन्ये । इन्धेर्लिटि छान्दसत्वाद्रामभावे 'इन्धिभवतिभ्यां च' (१ - २ - ६) इति संयोगादपि लिटः कित्त्वान्नलोपः । तशब्दस्य एशि इन्धए । दित्त्वम् । सवर्णदीर्घः । पुत्र ईधे अथर्वणः । एतल्लोकेऽप्यस्तीति केचित् ।

॥ छन्दसि पुनर्वस्वोरेकवचनम् ॥ १ - २ - ६१ ॥

पुनर्वस्वोर्द्वयोर्नक्षत्रयोर्वा एकत्वं स्यात् । पुनर्वसु[5]र्नक्षत्रम् । पुनर्वसं नक्षत्रम् ।

॥ विशाखयोश्च ॥ १ - २ - ६२ ॥

एकत्वं वास्यात् । विशाखा नक्षत्रम् । इन्द्राग्नी देवता । विशाखे नक्षत्रम् ।

॥ षष्ठीयुक्तश्छन्दसि वा ॥ १ - ४ -९ ॥

षष्ठीयुक्तः पतिशब्दो वा घिसंज्ञः क्षेत्रस्य पतिना । घित्वान्नाभावः । पत्या इति मृग्यम् । **'नभोङ्गिरो मनुषां वतिप्रत्यये भत्वं वाच्यम्'** (वा.१-४-१८)। भत्वादपदत्वेन रुत्वाभावः । नभस्वत् । अङ्गिरस्वद्धवामहे । मनुष्वत्वा ।

वृष्णो वस्वश्वयोर्भत्वं नलोपस्तेन वार्यते ।
वृषण्वसूयातमित्यादीन्द्रस्येव धनं ययोः ।।
'वृषण्वसु धनायैन्द्रं' इत्युक्तेर्लैकिकेऽप्यसौ ।
अशक्ता अश्वा अस्येति वृषणश्वस्य सुक्रतो ।।

---

1 न्तौ अनार्ष इतौ परे प्रगृह्याख्यौ – घ ।
2 री इति अधिश्रितः घ ।
3 स्वायन्तनू – घ । 4 तेन - घ ।
5 सिद्धान्तकौमुद्यां पुनर्वसु नक्षत्रमिति पाठान्तरं दृश्यते ।

॥ अयस्मयादीनि छन्दसि ॥ १ - ४ - २० ॥

एतानि भपदकार्यवान्ति निपात्यन्ते । अयस्मयस्तमादामेति । अयस्मयानि पात्राणीति भत्वात् रुत्वाभावः । एवं चर्मो[1]म्नभस्मयम् । **वृषभः ककुद्मानित्यत्र "तसौ मत्वर्थो"** (१ - ४ -१९) इति भत्वं विना पदत्वाज्जश्त्वम् । स ऋग्वता गणेनेत्यत्र पदत्वात्कुत्वं भत्वाज्जशत्वं नेत्युभयम् । **'पुनश्चनसोश्छन्दसि गतित्वं वाच्यं'** (वा.१.४.६०) पुनर्दायब्रह्मजायाम् । उशिग्दूतश्चनो हितः । गतित्वात्समासादि ।

॥ छन्दसि परेऽपि ॥ १ - ४ - ८१ ॥

ते गत्युपसर्गसंज्ञाः धातोः परे पूर्वेऽपि स्युः । एति प्रहोता । प्रैतु[2] ब्रह्मणः ।

॥ व्यवहिताश्च ॥ १ - ४ - ८२ ॥

वेदे ते धातुभ्यो व्यवहिताश्च स्युः । आमन्द्रैरिन्द्र हरिभिर्याहि ।

॥ सुबामन्त्रिते पराङ्गवत्स्वरे ॥ २ - १ - २ ॥

आमन्त्रितेनान्विताथं यत् सुबन्तं तत्स्वरे कार्ये आमान्त्रिते परे परस्यैकदेशवत्स्यात् । आमन्त्रितान्तर्भूतं स्यादित्यर्थः । उत्तिष्ठ ब्रह्मणपते । अत्र **'आमन्त्रितस्य च'** (८-१-१९) इति अपादादा- वामन्त्रितस्य सर्वानुदात्तत्वविधिर्ब्रह्मण इत्यस्यापि स्यात । पादादौ त्वामन्त्रितस्याद्युदात्तत्वं वक्ष्यते । तदपि पूर्वस्य स्यात् । भुवनस्य पते यस्य[3]ते । **'मिथः समानाधिकरणानां पराङ्गवत्त्वं वाच्यम्'** (वा-२-१-२) । तीक्ष्णेनपरशुना वृश्चत्[4] । अत्र पूर्वयोर्द्वयोरपि पराङ्गवत्त्वम् । **'अव्ययानां नेतिवाच्यम्'** (वा-२-१-२) । उच्चैरधीयानः[5] । **'सह सुपा'** (२-१-४) इत्यत्र सहेति विभागात् सुबन्तं क्वचिदसुपापि सह समस्यते । तेनानुव्यचलदिति समासोऽन्तो-दात्तः स्यात् । मयूरव्यंसकादिषुच्छन्दसि हस्तगृह्यादय इति पाठात् क्त्वान्तेन समासः। (नः?) ल्यप् । इतो नयतु हस्तगृह्य । (वते पादगृह्य ।

---

1 चम्वोर्नभस्मयम् – घ । 2 प्रेतु – घ ।

3 यस्या–ख; 4 वृश्चन् –घ ।

5 'न'–ख;

लाङ्गूलगृह्य इत्यादि । उदात्तवता तिङा गतेः समासवचनं वाच्यमिति हरः । 'यो जात एव' इत्यत्र पर्यभूषत्, यः शम्बरमित्यत्र [1] अन्वविन्दत ।

॥ तृतीया च होश्छन्दसि ॥ २ - ३ - ३ ॥

जुहोतेः कर्मणि द्वितीया तृतीया च स्यात् । यवाग्वाग्निहोत्रं जुहोति । यवागूमग्निहोत्रं जुहोति । अत्राग्निहोत्रशब्दस्य होमनामत्वादग्निहोत्रतया जुहोतीति क्रियाविशेषणत्वेन योज्यमिति रामः । यजेर्दानार्थत्वे कर्मसम्प्रदानयोः करणकर्मत्वे वाच्ये । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः । पूजार्थत्वे यथार्हमेव सिद्धम् ।

॥ द्वितीया ब्राह्मणे ॥ २ - ३ - ६० ॥

द्यूता[2]द्यर्थे दिवः कर्मणि षष्ठ्युक्ता ब्राह्मणे तु द्वितीयैव स्यात् । '(ग्रामस्य तदहः सभायां दीव्येयुः ।[3])

॥ प्रेष्यब्रुवोर्हविषोदेवतासम्प्रदाने ॥ २- ३ - ६१ ॥

प्रेष्यानुब्रूहिशब्दयोः देवतारूपसम्प्रदानसहितेऽर्थे हविरात्मके कर्मणि षष्ठी स्यात । अग्नये छागस्य हविषः प्रेष्य । अग्नये छागस्य हविषोऽनुब्रूहि ।

'हविषः प्रस्थितस्य निषेधो वाच्यः' (वा. २ - ३ - ६१ ॥)

इन्द्राग्निभ्यां छागं हविः प्रस्थितं प्रेष्य । उत्तरसूत्रे छन्दोग्रहणादेतत्सूत्र लोकेऽप्यस्तीति हरः ।

देवेभ्यो हविषां प्रेष्यत्वनध्वर्युर्यदा वदेत्
तेभ्यश्चैषामनुब्रूहि प्रशास्तर्मास्म विस्तरः ॥

॥ चतुर्थ्यर्थे बहुलं छन्दसि ॥ २ -३ - ६२ ॥

चतुर्थी अर्थ इति छद इति हरः । षष्ठी चानुवर्तते । वेदे षष्ठी चतुर्थी चान्योन्यस्यार्थे बहुलं स्यात्, तत्र चतुर्थ्यर्थे षष्ठी । चन्द्रमसो दातव्यम्[4] । षष्ठ्यर्थे चतुर्थी । अहल्यायै जार ।

---

1 अववविन्दत्-घ ।
2 द्यूतार्थे –; क (3–Nil in घ पाठ), गामस्य इतिकौमुद्याम् ।
4 दातव्यः – ख, घ;

॥ यजेश्च करणे ॥ २ - ३ - ६३ ॥

बहुलं षष्ठी स्यात्। सोमस्य यजते, सोमेन यजते।

'अव्ययानां षष्ठीनिषेधे तोसुन् कसुनोरनिषेधः' (वा. २ - ३ - ६८ ॥)

पुरा सूर्यस्योदेतोः। पुरा क्रूरस्य विसृप[1]: (वः)।

॥ हेमन्तशिशिरावहोरात्रे च छन्दसि ॥ २ - ४ - २८ ॥

शिशिरस्य क्लीबत्वात्। 'रात्राह्नाहाः पुंसि' (२ - ४ - २९)। इति रात्रस्य पुंस्त्वाच्च द्वन्द्वे परवल्लिङ्गे प्राप्तेऽनयोः पूर्ववल्लिङ्गमुच्यते। हेमन्तशिशिरावृतूनां प्रीणामि। अहोरात्राणि विदधत् शिशिरस्यर्तौ[2] पुंस्त्व दृष्टमिति तदुक्तिर्व्यर्था।

॥ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥ २ - ४ - ३२ ॥

अन्वादेशार्थस्येदमस्तृतीयादौ सुपि परेऽनुदात्तः अश् इति सर्वादेशः स्यात्। तृतीयादौ टौसामेवाजादित्वात् तेषु चान्वादेश एनादेशोक्तेर्हलादिष्वेवाशादेशः। हलादिषु च 'हलि लोपो' (७ - २ - ११३) क्तेः अकार एवास्तीति अशादेशे रूपभेदाभावात् स्वर एव फलम्। आभ्यामित्यादि प्रथमोक्तावुदात्तः। उक्तस्य पुनरुक्तौ अनुदात्तः। आभ्यामागतम्। अथो आभ्यामासितम्।

लोकेऽप्य[3]न्वादेशे साकचक[4]स्येदमोऽयमश्भावः।
सफलः स्यादिमकाभ्यामागतमाभ्यामथोपविष्टमिति* ॥

॥ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ २ - ४ - ३३ ॥

अन्वादेशार्थस्यैतदस्त्रतसोः परयोरनुदात्तोऽश् स्यात्; त्रतसोश्चानुदात्तत्व स्यात्। त्रतसोः प्राग्दिशीयत्वाद् 'एतदोऽन्[5]' (५ - ३ - ५) इत्यनि सिद्धेऽपि

---

1 न लोकेति सूत्रे काशिकायां तु विसृपः इति दृश्यते। विसृपः - घ।
2 स्वर्तोः– फ। 3 प्येनादे–क; 4 तस्य–घ;
* इदं च पद्यं 'इदमोऽन्वादेश'–(२-४-३२) इति सूत्रवृत्यन्ते पठनीयं भाति।
5 दोऽश् इत्यशि सि–घ।

अनुदात्तत्वार्थमुक्तिः। अत्र ग्रामे सुखम्। अत्र वत्स्यामः पूर्वआद्युदात्तः, परः सर्वानुदात्तः। यत् क्षुधितोऽस्मि अतो भुज्यते।

॥ बहुलं छन्दसि ॥ २-४-३९ ॥

अदेर्बहुलं घस्लृस्यात् तृचि घस्ता।

॥ बहुलं छन्दसि ॥ २-४-७३ ॥

'अदिप्रभृतिभ्यः-' (२-४-७२) इत्युक्तः शपो लुग् बहुलं स्यात्।

लोकेऽप्ययमशादेशोऽस्त्यन्वादेशे तथापि तु।
स्वरमात्रे भिदेत्येतत्सूत्रं छान्दस ईरितम् ॥

वृत्रं हनति वृत्रहेत्यत्र नत्राध्वं नो देवा इति भूवादेरपि स्यात्।

॥ बहुलं छन्दसि ॥ २-४-७६ ॥

जुहोत्यादिभ्य इत्युक्तः शपः श्लुर्बहुलं भवेत्।
बिभेतेस्तेन न श्लुः स्यात् 'यत इन्द्रभयामहे' ॥

॥ मन्त्रे घसह्वरणशवृदहाद्वृच् कृगमिजनिभ्यो लेः ॥ २-४-८० ॥

मन्त्र इति वेदोपलक्षणम्। एभ्यः परस्य च्लेर्लुक् स्यात्। अक्षन्नमीमदन्त। घसेर्झि। घस् अन। 'गम हन'- (६-४-९८) इत्युपधालोपः। षत्वचर्त्वे। अक्षन्। ह्वृधातोस्तिप्। गुणः। हल्ङ्यादि लोपः। अह्वरिति। बृहस्पते। मा प्रणक् नशति। हल्ङ्यादि लोपः। 'नशेर्वा' (७-२-६३) इति कुत्वम्। जश्त्वचर्त्वे सुरुचो वेन आवः। तिपि वृधातोर्गुणः मा न आधक्। दहेर्हल्ङ्यादिलोपे घत्वभष्भावजश्त्वचर्त्वानि। आदन्तात्। आप्राद्यावापृथिवी। प्रा पूरणे इत्यस्यसिप् वृजि[1] वर्जने। परावर्भारभृद्यथा। तिपि गुणः। कृञोझि। अक्रन्। गमेर्झिः। 'गमहन'- (६-४-९८) इत्युपधालोपः। अग्मन्। जनेर्झस्य अत्। उपधालोपः। अज्ञत वा अस्य दन्ताः।

---

1 वृजिर्वर्ज-ख;।

।। आद्युदात्तश्च ।। ३ - १ - ३ ।।

प्रत्यय आद्युदात्तः स्यात् । आरित्वं वां चरित्वं हि खनमानः खनित्वैः । इन्नस्य इकार उदात्तः ।

।। अनुदात्तौ सुप्पितौ ।। ३ - ३ - ४ ।।

सुप: पितश्च प्रत्यया अनुदात्ताः स्युः । देवेभ्यः । अत्र भ्यसोऽनुदात्तत्वात् देवशब्दास्यान्तोदात्तमेव शिष्टम् । याभिर्यजते । अत्र शपोऽनुदात्तत्वात् धातुस्वरः शिष्टः । **'छन्दसि परेच्छायां क्यज्वाच्यः'** (वा-३-९-८) जहि यो नो अघायति । **'अश्वाघस्यात्'** (७-४-३७) इत्यात्वम् ।

।। अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि ।। ३ - १ - ४२ ।।

ण्यन्तात् सदादेर्लुङ्यांनिपात्यते । अकशब्द आद्यैश्चतुर्भिर्युज्यते । स च कृञो लुङि **'मन्त्रे घस'**– (२ - ४ - ८०) इति च्लेर्लुकि स्यात् । अभ्युत्सादयामकः इत्यादि । पूधातोर्णिजन्तादाशीर्लिङ्याम् । पावयांक्रियात् । विदामक्रन्निति विदेर्लुङ्याम् । अक्रन्निति कृञो लुङि झिः । प्राग्वत्[1] च्लि लोपः ।

।। गुपेश्छन्दसि ।। ३ - १ - ५० ।।

गुपेः परस्य च्लेः चङ् वा स्यात् । चङि द्वित्वम् । **'दीर्घोलघोः'** (७ - ४ - ९४) । इत्यभ्यासदीर्घः **'तुजादीनांदीर्घः'** —(६-९-७) इति वा । युवं नो मित्रावरुणवजूगुपतम् । विकल्पादञोपिष्टम् ।

।। कृमृद्धरुहिभ्यश्छन्दसि ।। ३-१-५९ ।।

एभ्यश्च्लेरङ् स्यात् । यथा नो अदितिः करत् । **'ऋदृशोऽङि गुणः'** (७-४-१६) अमरत् । अदरत् । पयोधा अरुहद्वनम् ।

।। छन्दसि शायजपि ।। ३ - १-८४ ।।

हलः परस्य श्ना प्रत्ययस्य हौ परे शायच् शानजपि स्यात् । **'अतो हेः'** (६ - ४ - १०५) इति हिलोपः । गृभायजिह्वया ।

---

१. ग्वत् लोपः—क ।

हृग्रहोर्भश्छन्दसि(वा.) इति भः। गृहाणाङ्गान्यप्वे[1] ।

॥ व्यत्ययो बहुलम् ॥ ३-१-८५ ॥

छन्दसि विकरणानां बहुलं व्यत्ययः स्यात्। भिनत्तीति प्राप्ते आण्डा शुष्ण[2]स्य भेदति। म्रियत इति प्राप्ते मरति। क्वचिद्विकरणद्वयम्। नयत्विति प्राप्ते नेषतु। अत्र सिच् शपौ। क्वचित् त्रयम्। तरेमेति प्राप्ते इन्द्रेण युजा तरुषेम। अत्र उप्रत्ययः सिच् शप् च।

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि हि[3]सिद्धयति बाहुलकेन॥

सुपः—दक्षिणस्यामिति प्राप्ते धुरि दक्षिणायाः। तिङः– तक्षन्तीति प्राप्ते, येऽश्वयूपाय तक्षति। उपग्रह इत्यात्मनेपदपरस्मैपदे। तयोर्व्यत्ययः। स्वदन्ति देवा उभयानि हव्या। सव इच्छमान। लिङ्गस्य— मधोस्तृप्ताः। नरस्य पुरुषस्य व्यत्ययः। वियूयादिति प्राप्ते अधास वीरैर्दशभिर्वियूयाः इति प्रथमपुरुषस्थाने मध्यमपुरुषः। कालस्य[4]—श्वो[5] अग्नीनाधास्यमानेन। लुटो विष(ये) लृट्। हलः—यू[6]पव्रश्चा इति प्राप्ते, यूपव्रस्का उत ये। अचः—भसद्वीर्या[7] हि पत्नयः। ईकारस्य इकारत्वम्। स्वरस्य वक्ष्यते। कर्तृग्रहणं कारकोपलक्षणम्। यङिति **यको यशब्दादारभ्य लिङ्याशिष्यङ् (३ - २ - ८६)** इत्यन्ताउक्ताः। तेषां व्यत्ययाः प्रागेवोक्ताः।

॥ लिङ्याशिष्यङ् ॥ ३ - १ - ८६ ॥

आशीर्लिङि परे अङ् स्यात्। मन्त्रं वोचेमाग्नये। यासुटः **'अतो येयः'**। **'छन्दस्युभयथा'**। इत्याशीर्लिङः सार्वधातुकत्वाल्लिङ्ः। सलोपः। **'दृशेरग्वाच्चः'** (वा. ३ - १ - ८६) अङि **'ऋदृशः'**—(७ - ४ - १६) इति

1 न्यधे-क। २–शुष्म–क। ३–पि च-क।
4 काल हलः - घ 5 श्वग्नी - ख।
6 सूप - क। 7 द्वीयूं - क।

गुणः स्यादित्यगुक्तिः। पितरं च दृशेयं मातरं च *आ[1]र्यशब्दस्य स्वामिन्यन्तोदात्तत्वं वाच्यम्।

।। प्रत्यपिभ्यां ग्रहेश्छन्दसि ।। ३ - १ - ११८ ।।

आभ्यां परस्य ग्रहेः क्यप् स्यात्। प्रतिगृह्यम्। अपिगृह्यम्। छन्दसि हनेः क्यपः क्लीबत्वं स्त्रियां च पित्त्वं वाच्यम्। स[2]ना देवदस्युहत्याय। अस्यै ब्रह्महत्यायै। कृष्टपच्यस्य अन्तोदात्तत्वं वाच्यम्।

।। छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ।। ३-१-१२३ ।।

एषु सप्तदशसु दृष्टं सर्वं निपात्यते। कृती छेदने। ण्यत् हलोर्व्यत्ययः ष्टुत्वं च। निष्टर्क्यं चिन्वीत पशुकामः। ह्वयतेर्जुहोतेर्वा क्यप्। स्पर्धन्ते वा उ देव हूये। णीञः क्यप्। प्रणीयः। उन्नीयः। शिषेः क्यप्। उच्छिष्यः। मृङ्स्तृञोर्यत्। मर्यः। स्तर्येति स्त्रियाम्। ध्वृहिंसाकौटिल्यार्थयोः। आस्माद् यत्। ध्वर्यः। खनेर्यण्यतौ। खन्यः। खान्यः। यजेर्यत् भावेस्त्रियाम्। देवयज्या। प्रच्छसीव्योः क्यप्। आपृच्छ्यम्। प्रतिषीव्यः। वदभूस्तौतीनांण्यत्। ब्रह्मवाद्यः। भाव्यः। स्ताव्यः। पृडं सुखकृत्। तस्मिन् परे चिञो ण्यत्। उपचेतव्यं च सुखकृच्च उपचाय्य पृड हिरण्यम्। हिरण्यादन्यत्र नेष्यते। अग्निचित्याशब्दोऽन्तोदात्तः। **'अनुपसर्गालिल[3]म्प'—(३ - १ - १३८)** इति शः छन्दसि सोपसर्गादपि दृश्यते★। यः ककुभो निधारयः। 'शीलिकामी'त्यादि (वा) णान्ते पूर्वपदप्रकृति-

---

1 आर्य- घ। *अनन्वितमिदं वाक्यम्। 'अर्यः स्वामिवैश्ययोः (३-१-१०३) 'यतोऽनावः' (६ - १ - २१३) इत्याद्युदात्तत्वे प्राप्ते-स्वामिन्यन्तोदात्तत्वं च वक्तव्यम् – काशिका।

2 सनादेव। दस्युहत्याय।
देव दस्युहत्याय–घ।

3 'अनुपसर्गालिलम्पे' ति– घ। ★'अनुपसर्गालिलम्प' – इति शोऽनुपसर्गाल्लिम्पोर्विहितः।

स्वरत्वं वाच्यम् । मांसर्शालः । 'गापोष्टक् छन्दसि बहुलं वाच्यः । सुरापा । 'आतोऽनुपसर्गे कः' (३ - २ - ३) ।

॥ छन्दसि वनसनरक्षिमथाम् ॥ ३ - २ -२७ ।

एभ्यः कर्मण्युपपद इन् स्यात् । देवश्रुतं वृष्टिवनिं वाजसनिं पूर्भिदं तूर्णि[1]मतपुरं पशुराक्षरस्तम् । हविर्मथीनामभि ।

॥ छन्दसि सहः ॥ ३ - २ - ६३ ॥

सोपपदात् सहेर्णिवः स्यात् । पृतनाषाट्सुवीर[2]:'पूर्वपदात्' (८-३-१०६) इति छान्दसं षत्वं वक्ष्यते ।

॥ वहश्च ॥ ३ - २ - ६४ ॥

(प ? प्र) ष्ठ[3]वाट् चमे ।

॥ कव्यपुरीषपुरीष्येषु ञ्युट् ॥ ३ - २ - ६५ ॥

योरनः । कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहन :।

॥ हव्येऽनन्तः पादम् । ३ - २ - ६६ ॥

अपादमध्ये चेद् हव्यपूर्वाद्वहेः ञ्युट् स्यात् । अग्निश्च हव्यवाहनः । पादमध्यस्थवहेस्तु ण्विरेव । हव्यवाकाग्निरजरः । ण्विस्तु पादान्तेऽप्यास्ति । अग्निर्यज्ञस्य हव्यवाट् ।

॥ जनसनखनक्रमगमो विट् ॥ ३ - २ - ६७ ॥

'विड्वनोः' - (६ - ४ - ४१) इत्यात्वम् । अजा गोजाः । गोषा इन्दो नृषा असि । 'सनोतेरनः । (८ - ३ - १०७) इति षत्वम् । बिसखा इवारुजत् । आ नो दधिक्राः पुरोगा अग्निः ।

---

1 तूर्णिर्जिम् – क; तूर्णी पशु – घ ।

2 वीरं – क । 3 पष्ठ - घ ।

।। मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ।। ६ - २ - ७१ ।।

एभ्यो मन्त्रे ण्विन् स्यात् । आद्यान्तयोः कर्मणि । **'श्वेतवाहादीनां पदत्वे डसप्रत्ययो वाच्यः (वा.)** इत्यपदत्व एव ण्विरुपतिष्ठते । डसि टिलोपः । श्वेतवस् । **'अत्वसन्तस्य - '** (६ - ४ - १४) इतिदीर्घः । श्वैतैरुह्यमान(:) श्वेतवा इन्द्रः । अपदत्वे ण्विरेव । श्वेतवाहौ श्वेतवाहः । सम्बुद्धौ डसि कृते **'अवयाः श्वेतवाः पुरोडाश्च'** (८-२-६७) इति निपातनात् दीर्घः । 'दीर्घो वा' इति **मुग्धबोधे** । श्वेतवः । श्वेतवाहं श्वेतवाहौ । ऊड्वास्येति **कौमुदी** । श्वेतौहः । श्वेतवाहः । श्वेतवाहा । पदत्वे डसि रुत्वमुत्वं च । श्वेतवोभ्याम् । श्वेतवस्सु । एव[1]मुक्थशसोऽपि । पदत्वे निपातनान्नलोपे डस् । उक्थं शंसतीत्युक्थशाः । उक्थशासौ । सम्बुद्धौ तु**'-पुरोडाश्च'** (८-२-६७) इति चकाराद् दीर्घः । हे उक्थशाः । उक्थशासा । उक्थशोभ्यामित्यादि । पुरो दाश्यते दीयत इति पुरोडाः । निपातनाड्डुत्वम् । सम्बुद्धौ प्राग्वद् दीर्घः । पुरोळा[2] अग्ने । पदत्वे पुरोळा[3]भ्यामित्यादि ।

।। अवे यजः ।। ३-२-७२ ।।

अव पूर्वाद् यजेः ण्विन् । प्राग्वत् पदत्वे डस् । अवयजन् अवयाः । अवयाजौ । सम्बुद्ध्यादौ प्राग्वत् ।

।। विजुपे छ[4]न्दसि ।। ३-२-७३ ।।

उपपूर्वाद् यजेरमन्त्रेऽपि विच् । व्रश्चादिषः । उपयट् । उपयजौ । उपयड्भ्याम् । उपयड्भिः ।

।। बहुलं छन्दसि ।। ३- २-८८ ।।

हनेर्भूते बहुलं क्विप् स्यात् । मातृहा । पितृहा । मातृघातः[5] ।

---

1 मुक्थसोऽपि—क । 2 पुरोडा अ—क ।

३ रोडाभ्या - क। 4 श्छन्द- क; ख ।

5 तृघातम्— क ।

॥ छन्दसि लिट् ॥ ३-२-१०५ ॥

भूतमात्रे लिट् स्यात् । अहं द्यावापृथिवी आविवेश ।

॥ लिटः कानज् वा ॥ ३-२-१०६ ॥

वेदे सर्वलिटः कानजादेशो वा स्यात्। कानच आत्मनेपदत्वादात्मनेपदिनामेव। लिट्त्वात् द्वित्वादि। चक्राणः वेत्युक्तेश्चक्रे जाग्रः कानचि गुणो वेति **कौमुदी** । जाजाग्राण[1] । जजाग्राण[2] **'व्यत्ययो बहुलं'** (३-१-८५) इति परस्मैपदिनोऽपि कानच् ।

॥ णेश्छन्दसि ॥ ३-२-१३७ ॥

ण्यन्तात् तच्छीलाद्यर्थे इष्णुच् स्यात। **'अयामन्तं'** (६-४-५५) इति अयादेशः। धरुणं[3] धारयिष्णु। **'दंशेश्छन्दसि क्स्नु*र्वाच्यः'** (वा ३-२-१३८)। छान्दसत्वान्नलोपाभावः। छशां षः। षढोः कः। दंष्णुः।

॥ क्याच्छन्दसि ॥ ३-२-१७० ॥

क्यच् क्यष् क्यङन्तात्। तच्छीलादावुः स्यात्। क्यच्–वसूयवो वसुपते। याच्छन्दसीति वाच्यमिति कण्ड्वादि यगन्तादपीति **हरः**। शकुनं भुरण्युम्। तुरण्यवोऽङ्गिरसो नक्षन्त[4]। सपर्येम सप[5]र्यवः।

॥ आदृगमहनजनः । किकिनौ लिट् च ॥ ३-२-१७१ ॥

आदन्तेभ्य ऋवर्णान्तेभ्यो गमादिभ्यश्च किकिनौ स्तः, लिड्वत्कार्यं च स्यात्। तेन द्वित्वम्। आल्लोपः। पपिः सोमम्। ददिर्गाः। अत्र किप्रत्य येऽन्नोदात्तत्वम्। महां क[6]र्माणि चक्रिः। मित्रावरुणा ततुरिः।

---

1 जजाग्राण - घ। जजागमाणः - ग ; णं - क। 2 णं - क।
3 णद्धा - क। * क्स्नुरिति सिद्धान्तकौमुद्याम्।
4 क्षन्तम् - क। 5 पर्यगवः - क।
6 कर्मा चक्रिः - क।

'बहुलं छन्दसि' (७-१-१०३) इति ऋत उत्वम् । किनो नित्वादाद्युदात्तत्वम् । गमादेः क्नित्युपधालोपः । जग्मियुर्वा । जघ्निर्वृत्रम् । जज्ञिः । एषां लिड्वत्वात् **'न लोक'**– (२-३-६९) इति कर्मणि षष्ठी न । पपिः सोममित्यादि । **'सदादिभ्यश्चदृश्यते'(वा.)** सेदिः । **'उदि ग्रहः'** (३-३-३५) इति घञि[1] ? (घञ्) **'छन्दसि निपूर्वादपीष्यते'(वा.)** । उद्ग्राभंच निग्राभंच । **'हृग्रहोः -(वा.)** इति भः । जपसपौ (?जवसवौ[2]) **छन्दस्यचप्रत्ययान्तौवाच्यौ । (वा. ३ - ३- ५६)** । स्वरे भेदः । लोके तु **'ऋदोरप्'** **(३ - ३ - ५७)**

।। मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ।। ३-३-९६ ।।

मन्त्रे एभ्यः क्तिनः उदात्तत्वं स्यात् । निस्वात् । क्ति*न्नन्तस्याद्युदात्त्वे प्राप्त उक्तिः । ययावृष्टिः सास[3]दिष्टिः । प(चता? चात्) पक्तीः[4] इन्द्रं म(ती[5]:?तिः) वि[6]त्तिः । भूतिः । आयाहि वीतये । रातिं भृगूणाम् ।

।।ऊति यूति जूति साति हेति कीर्तयश्च। । ३ - ३ - ९७ ।।

एष्वपि क्तिन्नन्तस्यान्तोदात्तत्वं निपात्यते ।

।। छन्दसि गत्यर्थेभ्यः ।। ३ - ३- १२९ ।।

गत्यर्थेभ्यः खलिवषये युच्स्यात् । सूप[6]यनास्मै भव । सूपवञ्चना ।

।। अन्येभ्योऽपि दृश्यते ।। ३ - ३ - १३० ।।

अगत्यर्थेभ्योऽपि युच् स्यात् । सूवेदनामकृणोर्ब्रह्मणे गाम् ।

---

1 - घञि छन्दसि – घ ।
2 जपसपौ घ।
* किन्न - क ।
3 सासदृष्टिः - घ ।
4 पक्तिम् - क ।
5 मति - क ।
6 वृत्तिः - घ ।
7 सूपायनास्मै — क ।

छन्दसि लुङ्लङ्लिटः ॥ ३ - ४ - ६ ॥

वेदे सर्वलकारविषयेऽप्येते वा स्युः । यथा नो अदिति (:) करत् । लिङर्थे लुङ् । 'कृमृदृ'--(३-१-५९) सूत्रेणाङ् । लङ् - *अवृणीता यं यजमानः । लिट्* - अद्यामामार । सद्यः समार । लङर्थे लिट् । विकल्पा- द्यथास्वमपि ।

॥ तुमर्थे सेसेनसे असेन् क्सेकसेनध्यै अध्यैन् कध्यै कध्यैन् शध्यैशध्यैन्तवैतवेङ्तवेनः ॥ ३ - ४ - ९ ॥

तुमर्थे एते स्युः । एषामेजन्तत्वादव्ययत्वम् । से (अ[1]) वक्षे रायः । सेन्— ता वामेषे । से सेनोः स्वरे भेदः । असे असेन् । स्वरे भेदः । क्रत्वे दक्षाय जीवसे । क्से, कसेन् — कित्वादगुणः । एष्टा [2]राया प्रेषे भगाय । इयङ् ॥ गवामिव श्रियसे । अध्यै — प्रति वां नृपती[3] जरध्यै । अध्यैनपि मृग्यः । कध्यै कध्यैन् — इन्द्राग्नी आहुवध्यै । शध्यै शध्यैनोः शित्त्वाच्छबादि । सह मादयध्यै । पिबध्यै । तवै — एतवा उ । 'तवै चान्तश्च युगापत्' (६ - १ - ५२) इति आद्यन्तयोः उदात्तः । तवेङ् - ङित्वादगुणः । दशमे मासि सूतवे (तवेन्[4]) पाराय गन्त*वे ।

॥ प्रयै रोहिष्यै अव्यथिष्यै ॥ ३ - ४ - १० ॥

एते तुमर्थे स्युः । प्रयै देवेभ्यो हविः । ओषधीनां रोहिष्यै । अव्यथिष्यै ।

---

* अवृणीताऽयं यजमानः, यञ्जनः — घ ।

* लिट् is missing in घ ।

1 वक्षे – क । 2 एष्टाराया is missing in क ।

3 नृपते - क , प्रति वा रथं नृपतीं जरध्यै – घ ।

4 तवेन् is missing in घ

* 'पाराय गन्तवे' इति तवेन उदाहरणम् । 'स्वर्देवेषु गन्तवे' इति काशिकायाम् ।

॥ दृशे विख्ये च ॥ ३-४-११ ॥

द्वौ तुमर्थौ । सूर्य दृशे । विख्ये त्वा हरामि । विख्यातुमित्यर्थः ।

॥ शकि णमुल् कमुलौ ॥ ३-४-१२ ॥

शकिधातावुपपदे तुमर्थे एतौ स्तः । अग्निं[1] देवा विभाजं नाशक्नुवन् । अवलुपं नाशक्नुवन् । विभक्तुं, अवलोक्तुमित्यर्थः ।

॥ ईश्वरे तो सुन् कसुनौ ॥ ३-४-१३ ॥

ईश्वरयोगे तुमर्थेएतौ स्तः । 'क्त्वा तोसुन् कसुनः' (१-१-४०) इत्यव्ययत्वम् । ईश्वरो तिथिरेव चरितोः । ईश्वरो विलिखः ।

॥ कृत्यार्थे तवैकेन् केन्यत्वनः ॥ ३-४-१४ ॥

परिस्तरितवै । परिस्तरितव्य इत्यर्थः । केन्नावगाहे । नावगाहितव्यमित्यर्थः । केन्य-दिदृक्षेण्यमिन्द्र । त्वन्-कर्त्वं हविः ।

॥ अवचक्षे च ॥ ३-४-१५ ॥

एतत्कृत्यार्थे स्यात् । रिपुणा नावचक्षे ।

॥ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तो सुन् ॥ ३-४-१६ ॥

क्रियान्तरस्य चिह्नभूतेभावेऽर्थे स्यादिभ्यः तोसुन् स्यात् । आसंस्थातोर्वेद्यांसीदन्ति । अत्र संस्थानं समाप्तिः । सा अवधित्वेन निषदनस्य चिह्नम् । इणपुरा सूर्यस्योदेतोराधेयः । कृञ-पुरा वत्सानामपाकर्तोरा[2]स्ते । पुरा प्रवदितोरग्नौ होतव्यः । पुरा प्रचरितोराग्नीध्रेण होतव्यम । आहोतोरप्रमत्तस्तिष्ठति । आतमितोस्तिष्ठति । आविजनितोः संभवामः ।

॥ सृपितृदोः कसुन् ॥ ३-४-७७ ॥

आभ्यां भावलक्षणे भावे कसुन् स्यात् । पुराक्रूरस्य विसृपः । विसर्पणात प्रागित्यर्थः । पुरा जत्रुभ्य आतृदः ।

1 अग्निदेवा – क 2 राप्ते – क ।

॥ वा छन्दसि ॥ ३ - ४ - ८८ ॥

लोटो हेरपित्त्वं वा स्यात् । युयोध्यस्मज्जुहुराणम् । हेः पित्त्वेनाङित्वाद् गुणः । **'अङितश्च'** (६ – ४ - १०३) इति हेर्धिश्च ।

॥ छन्दस्युभयथा ॥ ३ - ४ – ११७ ॥

छन्दसि धातुविहितप्रत्ययानां सार्वधतुकत्वमार्धधातुकत्वं चोभयथा स्यात् । वर्धन्तु त्वा सुष्टुतयः । अत्र शप आर्धधातुकत्वाण्णिलोपः । स्वस्तये तार्क्ष्यमित्यत्र अस्तेः क्तिनि सार्वधातुकत्वाद् भूभावो न । तस्यैवार्धधातुकत्वात् सार्वधातुकविहित श्नसोरल्लोपो न । अयमौणादिकाच्च सिद्धयति । (ससपांसो ? सृवांसो) वि[1]शृण्विरे । लिटः सार्वधातुकत्वात् श्नुः । लिटि धा[2]तोः ' — (६ - १ - ८) विकरणधातुसमुदायस्य द्वित्वं न । उपस्थेयाम शरणा बृहन्ता । अत्राशीर्लिङ् आर्धधातुकत्वाद् **'एर्लिङि'** (६ -४ – ६७) इति एत्वम् । सार्वधातुकत्वाल्लिङः सलोपः ।।

॥ नित्यं संज्ञाछन्दसोः ॥ ४ - १ - २९ ॥

अन्नन्ताद् बहुव्रीहेः संज्ञाछन्दसोर्नित्यं ङीप्स्यात् । अधिराज्ञी नाम ग्रा[3]मः । छन्दसि — समानमूर्ध्नी ।

॥ केवलमामक भागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ४-१- ३० ॥

एभ्यः संज्ञाछन्दसोर्नित्यं ङीप् स्यात् । संज्ञायां मृग्यम् । अथोऽत इन्द्रः केवली । अध्यस्यां मामकी तनूः । मित्रावरुणयोर्भागधेयी (य[4]: ?) तन्वः स[5]न्त्वपापी । उतापरीभ्यः समानी व[6]ः । [7]आर्यकृती । सुमङ्गलीरियं वधूः आप[8]: सर्वस्य भेषजी ः ।

---

1 ससपांसोऽपिशृ – क । 2 धातोरित्युक्तेः – घ ।
3 नगरी – क । 4 स्थ - क; घ । 5 सन्तु पापीः – क ।
6 पः - ख 7 वः आकूती - क, घ । 8 अपः - क ।

॥ रात्रेश्चाजसौ ॥ ४ - १ - ३१ ॥

जसोऽन्यत्र रात्रेर्ङीप् स्यात्। रात्री व्यख्यत्। ह्वयामि रात्रीम्। रात्रीभिरस्मै। जसितु — रात्रयः।

'अ*न्यत्रापि क्वचिन्नेति वाच्यम्' (वा.) रात्रिरपरपान (?)। **'सर्वतोऽक्तिन्नर्थात्'**- (वा.) इति ङीषन्ता रात्री लोकेऽप्यस्ति। स्वरे[1] भेदः। **'अन्तर्वत पतिवतोर्नुक् छन्दसि वेति वाच्यम्'** (वा.) अन्तर्वती देवानुपैत्। पतिवती तरुणवत्सा। **'नित्यं सपत्न्यादिषु'** (४ - १ - ३५) इत्यत्र **'दासाच्छन्दसीति वाच्यम्'** (वा.) दासपत्नीरहिगोपाः। **'वोतो गुणवचनात्'** (४ - १ - ४४) इत्यत्र **'आद्युदात्तानां ङीब्वाच्यः'** इति भाष्ये। तेन स्वरे[2] भेदः। वस्वी ते अग्ने।

॥ नित्यं छन्दसि ॥ ४ - १ - ४६ ॥

बह्वादिभ्यश्छन्दसि नित्यं ङीष् स्यात्। बह्वीः समा[3]ः।

॥ भुवश्च ॥ ४ - १ - ४७

उदन्तात् भुवश्छन्दसि नित्यं ङीष्। विभ्वीः। प्रभ्वीः। **'मुद्गलाच्छन्दस्यानुगागमो ङीष् चलिद्वाच्यः'** (वा. ४- १ - ४९) रथीरभून्मुद्गलानि। क्तान्तादन्तोदात्ताद् बहुव्रीहेर्ङीष् विधाने **'बहुलं संज्ञाछन्दसोरिति वाच्यम्'** (वा. ४ - १ - ५२)। प्रवृद्धा विलूना च प्रवृद्धविलूनीत्यबहुव्रीहावपि।

॥ दीर्घजिह्वी च छन्दसि ॥ ४ - १ - ५९ ॥

ङीष् निपात्यते। सखायो दीर्घजिह्व्यः।

---

* अजसादिष्विति वक्तव्यम्। रात्रिं सहोषित्वा – काशिकावृत्तिः।

1 स्वर भेदः - क। 2 स्वर भेदः - क।

3 सुमाः - क।

दिक्पूर्वपदाङ्ङीप् ॥ ४ - १ - ६० ॥

दिक् पूर्वपदात् 'स्वाङ्गाच्चोपसर्जनात्' - (४ - १ - ५४) इत्यादि विहितङीष् स्थाने छन्दसि ङीप् स्यात् । 'स्वरे भेदः । पुर्वमुखी । पुर्वनासिकी ।

॥ कद्रकमण्डल्वोश्छन्दसि ॥ ४ - १ - ७१ ॥

अनयोः स्त्रियामूङ् स्यात । कद्रूश्च वै सु[1]पर्णी च । कमण्डलूं शूद्राय दद्यात् । **'गुग्गुलुमधुजतुपतयालूनामिति वाच्यम्' (वा. ४ - २ - ७४)** गुग्गुलूः । मघ् : । जतू : । पतयालू : । माधूकरीं वृत्तिमित्यादि दर्शानाल्लोकेऽपीदमिष्टम् । **'प्राग्दीव्यतीयेष्वर्थेषु वाङ्मतिपितृमतां छन्दसि ण्यो वाच्यः' (वा. ४ - १ -८५)** वाच्यं । मात्यम् । पैतृमत्यम् । **'बहिष-ईकञ् धन्दसि टिलोपश्च' (वा. ४ - १ - ८५)** वाहीकः । **'छन्दसि निष्फलात् तिलात् पिञ्जो डिद्धाच्यः' (वा. ४ - २ - ३६)** । निष्फलस्तिल : तिल्पिञ्जः ।

॥ छन्दसि ठञ् ॥ ४ - ३ -१९ ॥

शेषे जाताद्यर्थे वषभ्यिष्ठञ् स्यात् । नभश्च नभस्यश्च वार्षिकावृतू । वर्षासु भवौ मासावित्यर्थ : ।

॥ वसन्ताच्च ॥ ४ - ३ - २० ॥

ठञ् स्यात् । वासन्तिकावृतू ।

॥ हेमन्ताच्च ॥ ४ - ३ - २१ ॥

ठञ् स्यात् । हैमन्तिकावृतू ।

॥ द्वयचश्छन्दसि ॥ ४ - ३ - १५० ॥

द्वयज्भ्यो विकारावयवयोरर्थयोर्मयट्स्यात् । यस्य पर्णमयी जुहूर्भवति ।

---

1. स्तपर्णी - क ।

॥ नोत्वद्वर्ध्रबिल्वात् ॥ ४ - ३ - १५१ ॥

उकारवतो वध्रबिल्वाभ्यां च द्वयच्त्वेऽपि मयण्न । मौञ्जं शिक्यम् । गौमुतं चरु*म् । वार्ध्री[1] । वैल्वो ब्रह्मवर्चसकामेन कार्यः ।

। ढश्छन्दसि ॥ ४ - ४ - १०६ ॥

तत्र साधुरित्यर्थे सभायां ढः स्यात् । सभेयो विप्रो भरते ।

॥ भवे छन्दसि ॥ ४ - ४ - ११० ॥

तत्र भव इत्यर्थे यत्स्यात् । नमो मेध्याय च विद्युत्याय च ।

॥ पाथोनदीभ्यां ड्यण् ॥ ४ - ४ - १११

पाथसि भवः । तमुत्वा पाथ्यो वृषा । च नो दधीत नाद्यः ।

वेशन्तहिमवद्भ्यामण् ॥ ४ - ४ - ११२ ॥

नमो नाद्याय च वैशन्ताय च । हैमवतीभ्यः स्वाह ।

॥ सगर्भसयूथसनुताद्यन् ॥ ४- ४ - ११४ ॥

यन्[3] यतोः स्वरे भेदः । अनुभ्राता सगर्भ्योऽनुसखा सयूथ्यः । योनः सनुत्य उत ।

॥ तुग्राद्घन् ॥ ४ - ४ - ११५ ॥

अन्नाकाशयज्ञवरिष्ठेषु तुग्रशब्दः । तत्र भवः । त्वमग्ने वृषस्तुग्रियाणाम्

॥ अग्राद्यत् ॥ ४ - ४ -११६ ॥ घच्छौ च ॥ ४ - ४ – ११७ ॥

घच्छाभ्यामबाधार्थं पुनर्यदुक्तिः अग्र्यः । अग्रियः । अग्रीयः । चकाराद् घन्नपि । अग्रियः । घन्घचोः स्वरेभेदः ।

---

1 वाङ्ध्रीम् – क ।
* चरुमिति ग्रन्थपाठः, चरूमिति शुद्धीकृतो दृश्यते कपाठे ।

2 द्यः - घ । 3 ययतोः - घ ।

।। समुद्राभ्राद् घः ।। ४ - ४ - ११८ ।।

समुद्रिया अप्सरसः । वा* वदतोऽभ्रियस्येव ।

।। बर्हिषि दत्तम् ।। ४ - ४ - ११९ ।।

अस्मिन्नर्थे यत् । बर्हिष्येषु निधिषु ।

।। दूतस्य भागकर्मणी ।। ४ - ४ - १२० ।।

दूतस्य भागः कर्म वा दूत्यम् ।

।। रक्षोयातूनां हननी ।। ४ – ४ - १२१ ।

एषां हननसा[1]धनभूतेत्यर्थे यत् स्यात् । याते अग्ने रक्षस्या तनूः । यातव्या ।

।। रेवती जगती हविष्याभ्यः प्रशस्ये ।। ४ - ४ - १२२ ।।

एभ्यस्तस्य प्रशंसनमित्यर्थे यत् स्यात् । रेवत्याः प्रशंसनं ।रेवत्यम् । जगत्यं । हविषेहिता हविष्याः । तासां प्रशंसनं हविष्यम् । **'हलो यमां'** (७ - ४ - ६४)इति पूर्वयलोपः ।

।। असुरस्य स्वम् ।। ४ - ४ - १२३ ।।

अस्मिन्नर्थे यत् । असूर्यं वा एतत्पात्रम् ।

।। मायायामण् ।। ४ - ४ - १२४ ।।

असुरस्य मायायां वाच्यायामण् स्यात् । आसुरी मायास्वधया कृतासि ।

।। तद्वानासामुपधानोमन्त्र इतीष्टकासु लुक्च मतोः ।। ४ - ४ - १२५ ।।

तद्वानुपधानसाधन भूतो मन्त्र आसामित्यर्थे इष्टकासु वाच्यासु यत् स्यात् । पूर्वस्थितस्य मतुपश्च लुक् स्यात् ।। वर्चस्वान् मन्त्रआसामिष्टकानामिति वर्चस्या उपदधाति ।

---

* 'ना नदतोऽभ्रियस्येव घोषाः' इति सिद्धान्तकौमुदी ।

1 नबाध - घ ।

॥ अश्विमानण् ॥ ४ - ४ - १२६ ॥

अश्विमानासामुपधानमन्त्र इत्यर्थेऽण् । मतुपो लुक् च स्यात् । आश्विनी-रुपदधाति ।

॥ वयस्यासु मूर्ध्नो मतुप् ॥ ४ - ४ - १२७ ॥

वयस्याख्यास्विष्टकासु वाच्यासु मूर्धन्वानासामुपधानो मन्त्र इत्यर्थे मतुप् स्यात् । पूर्वमतुपो लोपश्च । अन्यथा मूर्धन्वत्वा[1]निति स्यात् । मूर्धन्वतीरुपदधाति ।

॥ मत्वर्थे मासत[2]न्वोः ॥ ४ - ४ - १२८ ॥

मासतन्वोर्वाच्ययोर्मत्वर्थेयत् । सहश्च सहस्यः मधव्योमासः । या ते अग्ने वर्चस्या तनूः 'मासतन्वोरनन्तरार्थे' (च ? वा) (वा. ४-४-१२८) । सहस्यः ।

॥ मधोर्ञ च ॥ ४ - ४ - १२९ ॥

चकाराद्यत् । माधवः मधव्यः ।

॥ ओजसोऽहनि यत्खौ ॥ ४ - ४ - १३० ॥

अस्मान्मत्वर्थेऽहनिवाच्ये यत्खौ स्तः । ओजस्यमहः । ओजसीनमहः ।

॥ वेशोयश आदेर्भगाद् यल् ॥ ४ - ४ - १३१ ॥

वेशो यशः पूर्वत् भगान्तान्मत्वर्थेयल् स्यात् । वेशो बलम् । भगः श्री प्रभृति । तद्वान् वेशो भग्यः । एवं यशो भग्यः ।

॥ ख च ॥ ४ - ४ - १३२ ॥

उक्तात् ख च स्यात् । वेशो भगीनः । यशो भगीनः ।

॥ पूर्वैः कृतमिनयौ च ॥ ४ - ४ - १३३ ॥

पूर्वैः : कृतमित्यर्थे इनयौ खश्च स्यात् । पूर्वपुरुषैः : कृतमित्यर्थेपथिभिः । पूर्विणोभिः पूर्व्यैः : । एवं पूर्विणः ।

---

1 न्वद्वानि - घ ।   2 तन्वोरिति - क, ख ।

।। अद्भिः संस्कृतम् ।। ४ - ४ - १३४ ।।

अस्मिन्नर्थे यत्। यस्येदमप्यं हविः।

।। सहस्रेण सम्मितौ घः ।। ४ - ४ - १३५ ।।

सहस्रेण सदृश इत्यर्थे घः स्यात्। सहस्रियं, दम्यं भागमेतम्।

।। मतौ च ।। ४ - ४ - १३६ ।।

मत्वर्थे सहस्रात् घः स्यात् सहस्रवान् सहस्रियः।

।। सोममर्हति यः ।। ४ - ४ - १३७ ।।

अस्मिन्नर्थे यः स्यात्। सोममर्हन् सोम्यः।

।। मये च ।। ४ - ४ - १३८ ।।

आगतविकारावयवप्राचुर्येषु मयडर्थेषु सोमाद् यः स्यात्। ककुभः। सोम्यो रसः।

।। मधोः ।। ४ - ४ - १३९ ।।

अस्मान्मयडर्थे यदेव स्यात्। मधुमयं मधव्यम।

।। वसोः समूहे च ।। ४ - ४ - १४० ।।

अस्मात्समूहे मयडर्थे च यत् स्यात्। बहु ते वसव्यम्। मयडर्थेऽप्यूह्यम्। 'स्वार्थेऽपि वाच्यम्' (वा.)अग्निरीशे वसव्यस्य। 'अक्षरसमूहार्थाच्छन्दसः स्वार्थे यद्वाच्यः' (वा.)। एष वै सप्तदशाक्षरः छन्दस्यः।

।नक्षत्राद् घः ।। ४ - ४ - १४१ ।।

अस्मात् स्वार्थे घः स्यात्। नक्षत्रियेभ्यः स्वाहा।

।। सर्वदेवात् तातिल् ।। ४ - ४ - १४२

लः स्वरार्थः। सर्व एव सर्वतातिः। देवतातिः।

॥ शिवशमरिष्टस्य करे ॥ ४ - ४ - १४३ ॥ भावे च ॥ ४- ४ - १४४ ॥

शं ताती भवथः । अथोऽरिष्टतातये ।

॥ सप्तनोऽञ् छन्दसि ॥ ५ - १ - ६१

तदस्य परिमाणमित्यर्थे वर्गे वाच्ये सप्तनः अञ् स्यात् । साप्तानि प्रीणाति । सप्तपरिमितान् वर्गानित्यर्थः ।

॥ दण्डादिभ्यो यः ॥ ५ - १ - ६६ ॥ छन्दसि च ॥ ५ - १ - ६७ ॥

तदर्हतीत्यर्थे सर्वशब्देभ्यो यः स्यात् । यूप्यः पलाशः ।

॥ वत्सरान्ताच्छन्दसि ॥ ५ - १ - ९१ ॥

वत्सरान्तात्तेन निर्वृत्तं तमधीष्टो भृतो भूतो भावीत्यर्थेषु छः स्यात् । इदावत्सरीयः ।

॥ सम्परिपूर्वात् ख च ५ - १ - ९२ ॥

संवत्सरं भूतं संवत्सरीणं प[1]यः । संवत्सरीयं ब्रह्म कृण्वन्तः । परिवत्सरीणं, परिवत्सरीयम् ।

॥ छन्दसि घस् । ५ - १ - १०६ ॥

सोऽस्यप्राप्त इत्यर्थे ऋतोर्घस् स्यात् । सित्वेन पदत्वात् अभत्वात् ओर्गुणो न यण् । अयन्ते योनि ऋत्वियः ।

। उपसर्गाच्छन्दसि धात्वर्थे ॥ ५ - १ - १०७ ॥

ऋदन्तधात्वर्थे वर्तमानादुपसर्गात् स्वार्थे वतिः स्यात् । यदुद्वतो निवतो यासि । उद्वतान्निगतांश्चेत्यर्थः । अत्र कृदर्थयोगादव्ययत्वाभा[2]वः । तस्यभावः कर्मवेत्यर्थे **'सुभगान् मन्त्रेऽञ्वाच्यः'** **(वा.)** महते सौभगाय । छान्दसत्वात् **'हृद्भग' (७ - ३ - १९)** इत्युभयपदवृद्धिर्न । **'युष्मदस्मद्भ्यां छान्दसिसादृश्ये- वतुष्वाच्यः' (वा. ५ - २ - ३९) 'दृग्दृशा' — (६ - ३ - ८९)**

---

1 वयः - क । 2 वः, कर्म - क ।

इत्यात्वम् । न त्वावाँ अन्यः, यज्ञं विप्रव मास्यतः ।

। थट् छन्दसि । ५ - २ - ५० ।

तस्य पूरण इत्यर्थे संख्याभ्यो यो डडुच्यते
तस्य नन्तादसंख्यादेर्थट् च मट् च विधीयते ॥

पर्णमयानि पञ्चथानि पञ्चममिन्द्रियस्य । विमुक्तादिगणः प्रायेण वेःभागा[1]ख्यत्वादत्र लिख्यते । **"विमुक्तदेवासुररक्षोसुरा (सि ? स्य) हत्यपरिसारकोपसत्सत्वदिडोर्वशी दशार्णदाशार्हेभ्योऽण्"** (५ - २ - २१७) एभ्योऽध्यायानुवाकयोरर्थयोर्मत्वर्थे अण् स्यात् । विमुक्तशब्दवानध्यायोऽनुवाको वा वैमुक्तः । देवासुरः । राक्षोसुरः । आस्यहत्यः । पारिसारकः । औपसदः । सात्वतः । एडः । और्वशः । दाशार्णः । दाशार्हः **'वसुमन्तु-पत्नीवन्तु बर्हवन्तु वृत्रहन्तृवयःपतत्रिसुपर्णसोमापूषन् हविर्धानाग्नाविष्णुभ्यश्च'।** (५ - २ - २१८) वासुमन्तः पात्नीवन्तः बार्हवन्तः । वार्त्रहन्त्रः । वायसः । पातत्रिणः । सौपर्णः सौमा(पू?पौ)ष्णः । हाविर्धानः । आग्नावैष्णवम् । **'गोषदिषेत्वाकृष्णोस्यादेवीरापदेवस्यत्वादेवीधेयत्तदेवेभ्योवुन्'** (५ - २ - २२२) गोषदकः । इषेत्वकः । कृष्णोस्यकः । देवीरापकः । देवस्यत्वकः । देवीधेयकः । तदेवकः । **प्रतूर्त्तमातरिश्वन्सहस्रशीर्षावाचस्पतकृशानुरक्षोहणस्वाहाप्राणेभ्यश्च** (५ - २ - २२३) प्रतूर्त्तकः । मातरिश्वकः । सहस्रशीर्षकः । वाचस्पतकः । कृशान[3]वकः । रक्षोहणकः । स्वाहाप्राणकः इति ।

॥ छन्दसिपरिपनन्थिपरिपरिणौपर्यवस्थातरि ॥ ५ - २ - ८९

शत्रौ वाच्ये एतौ निपात्येते । माविदन् परिपन्थिनः । मा त्वा परिपरिणोविदन् ।

---

1 गतुल्यत्वात् - क ।

2 वसुमत् पत्नीवत् बर्हवत् वृत्रहति इति काशिका । वसुमन्तु इत्यादिकमेव सरस्वतीकण्ठाभरणे । दण्डनाथोऽप्येवमेव ।

3 शानुव - क ।

॥ बहुलं छन्दसि ॥ ५ - २ - १२२ ॥

मत्वर्थे बहुलं विनिः स्यात् । से यामन्नाधृषद्विनः । अष्ट्रा मेखलाद्वयो-भयरुजामर्महृदयानांदीर्धश्च वाच्यः । शूनमष्ट्रावी । मेखलावी । द्वयावी । मंहिष्ठमुभयाविनम् । रुजावी । मर्मावी । हृदयावी ।

॥ वा ह्य च छन्दसि ॥ ५ - ३ - १३ ॥

सप्तम्यन्तात् किमो ह्रप्रत्ययो वा स्यात् । विकल्पादत्र त्रल् च । प्राग्दिशीयत्वाद् विभक्तित्वे 'कुतिहोः' (७ - २-१०४) इति हादौ कुत्वम् । कुह श्रुत इन्द्रः । क्व । कुत्र ।

॥ तयोर्दार्हिलौ च छन्दसि ॥ ५ - ३ - २० ॥

तयोरिदमः तदश्च सप्तम्यन्तयोः काले वाच्ये क्रमाद् दार्हिलौ स्तः । 'इदम इश्' (५ - ३ - ३) । इदा हि[1]वः । तर्हि । लोके तु 'अनद्यतने-र्हिल्' — (५ - ३ - २१) इति तर्हि सिद्धिः । चकाराद् दानीमा[2]दिच इदानीं तदानीम् ।

॥ थाहेतौ च छन्दसि ॥ ५ - ३ - २६

किमो हेतौ प्रकारे च था स्यात् । 'किमः कः' (७ - २ - १०३) इति कादेशः । कथा ग्रामं न पृच्छसि । कस्मान्न पृच्छसीत्यर्थः । प्रकारे तु कथामहे ।

। पश्चपश्चा च छन्दसि । ५ - ३ - ३३ ।

पश्चादित्यर्थे एतौ निपात्येते । पुरो व्याघ्रो जायते पश्चसिंहः । न प्राचीनमादित्या नो[3]त पश्चा । पश्चात् पुरस्तादित्यपि ।

। प्रत्नपूर्वविश्वेमात् थालः छन्दसि । ५ - ३ - १११ ।

एभ्य इवार्थे थाल् स्यात् । तं प्रत्नथा पूर्वथा विश्वथेमथा इमशब्दः इदमर्थः । प्रकृत्यन्तरमिति हरः ।

---

1 र्हिलः - क । 2 दानींदा च इति कपाठे शुद्धीकृतः ।
3 वोत - क ।

॥ अमुच छन्दसि ॥ ५ - ४ - १२ ॥

किमेतिङव्ययेभ्यः परस्य घस्याद्रव्यप्रकर्षे अमुरामुश्च स्यात् । प्राणो नय प्रत[1]रम् । आमु भृग*यः । द्वयोः स्वरादित्वादव्ययत्वम् । 'एतदादय': (५ - ४ - २५) 'छन्दोवस्वप[2]सोककविक्षेमवचो (? र्चो) निष्केवलोक्थजन-पूर्वनवसुरमर्तयविष्ठेभ्यः छन्दसि स्वार्थे यद्वाच्य': । सप्तदशक्षरः छन्दस्यः । अग्निरीशे वसव्यस्य । अपस्योवसानाः । अप् छन्दस्य श*सन्तस्य शसो लुगभावश्छान्दसः । ततो यत्प्रत्यये सौ च अपस्य इति रूपम् । अपोव-साना इत्यर्थः । मर्य्य इव स्व ओक्ये । कव्यः । क्षेम्यः । व (च? र्च) (स्त्रां ? स्यः) निष्केवल्यः । उक्थ्यः । जन्यम् । पूर्व्यम् । नव्यम् सूर्यः मर्त्यः । यविष्ठयः । 'क्षेमात्तु यो वाच्यः अन्तोदात्तार्थम्' इति हरः । क्षे[3]म्या धूः । 'समशब्दात् स्वार्थे आवतुर्वाच्यः' (वाः) ते समावद्वीर्या आसन् । 'मित्रात् छन्दसि धेयो वाच्यः' (वाः) मित्रधेयम् । सुयवस[4]मरुद्भ्यां छन्दस्य (ञ्[5]?ण्) वाच्यः' । सौयवसे[6]रं (?यं) ते । मारुतं शर्द्धः । 'कुलाल वरु[7]ट-निषादचण्डालमित्रामित्रेभ्यश्छन्दसि स्वार्थेऽण्वाच्यः' । (वा. ५ - ४ - ३६) कौलालः । वारुटः । नैषादः । चाण्डालः । मैत्रः । आमित्रः 'सा*न्नाय्यानुजाव-रानुषूकचातुष्प्राश्यवारिवस्कृतादण्' (वा. ५ -४-३६) सान्नाय्यस्य स्वरार्थम-णुक्तिः । अनुजादूनः । आनुजावरः । स हि ऋत्विषु निषिध्यते । अनुगता सूतिरेनमित्यानुषूकः । पूर्वपदात् (८ - ३ - १०६) इति षः । चतुर्भिः प्राश्यत्वाच्चातुष्प्राश्यमाधाने ब्रह्मौदनम् ।

---

1 प्रतरां, * वस्यः इति काशिकायम् । 2 वस्वव - क ।

* द्वितीयाबहुवचनं शस् । 3 मघवन् क्षे - क ।

4 अयवस - काशिका । 5 छन्दसण - घ ।

6 सौयवसं - क, सौयवसेरं - घ ।

7 रुड नि - काशिका, कर्मारशब्दोऽधिकतया पठ्यते काशिकायाम ।

* 'सान्नाय्यानुजावरानुषूकाष्टुभचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृ-ताग्रायणाग्रहायणसान्तपनाः' - काशिका ।

तुजादीनां दीर्घोऽभ्यासस्य ॥ ६ - १ - ७ ॥

तुजादयो यथादर्शनं ग्राह्याः । लिटः कानचि द्वित्वम् । तूतुजानो महेमते । वृक्ये मामहानं दाधानः[1] । लिटि णलि मीमाय । स दाधार पृथिवीम् । तुः सौत्रो धातुः वृद्धौ बले चेति **दण्डनाथः** स तूताव नैनं दिवेः—क्वसौ - घृताहवन दीदिवः । **'मतुवसः'** (८ - ३ - १) इति रुः । **छन्दस्युभयथा** - (३ - ४ - ११७) इति लिटः सार्वधातुकत्वात् श्नौ कृते 'लिटि धातोः'— (६ - १ - ८) इत्युक्त्या विकरणान्तस्याधा[2]तुत्वात् द्वित्वं न । इममिन्द्राय स्विन्विरे । **'द्विर्वचनं छन्दसि वेति वक्तव्यम्'** । **(वा. ६ - १ - ८)** लिटि - यो जागार । श्लौ—दाति प्रियाणि । जजागार ददातीत्यन्यत्र ।

॥ बहुलं छन्दसि ॥ ६ - १ - ३४ ॥

ह्वः सम्प्रसारणं बहुलं स्यात् । हुवे* (व ?) । ह्वयतेर्लटि तङि अदिप्रभृतिभ्यः शपो **'बहुलं छन्दसि'** (२ - ४ - ७३) इति शब्लुकि **सार्वधातुकस्येटो ङित्वादुवङ्** । बहुलोक्तेः उपह्व[3]ये सुहवम् ।

॥ चायः की ॥ ६ - १ - ३५ ॥

बहुलं स्यात् । न्याश अन्यं चिक्युः । क्कसौ चिकीवान् । क्वचिन्न । उज्जिहीते निचाय्य । त्यबयम् ।

॥ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्तः ॥
६ - १ - ३६

स्पर्धेर्ल[4]ङि आथामि । इन्द्रश्च विष्णो यदपस्पृधेथाम् । शाखान्तरे पदद्वयात् त्ववपूर्वात् स्पर्धेर्लङीत्याहुः । अर्चार्हो लिटि उसि–ते स्याम य आनृचुः । आर्कमानृचुः । न वसून्यानृहुः । च्युङो लिटि थासि चिच्युषे । यस्ता विश्वानि चिच्युषे । त्यजेर्लिटि । यस्तित्याज । श्रीञ् । पाके

---

1 धानाः ख, ग   2 स्यासाधुत्वात् क । *हुवेव - घ ।
उपसह्वये घ ।   4 र्लिदि - घ।

इत्यस्यक्ते श्राता श्रितमिति च। श्राता इति बहुत्वमविवक्षितम्। श्रातं हविरोष्विन्द्रः। सोमो गौरीअधिश्रितः। श्रीञ एव क्विपि क्ते च। इन्द्राय गाव आशिरम्। क्षीरैर्मध्यत आशीर्तः। **'रयेर्मतौ बहुलं** (वा. ६ - १ - ३७) छन्दसि धनार्थ रयेर्मतौ बहुलं सम्प्रसारणं स्यात्। पूर्वरूपम्। आद्गुणः। रेवन्तं हित्वा श्रृणोमि। अत्र रयिशब्दस्य इवर्णान्तत्वात् **छन्दसीरः** (८ - २ - १५) इति मतोर्वत्वम्। रेफान्ताच्च परस्य मतोर्वत्वं स्यादित्यर्थः। बहुलोक्तेः क्कचित् सम्प्रसारणं न। यो रयिवः। अत्र **'मतुवसोः'** – (८ - ३ – १) इति रुत्वम्। वत्वस्य क्वाचित्कत्वात् अर्वन्तो वा ये रयिमन्तः।

॥ खिदेश्छन्दसि ॥ ६ - १ – ५२ ॥

खिदेरेचो वा आत्वं स्यात्। या शश्वन्तमाचखाद।एवं चिखेद।

॥ शीर्षञ्छन्दसि ॥ ६ - १ - ६० ॥

शिरोऽर्थे शीर्षञ्छब्दः साधुः स्यात्। शीर्ष्णा शि[1]रः प्रतिदधे[2] वरूथम्। **'पद्दन्—'** (६ - १ - ६३) इत्यादेशः शसः पूर्वेष्वपीष्यते। [3]शलादोषणी इति प्रथमाद्विवचने।

॥ शेश्छन्दसि बहुलम् ॥ ६ - १ - ७० ॥

जश्शसोः शेर्बहुलं लोपः स्यात्। (त ?) या[4] ते धामानि। या[5] (इ) इति स्थिते शेर्लोपे प्रत्ययलक्षणेन **'नपुंसकस्य'**—(७ - १- ७२) इति नुम्। **'सर्वनामस्थाने'** — (६ - ४ – ८) इति दीर्घः। न लोपः। या यानीत्यर्थः। बहुलोक्तेर्धामानीत्यत्र न शिलोपः। **'विश्वजनादीनां छन्दसि वा तुग्वक्तव्यः'** (वा. ६ - १ - ७६) विश्वजनच्छत्रम्। विश्वजनछत्रम्। यस्य छायामृतम्।

---

1 शिरिः - ध। 2 दधौ - घ।
3 शाला - क; घ। 4 तया ते धामानि - घ।
5 य इति - घ।

स्यादिमात्रात् स्वरादूर्ध्वस्येकोयण् सामनीष्यते ।
भो इ इडेति वक्तव्ये भो ३ यिडेति हि गीयते ॥

त्रिमात्रश्चतुरादिमात्रो वायमोकारः । **'गोर्यूतौ छन्दस्यवादेशो वक्तव्यः'** (वा. ६ - १ - ७९) घृतैर्गव्यूतिमुक्षतम् ।

॥ भय्यप्रवय्ये च छन्दसि ॥ ६ - १ - ८३ ॥

भय्य इति भियः । **'कृत्यल्युटो बहुलम्'** (३ - ३ - ११३) इत्यपादाने यति अयादेशः । प्रवय्येति गत्याद्यर्थात् वियः कर्मण्यचो यति अयादेशः स्त्रियामेव निपात्यते । **'हृदय्या अप्सूपसंख्यानम्'** (वा. ६ - १ - ८३) । **भवेच्छन्दसि** (४ - ४ - ११०) इति यति अयादेशोऽयम् । हृदय्या आपः । अप्स्वित्यतन्त्रम् । नमो हृदय्याय च । **'एमन्नादिषु छन्दसि पररूपं वक्तव्यम्'** (वा. ६ - १ - ९४) । अपां त्वा एमन् अपां त्वे मन । अपां (त्वोमन् ? त्वोद्मन्[1])

॥ वा छन्दसि ॥ ६ - १ - १०६ ॥

दीर्घाज्जसीचि च परे पूर्वसवर्णदीर्घो वा न स्यात् । देव्य इति प्राप्ते देवीरापः । मह्यावित्यत्र तु महीद्यावापृथिवी । वेत्युक्तेः नद्यो मातृतमाः । **'अमिपूर्वः'** (६ - १ - १०७) इत्यत्रापि वा छन्दसि इत्यनु[2]वृत्तेः (त्ते) । अन्यामन्याँ नद्यम् । **'सम्प्रसारणाच्च'** (६ - १ - १०८) इत्यत्रापि तदनुवृत्तेः मित्रावरुणौ यज्यमा[3]नौ इत्यत्र यजेर्यकि सम्प्रसारणे कृते अकारस्य पूर्वरूपत्वाभावात् पुनर्यण् ।

॥ प्रकृत्यान्तः पादमव्यपरे ॥ ६ - १ - ११५ ॥

ऋक्पादान्तर्गत एङ् अवकारयकारपरेऽतिपरे प्रकृतया स्यात् । ये अग्नयो न । इन्द्रो अग्निरश्विना । अन्तः पादमित्युक्तेः पदान्ते सन्धिरेव ।

---

1 त्वोमन् - घ । 2 नुवर्तते अन्या - क, घ ।

3 यज्यमानमि - क ।

कयामती कुत एतास एतेऽर्चन्ति । अकारस्य व्यपरत्वेऽपि सन्धि । ते अवदन प्रथमाः । केचिदिदं सूत्रं सूत्रं प्रकृत्येत्येतावत् पठित्वा [1]पदान्ते सन्धिकार्याणां सर्वेषां निषेधमाहुः । अर्यो मनीषा अग्निः । इयं मनीषा इयमित्यादि सिद्धम ।

॥ अव्यादवद्यादक्रमुरव्रतायमवन्त्ववस्युषु च ॥ ६ - १ - ११६ ॥

एषु परेष्वेङ् प्रकृत्या स्यात् । व्यपरत्वादुक्तिः । वसुभिर्नो अव्यात् । मित्रमहो अवद्यात् । मा शिवासो अवक्रमुः । अवचक्रमुरिति पाठे प्रयोगो मृग्य इति रामः । ते नो अव्रताः । शतधारो अयं मणिः । ते नो अवन्तु पितरः । इति यजुषि । कुशिकासो अवस्यवः ।

॥ यजुष्युरः ॥ ६ - १ – ११७ ।

यजुष्येङन्त उरश्शब्दोऽति प्रकृत्या स्यात् । यजुषि पादाभावादनन्तः पादार्थ विधिः । उरो अन्तरिक्षम् । केचिद् यजुष्युरो इति पठन्ति ।

॥ आपो जुषाणोवृष्णोर्वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे ॥ ६ - १ - ११८ ॥

आप आद्याः अम्बिकाशब्दात् पूर्वावम्बेऽम्बालेशब्दौ च यजुषि प्रकृत्या स्युः । आपो अस्मात् । जुषाणो अग्नि[2]राज्यस्य । वृष्णो अंशुभ्यां गभस्तिभिः । वर्षिष्ठे अधि[3]नाके । अम्बेऽम्बाल्येऽम्बिके इति पाठात् द्वयोः अम्बिके पूर्वत्वम् ।

॥ अङ्ग इत्यादौ च ॥ ६ - १ - ११९ ॥

अङ्गे शब्द[4]स्थितो यस्त्वेङ् य[5]श्चाङ्गे इत्यतः पुरा ।
तें द्वे अति प्रकृत्या स्तो[6]यजुर्वेदे ह्ययं विधि ॥
प्राणो अङ्गे अङ्गे अदीध्यत् ।

---

1 पादा - क ।
2 अप्तुरा - काशिकापाठः ।
3 अपि - क ।
4 शब्दे स्थि - घ ।
5 त्वा - क ।
6 स्तः - क ।

।। अनुदात्ते च कुध परे ।। ६ - १ - १२० ।।

कवर्गपरे धकारपरे चानुदात्तेऽति परे यजुष्येङ् प्रकृत्या स्यात् । अयं सो अग्निः । अयं सो अध्वरः ।

।। अवपथासि च ।। ६ - १ - १२१ ।।

अस्मिन्ननुदात्तादौ परे यजुष्येङ् प्रकृत्या स्यात् । रुद्रेभ्यो अवपथाः । वपेर्लङि थास् ।

अवङ्स्फोटायनस्येति गोरच्यवङुदाहृतः ।
स आद्युदात्त एवेष्टो गवा शिर इतीक्ष्यताम् ।।

।। आङोऽनुनासिकश्छन्दसि ।। ६ - १ - १२६ ।।

आङोऽचि अनुनासिकः स्यात् । स च प्रकृत्या स्यात् गभीर उग्रपुत्रे । बहुलमित्यपि केचित् । य आ नयत् परावतः । आङोऽनर्थक[1]स्य वक्तव्यमिति प्रदीपे । तेन गभीर आँ इत्यादौ सप्तम्यर्थानु[2]वादकत्वाद् आङनर्थकः । आनयदित्यादौ क्रियाविशेषणत्वात् सार्थक इति । **'इकोऽसवर्णे शाकल्यस्य-(६ - १ - १२७)** इति प्रकृतिभावः । **सिति नेति वाच्यम् (वा.)** छन्दसि । घस् । ऋत्वियः । **'ईषा अक्षादिषु छन्दसि प्रकृतिभावमात्रं वक्तव्यम्' (वा. ६ - १ - १२७)** ईषा अक्षोहिरण्यय[3]: ।

।। अप्लुतवदुपस्थिते ।। ६ - १ - १२९ ।।

उपस्थितमित्यनार्ष इति शब्दः । तस्मिन् प्लुतोऽप्लुतवत्स्यात् । प्लुतकृतः सन्ध्यभावो नः । सन्धिः स्यादित्यर्थः । विन्दतीति विन्दती ३ । **'ई ३ चाक्रवर्मणस्य' (६ - १ - १३०)** इति विकल्पः इतावपि स्यात् ।

।। स्यश्छन्दसि बहुलम् ।। ६ - १ : १३३ ।।

स्य इति त्यच्छब्दस्य हलि बहुलं सुलोपः स्यात् । एष स्य ते । बहुलोक्तेरलोपोऽपि मृग्यः ।

---

1 र्थस्य - घ ।   2 र्थापादक - क ।
3 हिरण्यया - घ ।

।। ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ।। ६ - १ - १५१ ।।

चन्द्रोत्तरपदे समासे ह्रस्वात्परः सुट् स्यात् । सुश्चन्द्र दस्म विश्पतेः । असमासेऽपि दृश्यते । पृथुश्चन्द्रमवसे । **'संहितायाम्'** (६-१-७२) इत्यधिकाराद् विभागे सुचन्द्र । पृथुचन्द्रम् । **'दिवो द्यावा'** (६ - ३ - २९) इत्यसमासेऽपीष्यते । द्यावाचिदस्मै पृथिवी ।

।। पितरा मातरा च छन्दसि ।। ६-३-३३ ।।

विपर्ययेण च दृश्यते । नू मातरा पितरा नू चित् । **'तिलि स्त्रियां पुंवत्वमिष्टम्'** । **'वृकज्येष्ठाभ्यां तिल् तातिलौ च छन्दसि'** (५ - ४ - ४१) इति प्रशंसायां वृकात्तिल् । तत्र प्रशस्ता वृकी वृकतिरेव । **'पादस्य पद—**(६ - ३ - ५२) इति [1]वादेशोऽन्तोदात्तः इष्टः । **'ङ्यापो संज्ञाछन्दसोर्बहुलम्'** (६ - ३ - ६३) इति ह्रस्वः । ऋज्वासो मा पृथिविष्ठाः । **'स्थास्थिन्—'** (वा. ८ - ३ - ९७) इतिषः । ऊर्णम्रदा वि प्रथस्व । ऊर्णा[2]व म्रदीयस्येत्यर्थः ।

।। त्वे च ।। ६ - ३ - ६४ ।।

बहुलं ह्रस्वः स्यात् । रोहिणित्वम् । **'भक्षस्य छन्दसि कारे मुम् वाच्यः** (वा. ६ - ३ - ७०) । क्रतौ भक्षणविशेषो भक्षंकारः । **'धेनोर्भव्यायां मुम् वाच्यः'** (वा. ६ - ३ - ७०) धेनुत्वेन भविष्यन्ती धेनुंभव्या । **'लोकस्य पृणे मुम्'** (वा. ६ - ३ - ७०) लोकम्पृणा इष्टका । पृणेस्तुदादेर्मूलविभुजादित्वात्कः । **'भ्राष्ट्राग्न्योरिन्धे'** (वा. ६-३-७०) भ्राष्ट्रमिन्धः । अग्निमिन्धो ग्रावग्राभः (घञण् वा) सहस्य सभाव उदात्त इष्टः ।

।। समानस्यछन्दस्यमूर्धप्रभृत्युदर्केषु ।। ६ - ३ - ८४ ।।

समानस्य सभावः स्यात् । मूर्धादित्रितयेषु न । स्युः सगर्भ्यसयूथ्याद्या भवेच्छन्दसि य(न्)[3]स्मृतः समानमूर्धा । समानप्रभृतिः । समानोदर्कः ।

---

1 पदादेशो - घ। 2 ऊर्णावन् म्र - घ।
3 य स्मृतः - घ ।

इत्येते[1]षु न। अद्रि सध्र्योरन्तोदात्तत्वमिष्यते। **'अद्र्यादेशः छन्दसि स्त्रियां बहुलमिति वाच्यम्'** (वा. ६ - ३ - ९२)। आविश्वाजी विदथ्यामनक्तु। अत्र विश्वस्य सर्वनामत्वेऽप्यद्रिर्न।

॥ सधमादस्थयोश्छन्दसि ॥ ६ - ३ - ९६ ॥

घञन्ते मदौ क्विबन्ते वा मादयतौ स्थे च परे सहस्य सध स्यात्। रेवतीर्न सधमादे। मदेरपि प्राप्ते निपातनाच्छान्दसो वा घञ्। सह माद्यन्त्यत्रेति सधमादो यज्ञः। क्विपिणिलोपे अर्वागिन्द्र सधमादो वहन्तु। यो अस्कभायदुत्तरं सधस्थम्। सह तिष्ठन्त्यत्रेति घञर्थे कः।

॥ पथि च छन्दसि ॥ ६ - ३ - १०८ ॥

कोः पथि परे कवादेशः कादेशश्च वा स्यात्। कवपथः कापथः कुपथः। छन्दसि कवादेशोऽन्यत्रापीति **हरदत्तः। न कवा*रिभ्यः।** केवलस्य कोः कवादेशो दृष्ट इति स एवाह। कवा तिर्यङुपतिष्ठते। ईषत्तिर्यङि-त्यर्थः-।

पृषोदरादौ—

दाशनाशदभध्येषुदुरऊत्वंपरस्य टुः
दुःखेनदेयो दूळाशो दूणाशो दूळभश्चखल्।
व्याजहिंसार्धकाद् दम्भेर्नलोपोऽत्र निपातनात्
दुष्टं ध्यायति दूढ्योऽसौ नैते छन्दोधिकारगाः॥
स्वः शब्दस्य र उत्वं स्यान्निगमे रोहतौ परे
हशि चेत्युत्ववदिदं सुवो रोहावहीत्यतः।
सुवा रोहावहीति स्यात् प्रातारथवदन्यथा

1 इत्येषु - घ।

* छन्दस्यन्यत्रापि दृश्यते। न कवादिभ्यो न हिते पृणन्तीति कवा-शब्दोऽपि दृश्यते केवलः। कवातिर्यादि वोपतिष्ठतेति ईषत्तिर्यङ्ङित्यर्थः— **पदमञ्जरी।**

पीवोपवसनादीनां लोपोऽत्र छन्दसीष्यते ॥
पीवसोर्हि सलोपोऽयमेवं सिद्धं रजेषितम् ।

॥ साढ्यैसाढ्वासाढेति निगमे ॥ ६ - ३ - ११३ ॥

सोढ्वेत्योत्वे प्राप्ते साढ्यै साढ्वा द्वयं सहेः क्त्वायाम् । साढातृचीति वृत्तिः साढा इति क्तान्तमाह **हरदत्तः** ।

अषाह्लमुग्रंपृतनास्वषाह्लं
युत्स्वित्यपि क्तो न तु तृच् प्रतीतम् ।
मरुद्भिरुग्रः पृतनासु साह्ले-
त्येतत्त्विनन्तं त्विति शब्द सिद्धम् ॥

॥ संहितायाम् ॥ ६ - ३ - ११४ ॥

अधिकारो ह्ययं कर्णे लक्षणेत्यादिषु स्थितः ।
अवग्रहे पदच्छेदे चापि दीर्घनिवृत्तये ॥
लोके त्ववग्रहो नास्ति नोक्तो दीर्घः पदद्वये ।
तत्तदानुपयुक्तत्वादिहोक्तः संहिताग्रहः ॥

॥ छन्दसि च ॥ ६ - ३ - १२६ ॥

अष्टन उत्तरपदे परे दीर्घः स्यात् । अष्टापदी नवपदी । अत्र **'पादोऽन्यतरस्याम्'** (४ - १ - ८) इति ङीप् । **पादः पत्** (६ - ४ - १३०) । अतं संहिताधिकारे सत्यपि दीर्घान्तिमेवावगृह्णन्ति ।

॥ मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥ ६ - ३ - १३१ ॥

सोमादेर्मतौ परे मन्त्रे दीर्घः स्यात् । अश्वावतीम् । सोमावतीम् । इन्द्रियावन्तो मनामहे । विश्वकर्मणा विश्वदेव्यावता । संहिताधिकाराद-वग्रहे संहिताभावाद् दीर्घो न । अश्ववतीम् । सोमवतीम् इत्यादि ।

॥ ओषधेश्च विभक्तावप्रथमायाम् ॥ ६ - ३ - १३२ ॥

मन्त्रे दीर्घः स्यात् । नम ओषधीभ्य[1]ः । प्रथमायां तु न । ओषधयः संवदन्ते । त्वमुत्तमास्योषधे ।

॥ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ॥ ६ - ३ - १३३ ॥

एषामृचि संहितायां दीर्घः स्यात् । आ तू नः । नूचित् सघा राजा मक्षूहि । तङिति लोण्मध्यमपुरुषस्य तशब्दस्य **'सार्वधातुकमपित्'** (१-२-४) इति ङित्वं गतस्योक्तिः । पचता पक्तीः । कू चक्रे णेवसिञ्चन् । त्रा[2] (त्रः?) अत्रा नो विश्पतिः । उरुष्याणः । संहिताभावे तु न । नु चित् ।

॥ इकः सुञि ॥ ६ - ३ - १३४ ॥

इगन्तस्य सु शब्दे परे मन्त्रे दीर्घः स्यात् । अभी षु[3] णः । **'सुञः'** (८-३-१०७) इति षत्वम् ।

॥ द्व्यचोऽतस्तिङः ॥ ६ - ३ - १३५ ।

द्व्यचोऽदन्तस्य तिङ पदस्य मन्त्रे दीर्घः । विद्मा हि । भवा[4] नः ।

॥ निपातस्य च ॥ ६ - ३ - १३६ ॥

मन्त्रे दीर्घः । एवा हि । अच्छा नः । अथा राजानम् । **'अन्येषामपि दृश्यते'** (६ - ३ - १३७) इति दीर्घे जलाषाट् । अत्र **'छन्दसि सहः'** (३ - २ - ६३) इति ण्विः । **'सहेः साडः सः'** (८-३-५६) **इति षः ।**

॥ छन्दस्युभयथा ॥ ६ - ४ - ५ ॥

तिसृचतस्रोः नामि दीर्घोऽदीर्घः स्यात् । तिसृणां सप्ततीनामित्यादि मृग्यम् ।

---

1 भ्यः । विभृत ओषधीषु प्रथमायाम् - घ।

2 त्रान्ता - घ। 3 सु - घ ।

4 भावामनः क ।

॥ वा षपूर्वस्य निगमे ॥ ६-४-९ ॥

नान्तस्योपधाभूतः षपूर्वो योऽच् तस्यासंबुद्धौ सर्वनामस्थाने वा दीर्घः स्यात्। वृषाणम्। वृषभिः। वृषण धोभिः॥

॥ जनिता मन्त्रे ॥ ६-४-५३ ॥

जनयतेर्णिलोपो निपात्यते। यो नः पिता जनिता।

॥ शमिता यज्ञे ॥ ६-४-५४ ॥

यज्ञमन्त्रे शमितेति स्यात्। जनयिता शमयितेति लोके॥

॥ युप्लुवोर्दीर्घश्छन्दसि ॥ ६-४-५८ ॥

अनयोर्ल्यपि दीर्घः स्यात्। अनुपूर्वं वियूय। आपो दक्षिणाः-परिप्लूय।

॥ छन्दस्यपि दृश्यते ॥ ६-४-७३ ॥

छन्दस्याडागमोऽनजादीनामपि दृश्यते। सुरुचो वेन आवः। **वृणोते "मन्त्रे घस —" (२-४-८०)** इति लस्य लुक्।

बहुलं छन्दस्यमाङ्योगेऽपि ॥ ६-४-७५ ॥

अमाङ्योगे माङ्योगेऽपि बहुलमडाटौ स्तः। जनिष्ठा उग्रः। काम-मूनयीः। आ दस्मादन्यो अजनिष्ट। औक्ष[1]त् घृतैः। माङ् योगेऽपि बहुलं क्वचित् स्यात्। मा वः क्षेत्रे परबीजान्यवाप्सुः।

॥ इरयोरे ॥ ६-४-७६ ॥

इरे शब्दस्य बहुलं रे स्यात्। ददृशिरे इति प्राप्ते नक्तं ददृश्रे। मदे सोमस्य रण्यानि चक्रिरे।

सेटां रेत्वे कृते पश्चादिटि स्यादिर इत्यदः।
पुनस्तस्यापि रेत्वार्थं द्वित्वोक्तिरिरयोरिति॥

---

1 'ओ न क्षद्घृतैः' – क।

'तन्वादीनां छन्दसि बहुलमियङुवङौ वाच्यौ' (वा. ६ – ४ -७७)।

तन्वं पुषेम; तनुवं पुषेम। त्र्यम्बकं यजामहे त्रियम्बकं यजामहे।

। छन्दस्युभयथा ।। ६ -४ - ८६ ।।

भूसुधियोर्यण् चेयङुवङौ चेत्युभयथा स्यात्।। वनेषु चित्रं विभ्वम् सुध्यो हव्यमग्ने। विभुवं सुधियमिति चान्यत्र।

।। तनिपत्योश्छन्दसि ।। ६ - ४ - ९९ ।।

अनयोरजादौ क्ङिति परे उपधालोपः स्यात्। वितत्निरे कवय ओ तवै शकुना इव पप्तिम।

।। घसिभसोर्हलि च ।। ६ - ४ - १०० ।।

अनयोर्हलादावजादौ च क्ङित्युपधालोपः स्यात्। सग्धिश्च मे सपीतिश्च मे अदेः क्तिनि **'बहुलं छन्दसि'** (२ - ४ - ३९) इति घस्लादेशे उपधालोपे च कृते **'झलो झलि'** (८ - २ - २६) इति सलोपः। तस्यधत्वं घस्य जश्त्वं च। ग्धिः भुक्तिः। **'समानस्य छन्दसि'** – (६ - ३ - ८४) इति सभावे समाना ग्धिः सग्धिः। भसेर्लोटि तसः ताम्। श्लौ द्वित्वम्। बभस् ताम्। उपधालोप सलोप जश्त्वानि। बब्धां ते हरीधानाः। अजादौ – घस् अ[1]न्। उपधालोपे षत्वचर्त्वे अट्। अक्षन्नमीमदन्त। **'अदभ्यस्तात्'** (७ - १ - ४) बभस् अति। उपधालोपे चर्त्वम्। बप्सति।

।। श्रुशृणुपॄकृवृभ्यश्छन्दसि ।। ६ - ४ - १०२ ।।

एभ्यो हेर्धिःस्यात्। श्रुधी हवम्। नॄँ ऋः पाहि श्रुणुधी गिरः। अनयोः **'अन्येषामपि दृश्यते'** (६ - ३ - १३७) इति दीर्घः। **'उदोष्ठ्यपूर्वस्य'** (७ - १ - १०२) इत्युत्वम्। **'हलि च'** (८ - २ - ७७) इति दीर्घः।

---

1 'अत्' - क

ऊर्धि प्रयंसि च। पतिमेकादशं कृधि । अपावृधि । एषु विकरणे प्राप्ते **'व्यत्ययो बहुलम्'** (३ – १ - ८५) इति शप् । **'बहुलं छन्दसि'**(२ - ४ - ७३) इति शब्लुक् ।

॥ अङितश्च ॥ ६ - ४ - १०३ ॥

वा छन्दसि (३ - ४ - ८८) इति पित्वादङितो हेर्धिर्भवेत् । युयोध्य-स्मत् । यौतेः श्लुर्बहुलोक्तेर्गुणोऽप्यङित्वादतो युयोधीति । **'उतश्च प्रत्यया-दिति हिलोपश्छन्दसि वा वाच्यः'** (वा. ६ - ४ - १०६) चिनुहि विमृधः । **'छन्दस्यमिपचोरप्यलिट्येत्वं वाच्यम्'** (वा. ६ - ४ - १२०)। अमेश्चानशि अममान इति प्राप्ते* एमान। छान्दसे शपो लुकि मुगभावः। पचेरन्निति प्राप्ते पेचिरन् । एतो ह्रस्वच्छान्दसः। **'यजि वपोश्च'** (वा. ६ - ४ - १२०)। आ येजे मनुः। आ वेपे। लङि उत्तमैकवचने अयजे अवपे इति प्राप्ते एत्वे कृते **'छन्दस्यपि दृश्यते'** (६ - ४ - ७३) इत्यनजादावप्याट् ।

॥ मन्त्रेष्वाङ्यातेरातमनः ॥ ६ - ४ - १४१ ॥

तृतीयैकवचने परे आत्मन आदेर्लोपः स्यात् पुरुवारं पुरुत्मना। **आङोऽन्यत्रापि दृश्यते।** (वा.) त्मने तोकायो **'अन्तिकस्य तसि कादि लोप आद्युदात्तत्वं च'** (वा. ६ - ४ - १४९) एतच्छान्दसमाह **रामः**। अन्तितो न दूरात्। **'तमे तादेश्च'** (वा. ६ - ४ - १४९)। चात् कादेश्च। अग्ने त्वं नो अन्तमः। अन्तितमः । **'कादिलोपो बहुलं वाच्यः'** (वा.) अन्तिषत् । **'पूर्वपदात्—'** (८ - ३ - १०६ । इति षः। **'ये च'** (वा—) अन्तियः। **'भवे छन्दसि'** (४ - ४ - ११०) इति यत्।

॥ विभाषर्जोश्छन्दसि ॥ ६ - ४ - १६२ ॥

इष्ठेमेयस्सु परेषु ऋजोः ऋतोः वा रत्वं स्यात्। रजिष्ठम्[1] ऋजिष्ठः।

---

* प्राप्ते इत्यस्यानन्तरं 'एत्वे कृते' इत्यतः पूर्वोभागः विभ्रष्टः क प ।
1 रजिष्ठः - क ।

ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि ।। ६ - ४ - १७५ ।।

ऋतुवास्त्वोः भवे यति ऋत्व्यं वास्त्व्यम् । वास्तोरणि वास्त्वम् । मधोरणि - माध्वीर्नः सन्त्वोषधी; । मयटि हिरण्ययमुत भोगम् ।

बहुलं छन्दसि ।। ७ - १ - ८ ।।

झादेशस्यातो बहुलं रुट् स्यात् । अदुह्रत । वहुलोक्तेरन्यत्रापि अयुज्रन् प्रातरद्रयः । श्यावीमरुषीमज्रन् ।

।। बहुलं छन्दसि ।। ७ - १ - १० ।।

अतो भिस् ऐस् वहुलं स्यात् । देवेभिरिन्द्रः । तेभिश्चष्टे । अनतोऽपि स्यात् । नद्यैः ।

।। नेतराच्छन्दसि ।। ७ - १ - २६ ।।

क्लीबादितरात् स्वमोरद्डादेशो न स्यात् । वार्तघ्नमितरम् ।

।। क्त्वापि छन्दसि ७ - १ - ३८ ।।

ल्यब्विषये क्त्वा ल्यबपि स्यात् । यजमानं परिधापयित्वा । आदाय श्येनः इति ल्यप् ।

।। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ।। ७ – १ - ३९ ।।

सुपां स्थाने यथादर्शनमेते स्युः । अन्यसुप्स्थानेऽपि सु ऋजवः सन्तु पन्थाः । लुक् - स्व ऋतस्य धामन् । ङि लुकि **न ङि सम्बुद्धध्योः'(८ - २ - ८)** इति न लोपाभावः । पूर्वसवर्णः कया मती । मत्येत्यर्थः । आ आत् शे इति छेदः । आ-उभा देवा नृचक्षसा । आत् - या देव विद्म ता त्वा । शेः शित्वात् सर्वस्य । युष्म ए । अतो गुणेन युष्मे । वाजब[1]न्धवः । अस्मे इन्द्राबृहस्पती । युष्मासु अस्मभ्यमिति चार्थः । या-धृष्णुया । डा– नाभा पृथिव्याः । ड्या-ऊनुष्टुभेत्य (र्थः? र्थे) अनुष्ट्या वाचयित्वा याच्– अन्वेमि साधुया । चित्वादन्तोदात्तः- आल्-वसन्ते इति प्राप्ते वसन्ता

1 जवन्ध - क ।

यजेत। लित्वात् प्रत्ययात्पूर्वस्योदात्तत्वम्। 'इयाडियाजी[1]काराणामुपसंख्यानम्' (वा. ७ – १ - ३९)। इया-उरुणेत्यर्थे उर्विया परिज्मन्। डियाच्-सुक्षेत्रिया। सुक्षेत्रिणेत्यर्थ:। ङेरीकार:। सरसी शयानम्। 'आङ्याजयारां चोपसंख्यानम्' (वा. ७ – १ - ३९)। आङि घेर्ङिति(७ - ३ - १११) गुण:। प्रबाहवासि सृतम्। अयाच्-स्वप्नया सच[2]स्व। अयार्-अद्य। चिन्मुहु:। 'उपोत्तमं रिति' (६ - १ - २१७) इति स्वर:। सिन्धुमिव नावया। सुपां सुबन्तरं तिङां तिङन्तरं च वाच्यम्' (वा. ७ - १ - ३९) धुरि दक्षिणाया:। दक्षिणायामित्यर्थ:। अश्वयूपाय तक्षति। तक्षन्तीत्यर्थ:।

॥ अमो मश् ॥ ७ - १ - ४० ॥

मिबादेशस्यामो मश् स्यात्। अकार उच्चारणार्थ:। अवधिषमिति प्राप्ते*वधीं वृत्रम्। अक्रमिषमिति प्राप्ते आपौ मूर्धानमक्रमीम्। अस्ति सिच्—इत्यपृक्तत्वादीट्। इट इटीति सिज लोप:।

॥ लोपस्त आत्मनेपदेषु ॥ ७ - १ - ४१ ॥

तङ्क्षु तकारलोप: स्यात्। दुग्धामित्यर्थे दुह्रामश्विभ्यां पय:। एतदस्या अन: शये। शेते इत्यर्थ:।

॥ ध्वमो ध्वात् ॥ ७ - १ - ४२ ॥

अन्तरेवोष्माणं वारयध्वात्।

॥ *यजध्वैनमिति च ॥ ७ - १ - ४३ ॥

यजध्वैनं प्रियमेधा: इति क्वचिच्छाखायाम्। यजध्वमेनमित्यर्थ:। बह्वृचमतेन तु यजध्वैनमिति चेंति सूत्रपाठे मलोपमात्रनिपातनं चेति **राम:।**

---

1 याजिका - क। 2 चस्य - क।

* 'लुङि - बहुलं छन्दस्यमाङ्योगेऽपीत्यडागमाभाव:। काशिका।

* यजध्वैनमिति च। यजध्वमित्येतस्यएनमित्यस्मिन् परतो मकारलोपो निपात्यते वकारस्य च यकार: छन्दसि विषये। यजध्वैनं प्रियमेधा: यजध्वमेनमिति प्राप्ते काशिका।

॥ तस्य तात् ॥ ७ - १ - ४४ ॥

लोट् तशब्दस्य तात् स्यात् । अस्मा (? अस्ना) रक्ष: संसृजतात् ।

॥ तप् तनप्तनथनाश्च ॥ ७ - १ - ४५ ॥

त शब्दस्यैते च स्यु: । तप् तनपो: पित्वाद् अङित्वाद् गुण: । शृणोत ग्रावाण: । मधुच्छन्दा: शृणोतन । तने तु–[1]ते नो रत्नानि धत्तन । अपित्वेन ङित्वाद् आल्लोप: । थन-हव्या मित्र प्रयाथन ।

॥ इदन्तो मसि ॥ ७ - १ - ४६ ॥

मस् प्रत्ययस्य इदन्त (ता) स्यात् । गृजीमसि त्वेषम् ।

॥ क्त्वो यक् ॥ ७ - १ - ४७ ॥

क्त्वाप्रत्ययस्य यगागम: स्यात् । हत्वाय शत्रून् ।

॥ इष्ट्वीनमिति च ॥ ७ - १ - ४८ ॥

क्त्वायामीत्वं निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा इत्यर्थ: । इति करणात् पीत्वीनं सोममित्याद्यपि ।

॥ स्नात्व्यादयश्च ॥ ७ - १ - ४९ ॥

क्त्वायासीत्वं निपात्यते । स्विन्न: स्नात्वी मलादिव । पीत्वी शिप्रे अवेपय: । सुरभिणी कृत्वी ।

॥ आज्जसेरसुक् ॥ ७ - १ - ५० ॥

अवर्णान्तात् परस्य जसे: असुक् स्यात् । असस् । रुत्व विसर्गौ । ब्राह्मणास: । पितर: सोम्यास: । **'क्त्वापि–'** (७ - १ - ३८) इत्यतोऽपीति सर्वत्राधिकृतम् । तेन देवा: इत्यपीति । **'त्रयाणामिति प्राप्ते त्रीणामित्यपि छन्दसीष्यते'** (वा. ७ - १ - ५३) त्रीणामिव समुद्राणाम् ।

---

1 'उत नो' - क ।

।। श्रीग्रामण्योश्छन्दसि ।। ७ - १ - ५६ ।।

अनयोरामि नुट् स्यात्। श्रियो नित्यार्थमुक्तिः। श्रीणामुदारः। सूतग्रामणीनाम्।

।। गोः पादान्ते ।। ७ - १ - ५७

ऋक्पादान्ते गोर्नुट् स्यात्। गोपतिं शूरगोनाम्। अपादान्ते न। गवां गोत्रम्। छन्दसि विधीनां विकल्पात् पादान्तेऽपि क्वचिन्न। विराजं गोपतिं गवाम्।

।। छन्दस्यपि दृश्यते ।। ७ - १ - ७६ ।।

तृतीयाद्यजादिविभक्तौ अस्थ्यादीनामनङुक्तः सोऽन्यत्रापि दृश्यते। अनजादौ दधीचो अस्थभिः। भद्रं पश्येमाक्षभिः। पदत्वान्नलोपः। तृतीयादेः प्रागपि अस्थानि विकृष्य पचति। असुप्यपि - अस्थन्वन्तं यदनस्था सुपूर्णस्य दधन्वतः। अक्षण्वन्तः कर्णवन्तः।

।। ई च द्विवचने ।। ७ - १ - ७७ ।।

अस्थ्यादीनां द्विवचने परे उदात्त ई स्यात्। अक्षीभ्यां ते चक्षुराधत्तमक्ष्योः।

।। दृक्स्ववस्स्वतवसां छन्दसि ।। ७ - १ - ८३ ।।

एषां सौ परे नुं स्यात्। संयोगान्तलोपः क्विन्नन्तत्वात् कुः कीदृङ्ङिन्द्र। स सुत्रामास्ववान्। शोभनमवोऽस्येति पाणिनिर्मन्यते। श(ा)कल्यस्तु स्वंवानित्याह। भुवस्तस्य स्वतवान्।

।। बहुलं छन्दसि ।। ७ - १ - १०३ ।।

ऋदन्तस्य धातोर्बहुलमुत् स्यात्। अनोष्ठ्यपूर्वादपि स्यात्। तॄ धातोः **'आदृगम—'** (३ - २ - १७१) इति लिड्वत्किः। ततुरिः। गॄधातोः

जगुरिः पराचैः। ओष्ठ्यपूर्वस्यापि न स्यात्। पृऋधातोः किः। यण्। पप्रिणा [1]सस्निना।

॥ ह्रुह्वरेश्छन्दसि ॥ ७-२-३१ ॥

ह्वृ कौटिल्ये इ(त्य)स्य निष्ठायां ह्रु इति स्यात्। अह्रुतो महः।

॥ अपरिह्वृताश्च ॥ ७-२-३२ ॥

अत्रादेशाभावो निपात्यते। अपरिह्वृताः सनुयाम। परिह्वृते दना जन इत्यपि दृश्यते।

॥ सोमे ह्वरितः ॥ ७-२-३३ ॥

सोमे वाच्ये इण् निपात्यते। मानः सोमो ह्वरितो जीवतस्ते।

ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च ॥ ७-२-३४ ॥

ग्रसितं वा एतत्सोमस्य। विष्कभिते अजरे। "वेःस्कभ्नातेः" (८-३-७७) इति षः। येनस्वस्तभितम्। सत्येनोत्तभिता। चत्तो इतश्चत्तामुतः श्यावमश्विना विकस्तम्। अश्वस्याषिशस्ता। उत शंस्ता सुविप्र। प्रशास्ता पोता। एष्वनिटामिट् सेटामनिट्त्वं च निपातितम्। तृऋवृञोस्तृच उडूटौ। तरुतारं रथानाम्। तरूता। वरूता त्वावतो वरूता। वरूत्रीस्त्वा। विभक्तिरतन्त्रम्। वरूत्रीभिस्सुरशरणः। ज्वलादेः शब्लुक् तिप् ईट् च *।

॥ बभूथाततन्थजगृ[2]ह्मववर्थेति निगमे ॥ ७-२-६४ ॥

थलि मस्यप्यनिट्त्वं निपात्यते। यत आबभूथ। अन्तरिक्षमूर्वाततन्थ। जगृम्भाते। वितमो ववर्थ। बभूविथ आतेनिथ जगृहिम ववरिथेति

---

1 सस्सिधान - क;

* शिष्टान्युदाहरणानि आदर्शे न दृश्यन्ते। 'जनी प्रादुर्भावे' श्यन् विकरणः छान्दसः। 2 म्भ

लोके । वृञ इदन्तत्वात् थल्यनिटि प्राप्ते ववर्थेति वेदे निपातनादेव लोके इट् सिद्धः ।

॥ सनिंससनिवसम् ॥ ७ - २ - ६९ ॥

सनिमित्येतत्पूर्वं सनेः क्वस्वन्तममि ससनिवांसमिति स्यात् । अग्निचित्वाग्ने सनिंससनिवांसम् अन्यत्र सेनिवांसम् ।

॥ "ईडजनोर्ध्वे च" (७ - १ - ७८) ॥ इति जनेः*: शब्दयोरिट् । जनिषे । जनिध्वे । छान्दसः श्यनो लुक् ।

सौभगमित्यत्र "हृद्भग – (७ - ३ - १९) इत्युभयपदवृद्धिर्नेष्यते

'प्रत्ययस्थात्कात्-' (७ - ३ - ४४) इत्यापि प्राप्तमित्त्वं पावकादीनां **छन्दसि नेति वाच्यम् । (वा. ७ - ३ - ४५)** 'पावका नः सरस्वती ' ऋक्षावा इयमलोमकासीत् ।

॥ **मीनातेर्निगमे** ॥ ७ - ३ - ८१ ॥

मीञ् हिंसायामित्यस्य शिति ह्रस्वः स्यात् । मिनातिश्रियं जरिमा तनूनाम् ।

'अभ्यस्तस्याचि पिति सार्वधातुके गुणो बहुलं छन्दसीति वाच्यम्' (वा. ७ - ३ - ८७) । लेटोऽट्यजादित्वं जुजोषदिन्द्रः । जुजुषत् । जुषेर्व्यत्ययेन परस्मैपदम् । 'स्पाशिकाशिवाशीनामभ्यस्तानामुपधाह्रस्वो वाच्य': (वा. ७ - ३ - ८७) पस्पशाते । स्पाशेर्यङ लुकि लेट्याट् छान्दसस्तङ् अभ्यासस्य ह्रस्वश्च ।चाकशीति । वावशीति । स्पशिकशिवशिभ्यो वा सिद्धम् । तेन लोकेऽपि चाकशीतीति स्याद् । कश्यादेर्दीप्त्याद्यर्थता नानार्थत्वात् ।

---

* 'जनी प्रादुर्भावे' श्यन् विकरणः छान्दसाः ।

'तुरुस्तुशम्यमः सार्वधातुके' (७ - ३ - ९५) इति तुशम्यमिभ्यः परस्य हला (दौ?देः) सार्वधातुकस्य ईड्वा । **'बहुलं छन्दसि''** ।। (२ - ४ - ७३) इति शब्लुक् । तु वृद्धौ गतौ हिंसायां वा । उत्तवीत्यर्थम् । अध्रिगोशमीध्वम् । अभ्यमीषि वृषाकपिम् । ईडभावे मृग्यम् ।

।। बहुलं छन्दसि ।। ७ - ३ - ९७ ।।

अस्तिसिज्भ्यां परस्यापृक्तसार्वधातुकस्य ईड् बहुलं स्यात् । सलिलं सर्वमा इदम् । असत् । ईडभावे तिपो हल्ङ्यादि लोप : । आट् । आस् । **'तिप्यनस्तेः '** (८ - २ - ७३) इत्युक्तत्वाद् दत्वाभावः । सस्य रुत्वविसर्गौ । आः । सोमो दुग्धाभिरक्षाः । क्षरेर्लुङि तिप् सिच् । **अतो ल्रान्तस्येति** (७ - २ - २) वृद्धिः । छान्दसत्वादिडभावः । **ईटोऽप्पभावाद् हल्ङ्यादिलोपः ।** **'रात्सस्य'** (८ - २ - २४) इति सलोपः अट् । रस्य विसर्गः अक्षाः अक्षारीदित्यर्थः । **'अम्बार्थनाण्डलकवतीनां च सम्बुद्धौ ह्रस्वच्छन्दसि वेति वाच्यम्'** । (वा. ७ -३ - १०७) हे अम्बाड, हे अम्बाल, हे अम्बिक ।

'तलो ह्रस्वत्वं वा ङिसम्बद्ध्योरिति वाच्यम् (वा. ७ - ३ - १०७)

टापिकुते देवते भक्तिः; देवतायां, हे देवत; हे देवते ।

अम्बार्थनद्योरित्यादि पादावधि यदुच्यते ।
तच्छन्दसि विभाषा स्यादम्बे अम्बालि सिद्ध्यति ॥

विकल्पात् शतं वो अम्ब धामानि । सम्बुद्धौ **'''ह्रस्वस्य गुणः'** (७ - ३ -१०८) इति गुणाभावः । दर्वि, शतक्रतुः । **'जसि च '** (७-३-१०९ इति गुणाभावः । अधा शतक्रत्वो यूयम् । **घेर्ङिति'** (७ - ३ – १११) इति गुणाभावः । पश्वे तोकाय । **'आण्नद्याः'** (७ - ३ - ११२) इत्याडभावः । शतं मेषा[1]न् वृक्ये । **'आङो नास्त्रियाम्'** (७ - ३ - १२०) इति नाभावः । पश्वा न तायुम् इति ।

---

1 मेषासृक्ये - क;

॥ नित्यं छन्दसि ॥ ७ - ४ - ८)

चङ् परे णौ परे ऋवर्णस्य ऋकारो नित्यं स्यात् । अवीवृधत् । लोके ह्यववर्धदित्यपि स्यात् ।

॥ न छन्दस्यपुत्रस्य ॥ ७ - ४ - ३५ ॥

पुत्राद(न्य) स्यावर्णान्तस्य क्यचि परे ईत्वं तदभावे दीर्घश्च प्राप्तो न स्यात् । देवान् जिगाति सुम्नयुः ।

'क्याच्छन्दसि' (३ - २ - १२०) इत्युः पुत्रस्य तु पुत्रीयन्तः सुदानवः । । **'अपुत्रादीनामिति वाच्यम्'** (वा. ७ - ४ - ३५) । जनात् क्यच् । जनीयन्तो न्वग्रवः ।

॥ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति । ७ -४ - ३६ ॥

एते क्यजन्ता निपात्यन्ते । दुष्टमिच्छन् दुरस्युः । द्रविणमिच्छन् द्रविणस्युर्विपन्यया । वृषमिच्छति वृषण्यति । रिषं वधमिच्छति रिषण्यति ।

॥ अश्वाघस्यात् ॥ ७ - ४ - ३७ ॥

अश्वस्य अघस्य च क्यचि आत् स्यात् । अश्वायन्तो मघवन् । जहि यो नो अघायति ।

॥ देवसुम्नयोर्यजुषि काठके ॥ ७ - ४ - ३८ ॥

काठके वेदे अनयोः क्यच्यात्वं स्यात् । देवायन्तो यजमानाः सुम्नायन्तो हवामहे । एतत् काठके दृष्टत्वादृच्यपि भवति ।

॥कव्यध्वरपृतनस्यर्चि लोपः ॥ ७ - ४ - ३९ ॥

एषामृचि क्य च्यन्तलोपः स्यात् । कव्यतायोः । अध्वर्यन्नः पृतन्यति ।

॥ विभाषा छन्दसि ॥ ७ - ४ - ४४ ॥

जहातेः क्त्वहित्वं वा स्यात् । **'घुमास्था'** — (६ - ४ - ६६) इति ईत्वम् । हीत्वा । हित्वा छान्दसत्वात्क्वचिद्दीर्घाभावोऽपि हात्वा ।

।। सुधितवसुधितनेमधितधिष्वधिषीय च ।' ७ - ४ - ४५ ।।

सुवसुनेमपूर्वस्य धाञः क्तप्रत्ययः। गर्भं माता सुधितं वक्षणासु। क्तिन्यपीति हरदत्तः। वसुधितिं निरेके। नेमधिता हवन्ते। अर्धधृता इत्यर्थः। धिष्वेति। लोण्मध्यमैकवचनम्। धिष्वा शवः। सुरेता रेतो धिषीय। आशीर्लिङ्युत्तमैकवचनम्। धत्स्व धासीयेति लोके।

'स्ववः स्वतवस्मासुषसां च भादौ प्रत्यये परेऽन्तस्य तत्वं वाच्यम्' (वा. ७ - ४ - ४८) । स्ववद्भिः। स्वतवद्भिः। माद्भिः शरद्भिः। समुषद्भिरजायथाः।

।। कृषेच्छन्दसि ।। ७ - ४ - ६४ ।।

अस्य यङ्यभ्यासस्य चुत्वं न स्यात्। करीकृष्यते।

।। दातर्तिदर्धर्तिदर्धर्षिबोभूधतेतिक्तेऽलर्ष्यापनीफणत् संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत् त रीत्रतः सरीसृपतंवरीवृजन् मर्मृज्यागनीगन्तीति च ।। ७ - ४ - ६५ ।।

एषु लक्षण्येनुपपन्नं सर्वं निपात्यते। आद्यास्त्रयो धारेर्धृञो वा श्लौ यङ्लुकि वा। भुवस्तिजश्च यङ्लुकि द्वयं (बोभूतु) तेतिक्ते (इ)ति। (ग्मा ?) गत्यर्थस्य इयर्तेः सिपिअलर्षि युध्म। सिबतन्त्रम्। अलर्त्ति दक्षः। आङ् पूर्वस्य फणेः यङ्लुकि शतृ पथामङ्कास्यन्वापनीफणत्। स्यन्देर्यङ्लुकि संसनिष्यत्। संपूर्वत्वमतन्त्रम्। कृञो यङ् लुकि शतृ। करिक्रत्। क्रन्देर्लुङिः[1] कनिक्रदज्जनुषम्। ध्वृ हूर्छने भृजो ध्वरतेश्चर्छतेश्च यङ् लुकि शतृ। भरिभ्रत्। दविध्वतो रश्मयः। दविद्युतत्यारुचा। तरतेः शतरि श्लुः ङसन्तम्। तरित्रतः। पुनः सृपेर्यङ्लुकि शतरिअम् सरीसृपतम् वृजेः शतरि श्लुः। वरीवृजत्। मृजेर्णलि मर्मृज्य। आगमेर्यङ्लुक्। आगनीगन्ति कर्णम्। इति करणादन्येऽप्येवंस्युः। दाधर्थ पृथिवीम्

।। ससूवेति निगमे ।। ७ - ४ - ७४ ।

सूतेर्लिटि सुषुवे इति प्राप्ते गृष्टिः ससूव स्थविरम्।

---

1 ङि द्विरुक्तिः। कनि-—क पाठः।

।। बहुलं छन्दसि ।। ७ - ४ - ७८ ।।

अभ्यासस्य बहुलमित्। वशेर्वचश्चछान्दसः श्लुः। पूर्णां विवष्टि। जनिमा विवक्ति। **'मर्मृज्यन्ते मर्मृज्यमान इति च वाच्यम्'** (वा. ७-४-९१)। यङ् रोगैवास्तीत्युक्तिः। मर्मृज्यन्ते दिवेदिवे। मर्मृज्यमानो अत्यः।

।। प्रसमुपोदः पादपूरणे ।। ८ - १ - ६ ।।

द्विरुक्तिः स्यात्। छन्दस्येवेष्यते। प्रप्रायमग्निः। संसमित्। उपोप मे। उदुदु हर्षसे।

।। अथासिद्धाः ।।

।। छन्दसीरः ।। ८ - २ - १५ ।।

इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात्। चरुरग्निवाँ इव। आहं सरस्वतीवतोः। रान्तात् - आशीर्वन्तः सुता इमे।

।। अनो नुट् ।। ८ - २ - १६ ।।

अन्नन्तात्परस्य मतोर्नुट् स्यात्। वर्मवन्त इति प्राप्ते वर्मण्वन्तो न योधाः। नुटोऽसिद्धत्वाद् अवर्णात्परस्य वत्वम्।

।। नाद्धस्य ।। ८ - २ - १७ ।।

नान्तत्परयोस्तरप्तमपोर्नुट् स्यात् न लोपे प्राप्ते सुपथिन्तरः। समीधे दस्युहन्तमः। **"भूरिदाव्नस्तुड् वा वक्तव्यः"** (वा. ८ - २ - १७)। भूरिदावत्तरो जनः। **'घे रथिन ईद्वाच्यः'** (वा. ८ - २ - १७)। रथीतमं रथीनाम।

'हृग्रहोर्भस्य भश्छन्दसीति वाच्यम्' (वा. ८ - २ - ३५)। सुवेशसं वाजमाभरा नः। गृभ्णामि ते।

।। नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानिच्छन्दसि ।। ८ - २ - ६१ ।।

एते क्तान्ता अनत्वे निपात्यन्ते। नञ् पूर्वाच्च निपूर्वाच्च सदेः क्तः। नसत्तमञ्जसा। निषत्तमस्य। नञ् पूर्वान्नु*देः- अनुत्तमा ते। प्रपूर्वात् त्वरेः

---

* उन्देरिति काशिका।

हिंसार्थतुर्वेर्वा प्रतूर्तः। प्रपूर्वत्वमतन्त्रम्। अतूर्तं श्रावयत् पतिम्। सरतेः- असूर्तेसूर्ते। गुरी उद्यमे। शरदश्चगूर्ताः।

॥ अवयाः श्वेतवाः पुरोडाश्च ॥ ८-२-६७ ॥

एषां संबुद्धौ दीर्घो निपात्यते। अवयाज् श्वेतवाह पुरोडाश् इति शब्दानां पदत्वे ङस् वक्तव्यः। ङसि टिलोपे च कृते अवयस् श्वेतवस् पुरोडस् इति स्यात्। एषां संबुद्धाविदं दीर्घत्वम्।

॥ अम्नरूधखरित्युभयथा छन्दसि ॥ ८-२-७० ॥

एषां रुत्वं रत्वं च वा स्यात्। रुत्वे यत्वयलोपौ। अम्नश्शब्द ईषदर्थेऽव्ययमिति हरः। अम्नरस्तमितः। अम्न एव। ऊधरेव ऊधएव। अवरेव। अवएव।

॥ भुवश्चमहाव्याहृतेः ॥ ८-२-७१ ॥

भुव इति सस्य रुत्वं रत्वं वा स्यात्। भुव इन्द्रवतः सवितृप्रसूता। भू[1]रहं। भुवरहम्।

॥ प्रत्यभिवादेऽशूद्रे ॥ ८-२-८३ ॥

अशूद्रविषये प्रत्यभिवादे वाक्यान्तटेरुदात्तः प्लुतः स्यात्। आयुष्मान् भव नारायणा ३। अकारश्चास्य नाम्नोऽन्ते वाच्यः। पूर्वाक्षरः प्लुत इति स्मृत्युक्तेरकार प्रयोगोऽप्यस्ति। देवदत्ता३ अ। शूद्रे तु न। आयुष्मान् भव मौर्य। 'स्त्रियामपि नेति वाच्यम्' (वा.) आयुष्मती भव गार्गि। स्त्रिया[2] अभिवादनाभावात् प्रत्यभिवादाभाव इति केचित्। अभिवादनवा- क्यगतनामगोत्रयोर्विषयत्वमेव दृ[illegible]। नाम्न उक्तम्। गोत्रस्य तु आयुष्मान् भवगार्ग्या ३। देवदत्तायुष्मान्। 'भोराजन्यविशां वा वाच्यः' (वा.)। भोशब्दस्य राजन्यवैश्यवाचिनां च वाक्यान्तत्वे वा स्यात्। आयुष्मान भव देवदत्त भोः ३। आयुष्मान् भव देवदत्त भोः। आयुष्मान् भवार्जुना ३।

---

1 भूहरह — क; 2 स्त्रिया न ।[illegible]- क

आयुष्मान् भवार्जुन। आयुष्मान् भव धनदत्ता ३। आयुष्मान् भव धनदत्त।

अविनीते तु नैव स्यात् प्लुतः प्रत्यभिवादने।
तत्र प्रत्यभिवादस्यैवाभाव इति भाष्यकृत्॥

॥ ओमभ्यादाने ॥ ८-२-८७ ॥

आरम्भे प्रणवस्य प्लुतः स्यात्। ओं३ अग्निमीले।

॥ ये यज्ञकर्मणि ॥ ८-२-८८ ॥

ये यजामहे इत्यादौ ये इत्यस्य यज्ञकर्मणि प्लुतः स्यात्। ये ३ यजामहे।

॥ प्रणवष्टेः ॥ ८-२-८९ ॥

यज्ञे पुरोनुवाक्यादीनामन्त्यस्य टेः प्लुतरूपः प्रणव आदेशः स्यात्। अपां रेतांसि जिन्वतो ३ म्। अयं च प्रणवः कौषीतकानां क्वचिदोकारः अन्येषामोंकारः।

॥ याज्यान्तः ॥ ८-२-९० ॥

याज्यानामन्तष्टिः प्लवते। जिह्वामग्ने चकृषे हव्यवाहां ३ वौ। अन्तग्रहणमृङ्मध्यवाक्यान्त्यस्याभावार्थः।

॥ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥ ८-२-९१ ॥

यज्ञे एषामादेरचः प्लुतः स्यात्। अग्नयेऽनुब्रू ३ हि। अग्नये प्रे ३ ष्य। अस्तु श्रौ ३ षट्। जिह्वामग्ने चकृषे हव्यवाहां ३ वौ ३ षट्। जिह्वामग्ने चकृषे हव्यवाहां ३ वौ३षट्। वौषट् शब्दस्योपलक्षणत्वाद् वषट् शब्दमते तस्यापि स्यात्। अग्निमा ३ वह। आवह देवानित्यादौ छन्दसि सर्वस्य विकल्पितत्वान्न प्लुतः।

।। अग्नीत्प्रेषणे परस्य च ।। ८ - २ - ९२ ।।

ओ श्रावयेत्याग्नीध्रं प्रति प्रेषणे आदेः ततः परस्य च प्लुतः स्यात्। ओ ३ श्रा ३ वय।

।। विचार्यमाणानाम् ।। ८ - २ - ९७ ।।

विचार्यमाणार्थानां छन्दसि टेः प्लुतः स्यात्। सणकारं ब्रवाणी ३ः अणकारां ३ इति।

।। अनुदात्तं प्रश्नान्ताभिपूजितयोः ।। ८ - २ - १०० ।।

प्रश्नवाक्यस्यान्ते अभिपूजिते च प्लुतस्यानुदात्तत्वं स्यात्। अग्ना ३ आगम ३ः। **'अनन्त्यस्यापि प्रश्नाख्यानयोः'** (८ - २ - १०५) इति प्रश्ने सर्वपदटीनां स्वरितः प्लुत उक्तः। तस्यान्त्यस्यानुदात्तत्वमुच्यते। तस्य स्वरितत्वमपि वेति वाच्यम्। अभिपूजिते-शोभनोऽसि विप्रा ३। अत्र **'दूराद्धूते च'** (८ - २ - ८४) इति प्लुत इति हरः। तस्यानुदात्तत्वमात्रमनेनोच्यते।

।। उपरिस्विदासीदिति च ।। ८ - २ - १०२ ।।

अत्रविचार्यमाणतया प्राप्तस्य प्लुतस्यानुदात्तत्वमुच्यते। उपरिस्विदासी३त् ।पूर्वत्र अधःस्विदित्यत्र **'विचार्यमाणानाम्** (८ - २ - ९७) इत्युदात्तः प्लुतः।

।। एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ।। ८ - २ - १०७ ।।

दुराद्धूतवर्जिते प्लुते अप्रगृह्यस्य एचः पूर्वस्यार्धस्य प्लुत आत् उत्तरार्धस्य तु इदुतौ स्तः। प्रत्यभिवाद याज्यान्तविचार्यमाण प्रश्नाभिपूजितेष्वेवेष्यते। प्रत्यभिवादे - आयुष्मान् भव हर ३ इ। विष्णा ३ उ। स्तोमैर्विधेमाग्नया ३ इ वौ ३ षट्। होतव्यं दीक्षितस्य गृहा ३ इ। न होतव्या ३ म्। प्रश्नान्ताभिपूजितयोस्तु स्वरभागे वक्ष्यते। आगमाः सखा ३ इ। भद्रोऽसि सखा ३ इ। भद्रोऽसि पटा ३ उ। एष्वातः

प्लुतोक्त स्वरभेदो ज्ञेयः। इदुतोस्तूदात्त एव। पदान्तस्व एवेष्यते। तेनायुष्मान् भव गौरित्यत्र विसर्गस्यैवान्त्यत्वान्न।

॥ तयोर्य्वावचि संहितायाम् ॥ (८ - २ - १०८)

तयोरिदुतोरचि परे संहितायाँ क्रमाद् यकारवकारौ स्तः। आयुष्मान् भव हरा ३ यित्याह। पटा ३ वित्याह। इत्याद्यूह्यम्॥ अकारप्रयोगेऽपि। आयुष्मान् भव हरा ३ य। विष्णा ३ व। अयं प्लुतविकारः 'छे च' (६ - १ - ७३) इति तुकि सिद्धो वाच्यः। अस्य प्राभवन् ध्वजा ३ इच्छते नु इत्यूह्यम्। अत्र ह्रस्वान्नित्यं तुक्। असिद्धत्वे तु पदान्ताद् दीर्घाद्वा तुक् स्यात्। अयं प्लुतविकारो यथार्हं लोकेऽपि स्यात्। आमन्त्रिते च छन्दसि प्लुतविकारोऽयं वाच्यः। अग्ना ३ इ पत्नी ३ वा ३ः।

॥ मतुवसो रु संबुद्धौ छन्दसि ॥ ८ - ३ - १ ॥

मत्वन्तस्य वस्वन्तस्य च पदस्य संबुद्धौ रुः स्यात्। मरुत्वन् त् इत्यत्र संयोगान्तलोपे कृते नस्य रुत्वम्। इन्द्र मरुत्वः। हरिवो मेदिनं त्वा। अत्र संयोगान्तलोपस्यासिद्धत्वेन हश्परत्वाभावे प्राप्ते **'संयोगान्तलोपो रुत्वे सिद्धो वाच्यः'** इति **'हशि च'** (६ - १ - ११४) इत्युत्वम्। वसोः- मीढ्वस्तोकाय। 'वन **उपसंख्यानम्**' (वा.) वसुना प्रातरित्वः।

॥ उभयथर्क्षु ॥ ८ - ३ - ८ ॥

अम्परे छवि परे नान्तस्य पदस्य ऋक्षु रुर्वा नकारो वेत्युभयथा स्यात्। ताँस्त्रायस्व। (तान्त्रायस्व)।

॥ दीर्घादटि समानपादे ॥ ८ - ३ - ९ ॥

दीर्घात् परस्य नस्य ऋक्ष्वेकपादस्थेऽटि परे रुः स्यात्।

॥ आतोऽटि नित्यम् ॥ ८ - ३ -३ ॥

अटि परे रोः पूर्वस्यातो नित्यमनुनासिकादेशः स्यात्। महाँ इन्द्रो यः। अत्र रोर्यत्वे लोपः। अत्र तैत्तिरीयाणामनुस्वारोक्तिः

([1]छान्दसव्य (त्व ? त्य) याद् द्रष्टव्यः । ?) ईकारादेस्तु **'दीर्घादटि—'** (८ - ३ - ९) इति रुत्वे **'अत्रानुनासिकः —'** (८ - ३ - २) इत्यनुनासिकः । उदधीँ रिव । उभयथेत्यनुवृत्तेः क्वचिन्न । पितृऋनचोदयः । मित्रो जनान् यातयति । समानपाद इत्युक्तेः अर्चिषा यातुधानानुपस्पृशेत्यादौ न । हन्त देवाँ ईळामहा [2]इड्यां आज्येनेत्यत्र तु पदान्तत्वेऽपि छान्दसत्वात् स्यात् ।

।। नॄन् पे ।। ८ - ३ - १० ।।

नॄनित्यस्य पकारे परे रुः स्यात् । नॄँ[3] पाहि। शृणुधि नॄँ प्रीणीहि । **'अत्रानुनासिकः —'** (८ - ३ - २) इत्यनुनासिकः । उभयथेत्यनुवृत्तौ नॄन् पाहीत्यपि क्वचित् । नॄँः पाहीति लोकेऽपि दृष्टो **वासुदेवविजये ।**

।। स्वतवान् पायौ ।। ८ - ३ - ११ ।।

स्वतवाँः पायुरग्ने ।

।। उञि च पदे ।। ८ - ३ - २१ ।।

पदरूप उञि परे अवर्णपूर्वयोः पदान्तयोर्व्योः नित्यं लोपः स्यात् । उभा उ नूनम् । अन्तेतवा उ । अत्रावायादेशयोः **'लोपः शाकल्यस्य'** (८ - ३ - १९) इति व्यलोपविकल्पे प्राप्ते नित्यमुक्तिः ।

।। मय उञो वो वा ।। ८ - ३ - ३३ ।।

मयः परस्य उञो वा वत्वं स्यात् । शम्वस्तु वेदिः । अस्य वत्वास्यासिद्धया न **'मोऽनुस्वारः'** (८ - ३ – २३) । वत्वाभावे **'निपात एकाजनाङ्'** (१ - १ - १४) । इति प्रगृह्यत्वादसन्धिरूह्यः । उञो लोके प्रयोगाभावादनयोः छान्दसत्वम् ।

---

1 'छन्दस्यस्य व्य(त्व? त्य) यो द्रष्टव्यः' - क । 2 'रेड्या' क ।
3 'नॄँ प्रीणीहि । अत्रा' - क ।

॥ छन्दसि वाप्राम्रेडितयोः ॥ ८ - ३ - ४९ ॥

विसर्गस्य कुप्वोः परयोर्वा सत्वं स्यात् प्रशब्दे आम्रेडिते च परे न । विश्वतस्पात् । इन्द्रः किल । स नः पावका । प्रशब्दे तु न । अग्निः प्रापन्मित्रोत । आम्रेडितेऽपि न । पूर्वः पूर्वो यजमानः । परुष्परुरिति तु कस्कादौ ज्ञेयः ।

॥ कःकरत्करति कृधिकृतेष्वनदितेः ॥ ८ - ३ - ५० ॥

करादिषु परेषु आदितेरन्यस्य विसर्गस्य सः स्यात् । सस्रुतस्कः । करदिति कृञो लुङि 'मन्त्रे घस-' (२ - ४ - ८०) इत्यादिना च्लेर्लुक् । तिपि गुणे हल्ङ्यादिलोपः । 'बहुलं छन्दसि –' (६ - ४ - ७५) इत्यड-भावः करदिति । कृमृदृरुहिभ्यश्छन्दसि (३ - १ - ५९) इत्यङ । को मृळाति कतमो नो मयस्करत् मयस्करन् परतरे इति च दृष्टम् । व्यत्ययाच्छपि सुवेशसस्करति, शं नः करति इति छान्दसत्वात् । 'श्रुशृणु- (६ - ४ - १०२) इति धिः । उरुणस्कृधि । सोमं न चारु मघवत्सु[1] नस्कृतम् । अदितेस्तु न । अदितिः करत् । सकारधकारककशब्देषु कृधेः परेषु तैत्तिरिये सत्वं नेति हरदत्तः ।ता[2]न्म आ[3]मनसः कृधि स्वाहा । उरूक्षयाय नः कृधि घृतं मन्या[4]से । शञ्चनः कृधि क्रत्वे ।

॥ पञ्चम्याः परावध्यर्थे ॥ ८ - ३ - ५१ ॥

उपरिभावरूपोऽधेरर्थः । तद्वाचिनि परौ परे पञ्चम्या विसर्गस्य सः स्यात् । दिवस्परि प्रथमम् ।

॥ *षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ८ - ३ - ५३

एषु परेषु षष्ठीविसर्गस्य सः स्यात् । वाचस्पतिं विश्वकर्माणम् । लोके तु 'तत्पुरुषे कृति बहुलम्' (६ - ३ - १४) इति अलुकि छान्दसाः ।

1 'स्सु' - क; 2 'तन्म' – क;
3 'आन्म' – क; 4 'मन्यासै' - क ;
* 'पातौ च बहुलम्' ॥ (८ - ३ - ५२) इति सूत्रं न व्याख्यातम् ।

क्वचिल्लोकेऽपि स्युरिति सिद्धिः। पारस्करादि सुड्वा। दिवस्पुत्राय। दिवस्पृष्ठम्। भन्दमान तमसस्पारे। अस्य इळस्पदे समिध्यसे। दिवस्पयो दिधिषाणाः। रायस्पोषमौद्भिदम्।

॥ इडाया वा ॥ ८ - ३ - ५४ ॥

पत्यादिषु परेषु इडायाः षष्ठ्या वासः स्यात्। इडायास्पतिः इडायाः पतिरित्यादि। इडायास्पदे अधि।

॥ युष्मत्तत्ततक्षुःष्वन्तःपादम् ॥ ८ - ३ - १०३ ॥

तकारादौ युष्मदि तच्छब्दे ततक्षुः शब्दे च परे पादमध्यगतस्य इणः परस्य सस्य षत्वं स्यात्। छान्दसपाद एवाह भोजः। अभिष्ट्वमभिः। सोमगीर्भिष्ट्वा। विदुष्टे अस्य। अप्स्वग्ने सधिष्टव। अग्निष्टद्विश्वम्। यतो द्यावापृथिवी निष्टतक्षुः। पादान्ते तु न। यन्म आ[1]त्मनो निन्दाभूदग्निस्तत्।

॥ यजुष्येकेषाम् ॥ ८ - ३ - १०४ ॥

उक्तेषु परेषु ग्रन्थरूपे यजुषि षत्वं वा स्यात्। चक्षुस्त आप्यायताम्।

॥ स्तुतस्तोमयोश्छन्दसि ॥ ८ - ३ - १०५ ॥

पूर्वयोरर्थाच्छन्दोविषयत्वम्; इदानीं कण्ठोक्तिः। सुष्टुत इन्द्र। यदि स्तुतस्यमरुतः। गोष्ठोमम्। गोस्तोमम्।

॥ पूर्वपदात् ॥ ८ - ३ - १०६ ॥

प्राच्यपदात् परस्य सस्य वेदे वा षः स्यात्। निष्षोमदभ्यो धमयो निष्षधस्तात्। बर्हिस्सीद।

॥ सुञः ॥ ८ - ३ - १०७ ॥

सुञिति निपातस्य पूर्वपदादिणः षः स्यात्। अभीषुणः। 'इकः सुञि' (६ - ३ - १३४) इति दीर्घः।

---

1 'त्मनिन्दा' - क।

।। सनोतेरनः ।। ८ - ३ - १०८ ।।

नकाररहितस्यैव सनोतेरुक्तषो भवेत्। अग्निः सनोतीत्यादौ न गोषा इन्दो नृषा भवेत् ।। गोषणि पितुषर्णिरित्यादि दृश्यते ।

।। सहेः पृतनर्ताभ्यां च ।। ८ - ३ - १०९ ।।

आभ्यां परस्य सहेः षः स्यात्। पृतनाषाट् सुवीरः। ऋताषा-ड्तधामा। **'अन्येषामपि—'** (६ - ३ - १३७) इति दीर्घः। चकारादृती (षा ? ष) हम्। अस्य ।। **'नहिवृति—'** (६ - ३ - ११६) इति दीर्घः। स च दीर्घः संहितायामेवेत्यवग्रहे न। ऋतिसहम्]।

।। नरपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ।। ८ - ३ - ११० ।।

रपरस्य सकारस्य न षः पूर्वपदादिति ।
तथा सृपादिधातूनां सवनादिगणस्य च ।।

अभिस्रवधन्वा पूयमानः । पुरा क्रूरस्य विसृपो विरप्शिन् । अपां विसर्गे यत् । अनुस्पृश धृषता शोशुचानः । निस्पृहः । सवनेसवने । सुते सुते । सवनमुखे सवनमुखे । इत्यादि ।

।। निव्यभिभ्योऽड्व्यवाये वा छन्दसि ।। ८ - ३ - ११९ ।।

एभ्यः परस्याड्व्यवाये, प्राप्तं षत्वं वा न स्यात् । होता न्यसीदत् । पिता नः । संवरणाद्व्यास्थत् । न्यषीदत् । व्यष्ठादित्यत्यन्वेष्यम् ।

।। छन्दस्यृदवग्रहात् ।। ८ - ४ - २६ ।।

पूर्वपदान्तरेनावग्रहयोग्यादृकारात् परस्य नस्य संहितायां णः स्यात्। नृमणा वीरपस्त्यः पन्थामनुप्रविद्वान्। पितृयाणम्। संहितायामित्युक्तेरवग्रह काले एव न। नृमना पितृयानम् ।

॥ नश्च धातुस्थोरुषुभ्यः ॥ ८ - ४ - २७ ॥

धातुस्थनिमित्ताद् उरुषुभ्यां च परस्य नसो णः स्यात् । अग्ने रक्षाणः । उरु णस् कृद् । उरुणः । अभीषुणः सखीनाम् । **'उपसर्गाद् बहुलम्'** (८ - ४ – २८) इति नासिकादेशस्य अस्मदादेशस्य च नसो नस्य णत्वं स्यात् । तत्र नासिकादेशस्योक्तम् । प्रणो देवी सरस्वती । बहुलोक्तेः प्र नो मुञ्चतम् । क्षुभ्नादिषु पाठात् तृप्नोतीत्यस्य णत्वं न । **'शात्'** (८ - ४ - ४४) श्चुत्वनिषेधस्य छान्दसात् विकल्पात् तैत्तिरीयाणामश्नाती-त्यादि ।

'चयोद्वितीयाः शरि पौष्करसादेः' (वा. ८ - ४ - ४८)

तस्य मते शरि परे चयो वर्गद्वितीया वाच्याः । विरफ्शित् । कख्षीरेण । स्नातम् अप्फ्सा जारम् । वत्थ्सो वा मधुमद्वचः । मता-न्तरेण पदान्तस्य द्वितीयो बह्वृचानां न । अप्सु । तत् सवितुः ।

॥ अणोऽप्रगृह्यस्यानुनासिकः ॥ ८ - ४ - ५७ ॥

अप्रगृह्यस्याणोऽवसाने वानुनासिकः स्यात् । दधि । दधिँ । म[1]धु । मधुँभिरि व विन्दती ३ ॥ (?)

॥ 'उदः स्थास्तम्भोः पूर्वस्य' ॥ ८ - ४ - ६२ ॥

इत्यत्र उदस्कन्दश्छन्दस्युपसंख्यानम्' (वा.) । अग्ने दूरमुत्कन्द । **'रोगे चेति वाच्यम्'** (वा.) । उत्कन्दो नाम रोगः । कन्देरप्येतत् सिद्धम् ।

[लेट् प्रक्रिया]

॥ घोर्लोपो लेटि वा । ७ - ३ - ७० ॥

लेटि घोरन्त्यलोपः स्याद् दधद्रत्नानि दाशुषे । दाशुषेऽग्निर्हि रत्नानि दध्यादिति किलोच्यते ।

---

1 मधुँ मधुभिरिवविन्दती ३ – क;

'इतश्च लोपः–' (३ - ४ - ९७) । लेटोऽट्-' (३ -४ -९४)

'सिब् बहुलं लेटि' (वा. ३ - ४ - ९४) लेटि(सि)प् बहुलं सिच् स्यात्। इट् मन्दिषत् पताति ।

।। लिङर्थे लेट् ।। ३ - ४ - ७ ।।

विध्यादौ लिङर्थे वा लेट् स्यात्। पताति दिद्युत् । पतेदित्यर्थः ।

।। उपसंवादाशङ्कयोश्च ।। ३ - ४ - ८ ।।

कर्तव्यस्य प्रतिक्रियावचने ऊहे च नित्यं लेट् स्यात्। त्रिपुरविजयाय देवैः प्रार्थितस्य रुद्रस्य वाक् — अहमेव पशूनामीशै । आशङ्कायांनेज्जिह्मायन्तो नरकं पताम। जिह्माचरणेन नरकपातः शङ्क्यते ।

।। लेटोऽडाटौ ।। ३ - ४ - ९४ ।।

लेडादेशानां विकल्पादडाटावागमौ स्तः । इडो यजति । बर्हियजति यजेदित्यर्थः। आट् - पताति दिद्युत् ।

।। आत ऐ ।। ३ - ४ - ९५ ।।

लेड आतामाथामोरात एत ऐत्वं स्यात् । मध्ये दिवस्वधया मादयैते । सुतेभिः सुप्रयसा मादयै(ते ? थे) ।

।। वैतोऽन्यत्र ।। ३ - ४ - ९६ ।।

आतामाथामोरैत्वादन्यत्र सर्वत्रापि एत ऐत्वं वा स्यात्। अहमेव पशूनामीशै। वेत्युक्तेः दक्षं दधस उत्तरम्। शपः श्लुः। अट्। **'घोर्लोपो लेटि'** (७ - ३ - ७०) इत्याल्लोपः। दधसे। अन्यत्रेत्युक्तेः मादयैते इत्यादिषु एत ऐत्वं न।

।। इतश्च लोपः परस्मैपदेषु ।। ३ - ४ - ९७ ।।

लेटः परस्मैपदेषु इतो लोपो वा स्यात्। यद्वां रथो विभिष्पतात्। पताति दिद्युत् ।

॥ स उत्तमस्य ॥ ३-४-९८ ॥

लेट उत्तमपुरुषसकारस्य वा लोपः स्यात्। करवाव। करवाम। क्वचिन्न। करवावः। करवामः।

[स्वरप्रक्रिया]

एकोदात्तं पदं विद्यादेकं स्वा[1]रमथापरम्
कानिचित् तु द्व्युदात्तानि तच्छिष्टं निहतं स्मृतम् ॥
द्व्युदात्तानां समासे तु त्र्युदात्तत्वं च दृश्यते।
सर्वानुदात्त एवान्यत् पदमे[2]वंविधं स्मृतम् ॥
उदात्तान्निहतः स्वार्यः स्वारोदात्तौ न चेत्परौ।
स्वरितो यस्तथाभूतो ज्ञेयः स प्राकृतस्त्विति।
प्रा(प्र ?)चयत्वं नयेत् स्वारादनुदात्ता बहूनपि।
स्वरितोदात्तयोः पूर्वः प्रचयस्तु निहन्यते ॥
ए (र) कादिष्टमुदात्तेन तं तमेव नयेत् स्वरम्।
पदादौ निहते त्वत्र स्वरितः स्याद् विभाषया ॥
यवादिष्टमुदात्तात्तु स्वरितादपि वा पुनः।
निहतः स्वरिती कार्यः प्राकृतात् प्राकृतः स च ॥
अप्राकृतस्तु यः स्वारः स्वरितोदात्तपूर्वगः।
उदादायार्धमस्यैके शिष्टं निघ्नन्ति कम्पितम् ॥
स्वरितस्यैव पूर्वन्तमपरे तु मनीषिणः।
अभिस्वार्यैव पूर्वं तं नियच्छन्त्यपि कम्पितम् ॥
स्वरितोदात्त(न?) पूर्वं तमपरेऽपि च कम्पितम्।
पूर्वोत्तरं निहत्यार्धं मध्ये स्वार्यं पठन्ति च ॥

[3]अथ स्वराः।

लोकवेदविभागेन स्वरसूत्रेषु वर्णनात्
लोकेऽपि स्युरुदात्ताद्यास्तथाप्यत्राप्रयोगतः।

---

1 'स्वर' क; 2 'वं(चतु) र्विधम्' - क;
3 हरिः श्री गणपतये नमः। अविघ्नमस्तु। अथ; क पाठे।

छान्दसे खण्ड उच्यन्ते स्वराः सर्वेऽपि तत्र तु ।
संज्ञायाः पूर्वमुक्तत्वात् परिभाषादि कथ्यते ।

॥ अनुदात्तं पदमेकवर्जम् ॥ ६-१-१५८ ॥

एकमचं वर्जयित्वा पदमनुदात्तं स्यात् । धातोरन्त उदात्तः स्यादि-युक्ते स एवोदात्तः, अन्येऽनुदात्ताः । गोपायतं नः सुम[1]नस्यमानाः । अत्र **'सनाद्यन्ता धातव'** (३-१-३२) इति धातुसंज्ञायाम् आयस्यान्त उदात्ते सत्यन्येऽनुदात्ताः परिभाषात्वेऽप्यस्मिन् सूत्रे **'कार्यकालं संज्ञापरिभाषम्'** इति न्या[2]योऽत्र नास्तीति हरः

॥ स्वरः सतिशिष्टो बलीयानविकरणस्य ॥ (परि.)

यस्मिन् सति यः स्वरः शिष्यते स बलीयान् स्यात्, विकरणस्य स्वरस्तु न । यथा - कर्तव्यमित्यादौ धातुस्वरे स्थिते पुनर्विहितत्वात् प्रत्ययस्वरस्य बलवत्वम् ।

॥ विभक्तितन्निमित्तयोर्नञः ॥ (परि.)

विभक्तिस्वरात् तन्निमित्तस्वराच्च नञ् स्वरो बलवान् स्यात् । अतिस्रः । अचत्वारः । **'तिसृभ्यो जसः'** (६-१-१६६) इति जसः **'चतुरनडुहोरामुदात्तः'** (७-१-९८) इत्यामश्चोदात्तता तयोर्नञ् समासे कृते पुनर्विहितत्वेऽपि नञ् स्वरस्यैव बलवत्वम् ।

॥स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ (परि.)

यथा तन्त्वा समिद्भिरित्यत्र 'उदात्तादनुदात्तस्य' इति स्वरितविधौ नतवानामसद्भत्त्वादाकारस्यैव स्वरितत्वम् ।

इति स्वरपरिभाषा ॥

अथ संहितास्वरः[3]: ॥

अभि [3]अर्षत्, दिक्षु ऋध्नुवन्ति, विक्षु ऋञ्जसानः इत्यनयोः यणि कृते अभ्य् अर्षत् दिक्ष्व् ऋध्नुवन्ति विक्ष्व् ऋञ्जसानः इति स्थिते ।

---

1 'मस्य -ग 2 'यो ना' - ग 3 'रा': - ग ।
4 अर्ष विक्षु ऋञ्जसान ऋध्नुवन्ति इत्य - गः

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।। ८ - २ - ४ ।।

एतद्द्वयस्थानजाद् यणः परस्यानुदात्तस्य स्वरित आदेशः स्यात्। इत्यकारर्कारयोः स्वरितत्वम् । अभ्यर्ष(द्) बृहद्यशः ' दिक्ष्वृध्नुवन्ति। विक्ष्वृञ्जसानः ।

स्वरितस्थाद्यणः कंसल्वात्मा मे रमतामिति ।
अन्तोदात्तः कंसलूः स्यादात्मा त्वाद्यनुदात्तवान् ।।
तस्मिन्परे पुनः कार्ये कंसल्वीत्यस्य ङेर्यणि ।
उदात्तयण इत्यंशविहितस्वरितस्य तु ।।
असिद्धत्वे स्वरितयण् कथं स्यादिति चेदिह ।
यण् स्वरो यणि कर्तव्ये सिद्धो वाच्च इतीरणात् ।।
स्वरितस्यास्य सिद्धत्वादयं स्वरितयण् भवेत् । इति ।

देव औ इत्यत्र---

।। एकादेश उदात्तेनोदात्तः ।। ८ - २ - ५ ।।

अनुदात्तस्योदात्तेन सहैकादेश उदात्तः स्यात् । इत्युदात्तेन देवाकारेण सहानुदात्तस्य सुबौकारस्य 'वृद्धिरेचि (६ - १ - ८८) इत्येकादेश उदात्तः देवौ वर्धेते । उदात्तेनेत्युक्तेः पच अन्तीत्यत्र शबन्त्यकारयोर्द्वयोरनुदात्तत्वान्न । पचन्ति ते वृषभान ।

परिभाषात्वमप्यस्य व्याजहार हरः क्वचित् ।
तत्पक्षे त्वयमर्थः स्यादाद्गुणः स्यादितीरिते ।।
उदात्तः स्यादुदात्तानुदात्तयोस्त्वाद्गुणस्ततः ।
विधीयमाना एव स्युरेकादेशा उदात्तकाः ।।
एवं सति ह्ययाद्यर्थमेकादेशस्वरस्य यत् ।
सिद्धत्ववचनं तन्न कर्तव्यं स्यादिति स्थितम् ।।
ततश्च वृक्षे इदमित्यत्रैकादेशङेरयि ।
सिद्धत्वाद् वृक्ष इदमित्यकारे स्यादुदात्तता ।।
दिवि इव; दिवि ईयते ।

।। स्वरितो वानुदात्ते पदादौ ।। ८ - २ - ६ ।।

पदादावनुदात्ते परे उदात्तेन सहानुदा[1]त्तस्यैकादेश स्वरित उदात्तो वा स्यात् । दिवीव चक्षुः । दिवीयते पृथि[2]व्याम् । अनुदात्त इत्युक्तेः या[3]ना त्यत्रोच्चत्वान्न । तं त्वा ।

। उदात्तानुदात्तस्य स्वरितः ।। ८ - ४ - ६६ ।।

उदात्तात्परस्यानुदात्तस्य स्वरित आदेशः स्यात् । त त्वा समिद्भिः । अत्र नतवानां परत्वेऽपि तेषां 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्यसद्वत्वा दाकारस्यैव स्वरितः । **'उदात्तस्वरितयोर्यणः—'** (८ - २ - ४) इत्यत्र यण्स्वरो यणादेशे सिद्धो वाच्यः' इत्युक्तेरस्य स्वरितस्य यण् स्वरत्वाभा- वेनासिद्धत्वादत्यतिष्ठदित्यादौ स्वरितयणत्वं न । अत्र तकारयकारयोः **'स्वर विधौ व्यञ्जनम्—'** (परि.) इत्यसद्वत्वाद् **'उदात्तादनुदात्तस्य—'** (८ - ४ - ६६) इत्येव स्वरितः । [ततश्च **स्वरमञ्जर्यां** 'स्वरितस्थानजाद्यणः' इत्याह दध्यानयतीत्युक्तिर्युज्येत वा न वा ।।] इन्द्र इत् इषं स्वः । अत्र इकारयोरुदात्तत्वाद् **'अनुदात्तं पदमेकवर्जं'** (६ - १ - १५८) इत्यनुदात्त- योरकारयोः **'उदात्तादनुदात्तस्य—'** (८ - ४ - ६६) [4]स्वरिते प्राप्ते ।

।। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ।। ८ - ४ -६७ ।।

गार्ग्यादिन्याचार्यमते उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य स्वरितो न स्यात् । इति निषेधे कृते ।

।। उदात्तस्वरितपरस्य सन्नतरः ।। १ - २ - ४० ।।

एतद्द्वयपरस्यानुदात्तस्य सन्नतर आदेशः स्यात् । इत्यतिनीचोऽनुदात्तः इन्द्र इन्नः इषं स्वश्च ।

---

1 'त्तस्य स्वरितादेशः स्वरित' - ग

2 'पृथिव्यम्' - क । 3 'एते यर्चन्ति इत्य' - क; ग ।

4 इति स्वरिते - ग ।

॥ स्वरितात्संहितायामनुदात्तानाम् ॥ १ - २ - ३९ ॥

स्वरितात्परेषामनुदात्तानां प्रचय आदेशः स्यात् । अनुदात्तानामिति जातौ बहुवचनम् । तेन द्वयोरेकस्य च स्यात् । अग्ने पावक । अग्ने त्रातः । सदा [1]नः । अत्र उदात्तादनुदात्तस्येति स्वरितस्यासिद्धत्वेऽपि तस्यादितः-' (१ - २ - ३२) इत्यत आरभ्य नवसूत्राण्यसिद्धकाण्डे **'उदात्तादनुदात्तस्य स्वरितः'** (८ - ४ - ६६) इत्यस्मात् पराणि पठितव्यानीति **'देवब्रह्मणोः'**—(१ - २ - ३८) इत्यत्र ज्ञापितमिति हरोक्तेरेषां परत्वात् प्रचयः स्यादेव । संहितायामित्युक्तेः पदोक्तौ न । अग्ने पावक इत्यादि । इह संहिताग्रहणेन सर्वत्रपञ्चस्वरोक्तौ कालव्यवधानं नाश्रयणीयमिति ज्ञाप्यत इति हरः ।

इति संहितास्वरः ।

॥ अथ कृत्स्वरः ॥

तत्र कृञ् धातोस्तव्यप्रत्यये कृ तव्य ।

॥ धातोः ॥ ६ - १ - १६२ ॥

धातोरन्त उदात्तः । स्यात् । कृ तव्य । **स्वरविधौ व्यञ्जनम्** (परि.) इति रेफस्यासद्वत्वाद् गुणे कृतेऽपि स्थानिवत्वेनाकारस्यैवोदात्तत्वात् कर्॒त्तव्य ।

॥ आद्युदात्तश्च ॥ ३ - १ - ३ ॥

प्रत्ययः सर्व आद्युदात्तः स्यात् । इति तकारस्याप्युदात्तत्वम् । एवं द्वयोरुदात्तत्वप्राप्तौ **'अनुदात्तं पदमेकवर्जम्'** (६ - १ - १५८) इत्येकस्यैवोदात्तत्वे कार्ये **'स्वरः सतिशिष्टो बलीयान्'**(परि.)इति धातुस्वरे स्थिते विहितत्वेन प्रत्ययस्वरस्य बलवत्वात् तस्यैवोदात्तत्वम् । आद्यान्त्याकारयोस्त्वनुदात्तत्वमेव । कर्तव्य । **'उदात्तस्वरितपरस्य सन्नतरः'** (१ - २ - ४०) इत्याद्याकारस्यातिनीचत्वम् । **'उदात्तादनुदात्तस्य स्वरितः'** (८ - ४ - ६६) इत्यन्त्याकारस्य स्वरितत्वम् **'अनुदात्तं पदम्'** (६ - १ - १५८) इति परि

---

1 नुः - ग

भाषायाः कार्यकालप्रवृत्तित्वाभावेन तस्याः सन्नतरस्वरितविधेरसिद्धत्वात् पुनरनुदात्तत्वं न । कर्तव्य[1]: ।

।। अनुदात्तौ सुप्पितौ ।। ३ - १ - ४ ।।

सुपः पितश्च प्रत्यया अनुदात्ताः स्युः । क्यप् । गुहाहितं गुह्यम् । मूर्यो नो दिवः । 'वशिरण्योरब् वाच्यः' (वा. ३ - ३ - ५८) इत्यप् । रणं कृधिरणकृत् । एषु प्रत्ययानुदात्तत्वाद् धातोरुदात्तता*। **सुप्स्वरमुपरि वक्ष्यामः ।**

।। मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ।।३ - ३ - ९६ ।।

मन्त्र एभ्यः क्तिन उदात्तत्वं स्यात् । नित्वात् क्तिन्नन्तस्याद्युदात्तत्वे प्राप्ते उक्तिः । यया वृष्टिं सो[2]सदिष्टिः । पचता पक्तीः । इन्द्रं म[3]तिः । वित्तिः । भूतिरिधना घृतेन वर्धताम् । अग्न आयाहि वी[4]तये । रातिं भृगूणामुशिजम् । मन्त्रादन्यत्र नित्वादाद्युदात्तत्वमेव । सह वैनं भूतिं गमयति ।

।। ऊतियूतिजूतिसातिहेतिकीर्तयश्च ।। ३ - ३ - ९७ ।।

इत्येतेष्वपि क्तिन्नन्तस्यान्तोदात्तत्वं निपात्यते । ऊतिभि[5]स्तमिषणः । त्रितं जूती सपर्यत । महो वाजस्य सातौ । परिणो हेति रुद्रस्य । एवमितां सुते कीर्तिम् ।

।। व्रजयजोर्भावे क्यप् ।। ३ - ३ - ९८ ।।

।। संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ् भृञिणः ।। ३ - ३ - ९९ ।।

इत्यनयोरप्युच्चतानुवृत्तिः । व्रज्या समज्याइत्यादि । इति ।।

---

1 'व्यः । सुप्स्वरमुपरि वक्ष्यामः । अनु' - ग

* ता मन्त्रे । - ग;

2 'सास' - क; ग । 3 इन्द्रम्मितिः - क; 4 पीत - क;

5 भस्तमि - क; 'स्त्रमि' इत्यपि पाठान्तरम् - T.466

।। कर्षात्वतो घञोऽन्त उदात्तः ।। ६ - १ - १५९ ।।

शब्गतकृषेराकारवतश्च घञन्तस्यान्त उच्चः स्यात् । वक्ष्यमाणस्य **'ञ्नित्यादिर्नित्यम्' (६ - १ - १९७)** इत्यस्यापवादः । कर्षः । पाकः । दायः ।

।। उञ्छादीनां च ।। ६ - १ - १६० ।।

अत्र भोजः — **'उञ्छम्लेच्छजञ्*जजल्पभक्षमन्थ*देहरेखलेखभोजयुगानां च (स. ८ - ३ - १६)** । घञन्तानामप्येषामन्त उच्चः स्यात् जञ्जेत्यकुत्वं युगेत्यगुणश्चनिपातनात् । **'वेगवेदवेष्टबन्धानां करणे'** (स.क - ८-३-१७) **'हलश्च' (३ - ३ - १२१)** इति घञन्ता एते । वेदे । न वेदिं विविदुः । भावे त्वाद्युच्चाः यो वेदे नददाश । **'साम्बतापयोर्भावगर्हायाम्' (स-८-३-१८)** साम्बो भिक्षते । तापो धार्मिके राज्ञः । मात्रा सह याचनस्य धार्मिक-पीडायाश्च निन्द्यत्वाद्धात्वर्थगर्हा । साम्बे 'बहुव्रीहौ **प्रकृत्या पूर्वपदम्**(६ - २ - १) इत्यस्यापवादः । तापे आत्वत्त्वात् सिद्धे गर्हाभावे ञित्स्वरार्थः । **'वधव्यधजपाः' (स. ८ - ३ - १९)** । 'अबन्तानामेषां प्रत्ययस्यानुच्चत्वाद् धातुस्वरबाधयोक्तिः । ईशानोयवया वधम् । **'गरदरौ दूष्यश्वभ्रयोः (स. ८ - ३ - २०)** दूष्यं विषम् । अन्यत्रावन्तत्वादाद्युच्चौ । **'स्तुयुद्रुवः क्वावुपसृष्टाच्छन्दसि' (सः ८ - ३ - २१)** । तवता उपष्टुत् । सम्पदादिक्विपि संयु[1]त् अधयदेषान्नियुतः परिद्रुत् । एषामप्यव्यय पूर्वपदप्रकृतिस्वरापवादः । **'वर्तनि स्तोत्रे' (स. ८ - ३ - २२)** । स्तोत्रं साम । अन्यत्रान्यन्तत्वात् प्रत्ययस्वरः । ***'उत्तमशश्वत्तमौ' (स. - ८ -३ -२३)** । उत्तमं वरुणः । शश्वत्तमं बर्हिः । गणानुसारादकृदन्तस्याप्यत्रोक्तिः । इति ।

।।चितः । ६ - १ -१६३ ।।

चितोऽन्त उच्चः स्यात् । चिदवयवस्य संबन्धिनः समुदायस्यान्त उच्चः स्यात् । तृच् अविता जरितॄणाम् । अच् – देवं वहन्ति । नमः शङ्कराय च ।

---

* 'जज्ज' *f*-* न्थलेहदेहरेवलेखरभागयुगानां च' -स-क (८-३-१६) Madras

1 'युत् परिद्रुत्' - ग;

* उत्तरोत्तरशश्वत्तमाः – स- (Madras)

॥ तित्स्वरितम् ॥ ६ - १ - १८५ ॥

न यजुष्यकर्तव्यम् । चिकीर्ष्यम् । 'अनुदात्तंपदम्—' (६ - १ - १५८) इत्याद्ययोरनुच्चत्वे कृते द्वितीययोः **'उदात्तस्वरितपरस्य—'** (१ - २ - ४०) इत्यतिनीचत्वम् ।

॥ लिति[1] ॥ ६ - १ - १९३ ॥

स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति **हरः** । लिदन्ते पदे लितः प्रत्ययात् पूर्वोऽजुच्चः स्यात् । आसायकः । कारकः **'उदात्तादनुदात्तस्य—'** (८ - ४ - ६६) इति रेफेऽ(स्वा? का)रः (स्वरितः) । ककारे तु ।

॥ स्वरितात् संहितायामनुदात्तानाम् ॥ १ - २ - ३९ ॥

अनुदात्तानामिति जातौ बहुवचनम् । संहितायां स्व[3] (रा?रिता) त् परस्यानुच्चस्य प्रचयः स्यात् । अत्र (स्वार? स्वरित) स्य सिद्धत्वेऽपि **'तस्यादितः— (१ - २ - ३२)'** इत्यत आरभ्य नव सूत्राणि असिद्धकाण्डे **'उदात्तानुदात्तस्य स्वरितः'** (८ - ४ - ६६) इत्यस्मात् पराणि पठितव्यानीति **'देवब्रह्मणोः—'** (१ - २ - ३८) इत्यत्र सूत्रकृतैव ज्ञापितमिति **हरो-**क्तेरेषां परत्वात् प्रचयः स्यादेव । कारकः । 'संहितायाम्' इत्युक्ते: इमं मे गङ्गे यमुने इत्यादिषु पदोक्तौ न । इमं मे गङ्गे यमुने । इह संहिताग्रहणेन सर्वत्र पञ्चम्योक्तौ कालव्यवधानं नाश्रयणीयमिति ज्ञाप्यत इति हरः ॥

॥ आदिर्णमुल्यन्यतरस्याम् ॥ ६ - २ -१९४ ॥

णमुलन्ते आदिरुच्चो वा स्यात् । एकाज् धातुषु लित् स्वरस्यास्य चाभेदादनेकाजुदाहि्रयते । गोपायं गोपायं क्रीडति हरिः । एकत्र पूर्वखण्ड आद्युच्चः, अन्यत्र मध्योच्चः परखण्डस्तु ।

---

1 'लिति प्रत्ययात्' - ग; 2 'स्वरात्पर' - ग;

3 'स्वरस्यासिद्ध' - ग;

॥ अनुदात्तं च ॥ ८ - १ - ३ ॥

आम्रेडितमनुदात्तं स्यात् इति सर्वानुच्चः । एवं दिवे दिव इत्यादि-ष्वप्याम्रेडितस्य सर्वत्रानुच्चत्वमूह्यम् ।

॥ ञ्नित्यादिर्नित्यम् ॥ ६ - १ - १९७ ॥

ञिदन्ते नीदन्ते चादिर्नित्यमुच्चः स्यात् । घञ्-पोषमेव । तृन् - होतारं रत्नधातमम् ।

॥ अन्तश्च तवै युगपत् ॥ ६ - १ - २०० ॥

तवै प्रत्ययस्यान्त आदिश्च युगपदुच्चौ स्तः । परमां गन्तवा उ ।

॥ क्षयो निवासे ॥ ६ - १ - २०१ ॥

पुंसि संज्ञायां घान्तः क्षयो गृहे वाच्य आद्युच्चः स्यात । स्वे क्षये मघोनाम । अन्यत्र तु 'एरच्' (३ - ३ - ५६)

॥ जयः करणम् ॥ ६- १ - २०२ ॥

घान्तोऽयं करणेऽर्थ आद्युच्चः स्यात् । प्रजापतिं जयानिन्द्राय ।

॥ वृषादीनां च ॥ ६ – १ – २०३ ॥

आदिरुच्चः स्यात् । "वृषजनज्वरग्रहहयगय(मना?न[1]) य तयांश[2]व-दवेदसूदानाम्" (स. ८ - ३ - ८३) । आद्या(न्ता ? न्त्या) विगुपधकान्तौ । अन्ये पचाद्यजन्ताः । गयेति निपातनादेत्वम् । इण् - अयः । तायश्च यश्च हरोक्तौ । जनस्य गोपाः । ग्रहाः सोमस्य । हयो न विद्वान् । दिव्यो गयेन । रायो अंशः । 'गुहाराधाराकाराशान्तिमन्त्रकामयामकल्पपादवाहादी-।नाम्' (स. ८ - ३ - ८४) । गुहादि चतुष्कं भिदाद्यङन्तम् । शान्तिः क्तिजन्तः परे घञन्ताः । गुहाहितम् । आरांविभर्षि । अयसो न धाराम् । कारा अग्निः । शान्तिः । मन्त्रं वोचेम । अरं कामाय ' यामम् । येष्टा[3]: (?)

1 'नयायतय' - ग; 2 'शदववेद' - क; 3 येषु – क;

त्रयोऽस्य पादाः । 'शमरणौ संज्ञायां सम्मतौभावकर्मणोः' (वा. ६- १- २०३)। सम्मतावर्थे शमरणौ यथाक्रमं भावकर्मणोराद्युच्चाविति हरः । निपातनादजन्तौ[1] । शमस्य च शृङ्गिणः आकृतिगणोऽयम् ।

॥ निष्ठा च द्व्यजनात् ॥ ६ - १ - २०५ ॥

द्व्यज्निष्ठात्तं नाम्न्याद्युच्चं स्यात् । दत्तः, गुप्तः । आदेराकारत्वे तु प्रत्ययस्वरः । त्रातः ।

॥ शुष्कधृष्टौ ॥ ६ - १ - २०६ ॥

एतावनाम्न्यप्याद्युच्चौ ॥ अग्निर्न शुष्कम् । वनं धृष्टः ।

॥ आशितः कर्ता । ६ - १ - २०७ ॥

कर्त्रर्थमाशितपदमाद्युदात्तमुताशितम् ।
निपातनात् कर्तरि क्त उपधादीर्घता[2]प्यशेः ।

॥ रिक्ते विभाषा ॥ ६ - १ - २०८ ॥

अयमनाम्नि वाद्युच्चः । रिक्ता । रिक्तरः ।

॥ जुष्टार्पिते च छन्दसि ॥ ६ - १ - २०९ ॥

आद्युच्चे वा स्तः । जुष्टः जुष्टः । अर्पितः अर्पितः ।

॥ नित्यं मन्त्रे ॥ ६ - १ : २१० ॥

जुष्टशब्दो मन्त्रे नित्यमाद्युच्चः । जुष्टो मित्राय देवानाम् । अर्पिते तु पूर्वेण विकल्पः । अर्पितं पितॄणाम् । शङ्कवोऽर्पिताः ।

॥ यतोऽनावः ॥ ६ – १ - २१३ ॥

द्व्यचो यदन्तस्यादिर्नित्यमुच्चः स्यात्, नावस्तु न । आशय[3] आश्यानि । णिच्यचो यत् । अद्व्यचस्तु चिकीर्ष्यम् ।

1 'न्तौ आकृति, - ग; 2 'स्त्य' - इति पाठान्तरमपि क पाठे ।
3 'यन् आ' - क;

॥ ईडवन्दवृशंसदुहां ण्यतः ॥ ६-१-२१४ ॥

ण्यदन्तानामेषामादिरुच्चः स्यात्॥ ईड्यो नूतनैः ॥ हविर्हविषुवन्द्यः। विश्वा निवार्या[1] । इन्द्राय शंस्यम् । दोह्यम् ।

॥ विभाषा वेण्विन्धानयोः ॥ ६-१-२१५ ॥

अनयोरादिरुच्चो वा स्यात्। वेणुः। वेणुर्वैणवीभवति। २। इन्धानो अग्निः। अग्निमिन्धानो[2] नाम्नि मनसा।

॥ त्यागरागहासकुहश्वठक्रथानाम् ॥ ६-१-२१६ ॥

एषामादिरुच्चो वा स्यात्। त्रयो घञन्ताः। अन्येऽजन्ताः।

॥ उपोत्तमं रिति ॥ ६-१-२१७ ॥

रिदन्तस्योपान्त्यमुच्चं स्यात्। अन्तराहवनीयं च।

॥ गतिकारकोपपदात् कृत् ॥ ६-२-१३९ ॥

एभ्यः परं कृदन्तं तत्पुरुषे समासे प्रकृतिस्वरं स्यात्। ल्युट्-आवर्तनम्। निवर्तनं[3]। प्रत[4]रणम्। लित्स्वरः। पलाशशातनः। खल् ईषत्करः एवं कृतः प्रकृतिस्वरे प्राप्ते विधिः।

॥ गतिरनन्तरः ॥ ६-२-४९ ॥

कर्मार्थक्तान्ते परे गतिः प्राक्पदं प्रकृतिस्वरं स्यात्। सुकृतं सूमयन्धनुः। 'उपसर्गाश्चाभिवर्जम्' (स· ८-३-१९०) अभेरन्ये प्रादय आद्युच्चाः स्युः। इति सोरुच्चत्वम्। अनन्तर इत्युक्तेः समुद्धृत इत्यादावुद एवस्वरः।

॥ तादौ च निति कृत्यतौ ॥ ६-२-५० ॥

तुवर्जिते तादौ निति कृति परे गतिरनन्तरः प्रकृत्या स्यात्। प्रकर्ता। प्रकर्तुम्। भरथं तदनु प्रवोहम्। उपदेशमात्रे तादित्वार्थ कृद्ग्रहः। तेन प्रलपितेत्यादाविड्व्यवधानेऽपि स्यात्। तुनि तु आ[5]गन्तुः।

---

1 'वार्या' - क। 2 नो मनसा - ग;
3 नम्। लित्स्वरः ग। 4 'क' इत्यपि पाठान्तरं कपाठे।
5 'अगन्तुः'- क;

॥ तवै चान्तश्च युगपत् ॥ ६ - २ - ५१ ॥

तवै प्रत्ययस्यान्त उदात्तो गतिरन्तरः प्रकृत्येति द्वयं युगपत् स्यात्। अन्वेतवै ॥

॥ अतिङन्तोऽञ्चतौवप्रत्यये ॥ ६ - २ - ५२ ॥

अस्मिन् परेऽनिगन्तो गतिः प्रकृत्या स्यात्। अवाङ। प्राङेति। इगन्ते तु – प्रत्यङ देवानाम्। **'गतिकारक'** (६ - २ - १३१) इति कृत्प्रकृतिस्वरः ॥

॥ न्यधी च ॥ ६ - २ - ५३ ॥

अञ्चतावप्रत्यये परे प्रकृत्या स्तः। न्यङङुत्तानो व। अत्र **'उदात्तस्वरितयोर्यणः-'** (८ - २ - ४) इत्यञ्चत्यकारः स्वरितः अध्यङ। अत्रोदात्त यणभावाद् **'उदात्तानुदात्तस्य—'** (८ - ४ - ६६) इति स्वरितः। (**चौ** ६ - ३ - १३८)इति प्राक् पदान्तोदात्तत्वेऽपि गतिपूर्वत्वे त्वयं स्वर इष्टः। ता उ पराच आहुः।

॥ युक्ते च ॥ ६ - २ - ६६ ॥

उद्युक्तार्थे समासे प्राक्पदस्यादिरुदात्तः स्यात्। गोसंख्यः। गोसंख्याने समाहित इत्यर्थ।

॥ अणि नियुक्ते ॥ ६ - २ - ७५ ॥

अणन्ते परेऽधिकृतार्थे समासे प्राक्पदमाद्युदात्तं स्यात्। **'कर्मण्यण्'** (३ - २ - १) छत्रधारः। अधिकृतस्य तत्परत्वानियमाद् **'युक्ते—'** (६ - २ - ६६) इत्यनेनासिद्धिः।

॥ शिल्पिनि चाकृञः ॥ ६ - २ – ७६ ॥

शिल्प्यर्थे समासे कृञोऽन्यस्मिन्नणन्ते परे प्राक्पदमाद्युदात्तं स्यात्। तन्तुवायः। कृञस्तु - स्तुवन्तो ब्रह्मकाराः। कुम्भकारः।

॥ संज्ञायां च ॥ ६ - २ - ७७ ॥

अकृञ्यणन्ते परे नाम्नि प्राक्पदमाद्युदात्तं स्यात्। तन्तुवायः इत्यूर्णनाभिनाम।

॥ गोतन्तियवं पाले ॥ ६ - २ - ७८ ॥

पाले परे एतान्याद्युदात्तानि स्युः । गोपालः । तन्ति[1]र्वत्सबन्धनरज्जुः । तन्तिपालः । यवपालः ।

॥ णिनि ॥ ६ - २ - ७९ ॥

णिन्यन्ते परे प्राक्पदमाद्युदात्तं स्यात् । हरिसेवी ।

॥ उपमानं शब्दार्थप्रकृतावेव ॥ ६ - २ - ८० ॥

शब्दा[2]र्थधातोर्णिन्यन्ते पर एवोपमानं प्राक्पदमाद्युदात्तं [3]स्यात् । वीणानादी । 'कर्तर्युपमाने' (३ - २ - ७९) णिनिः । अशब्दार्थे कृत्स्वरः । गजगामी । प्रकृत्युक्तेरुपसर्गवशाच्छब्दार्थत्वे कोकिलाभिव्याहारीत्यत्र न ।

॥ युक्तारोह्यादयश्च ॥ ६ - २ - ८१ ॥

आद्युदात्ताः स्युः । युक्त आरोहिणि युक्तारोही । योधिवञ्चिनन्दिप्रहारिषु चागतः । चादारोहिणि । आगतारोही । आगतयोधी । आगतवञ्ची । आगतनन्दी । आगतप्रहारी । 'ञ्नि—' (६ - १ - १९७) इत्येव सिद्धेऽप्येते प्रागुत्तरपदनियमार्थाः । गणशेषः समासे वक्ष्यते ।

॥ दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ ६ - २ - ८२ ॥

दीर्घान्तानि तुषादीनि च प्राक्पदानि जे परे आद्युदात्तानि स्युः । कुटीजः । काशजः । इत्यादि ।

॥ अन्त्यात्पूर्वं बह्वचः ॥ ६ - २ - ८३ ॥

जे परे बह्वचः प्राक्पदस्यान्त्यात् पूर्वमुदात्तं स्यात् । आमलकीजः ।

॥ अन्तः ॥ ६ - २ - १४३ ॥

॥ थाथघञ्क्ताजबित्रकाणाम् ॥ ६ - २ - १४४ ॥

गतिकारकोपपदात् परेषां थाद्यन्तानामन्त उदात्तः स्यात् । सुनीथो घासः । 'हनि कुषि—' (उ. सू.) इत्यादि क्थन् । आवसथः ।

---

1 'न्तिपुसव' - क;

2 'र्थो धा' - क; 3 'स्यात् । गज' - क;

'उपसर्गे वसे': (उ·सू·) इत्यथ: । प्रभेद: । विशुष्क: । अच् - प्रक्षय: । प्रचय: । **'क्षयो निवासे'** (६ - १ - २०१) **'जय: करणम्'** (६ - १ - २०२) इत्यनयोरेव बाध: । अप् - प्रलव: । इत्र - प्रलवि'त्रम् । (क -) प्रवृष: । **'वृषादीनाम्—'** (६ - १ - २०३) इत्याद्युदात्त प्राप्त उक्ति: ।

।। कारकाद्दत्तश्रुतयोरेवाशिषि ।। ६ - २ - १४८ ।।

नाम्न्याशिषि द्योत्यायां कारकात्परयो: क्तान्तयोरनयोरेवान्त उदात्त: स्यात् । (देवा एनं देयासु:) देवदत्त: विष्णुरेनं श्रूयात् विष्णुश्रुत: । कारकस्वैवावधारणात् दत्तश्रुतयोस्त्वकारकादपि स्यात् । सुश्रुतम् । कारकाद् दत्तश्रुतयोराशिष्येवेति नियमस्यापीष्टत्वाद् देवदत्त इति शङ्खनाम्नि **'तृतीया कर्मणि'** (६ - २ - ४८) इति प्राक्पदप्रकृतिस्वर एव ।

।। अनो भावकर्मवचन: ।। ६ - २ - १५० ।।

।। भावार्थे कर्मार्थे चान् प्रत्ययान्तं कारकात्परमन्तोदात्तं स्यात् । जनैरनिलसेवनम् । **'कर्मणि च येन—'** (३ - ३ - ११६) इतिभावे ल्युट् राजभोजना: शालय: । बाहुलकात् कर्मणि ल्युट् ।

।। मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीता: ।। ।। ६ - २ - १५१ ।।

मन्क्तिन्नन्तं व्याख्यानादि शब्दा: याजकादय: क्रीतशब्दश्च परपदमन्तोदात्तं स्यात् । गोवर्त्म । हरिभक्ति: । हरिक्रियाव्याख्यानम् । हरिशयनम् । कृष्णासनम् । हरिस्थानम् । द्विजयाजक: । हरिपूजक: इत्यादिकृत्स्वरस्यापवाद: गोक्रीत: । **'तृतीयाकर्मणि—'** (६ - २ - ४८) इत्यस्य ।

।। इति कृत्स्वर: ।।

अथ तद्धितस्वर: ।।

तत्र विष्णोर्देवतार्थेऽणि वैष्णवम् । **'आद्युदात्तश्च'** (३ - १ - ३) इत्यण आद्युदात्तत्वे तस्याकारमात्रत्वेऽपि **'आद्यन्तवदेकस्मिन्'** (१ - १ - २१) इत्यादिवत् कार्यत्वादुदात्तत्वम् वैष्णवमसि विष्णवे त्वा । अन्तोदात्ता कुमुदात् कुमुदनडवेतसेभ्यो ड्मतुपि टिलोपे कृते-

---

1 'पि' - क;

॥ अनुदात्तस्य च यत्रोदात्तलोपः ॥ ६ - १ - १६१ ।

यस्मिन्ननुदात्ते परे उदात्तलोपः तस्योदात्तः स्यात् इति ङ्मतुप उदात्तत्वम् । कुमुद्वान् ॥

॥ समानोदरे शयित ओ चोदात्तः ॥ ४ - ४ - १०८ ॥

इत्योकारस्योदात्तत्वम् । समानोदर्यः । यति 'तित् स्वरितम्' (६ - १ - १८५) इत्यस्य बाधः ।

॥ उभादुदात्तो नित्यम् ॥ ५ - २ - ४४ ॥

इत्ययच आद्युदात्तत्वम् । उभयंश्रृणवच्च न[1]: ।

॥ चितः ॥ ६ - १ - १६३ ॥

[2]द्वयां अग्ने रथिनः । 'आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्' ॥ (२-४- ७०) कुण्डिनाः । "चितः सप्रकृतेरिति वाच्यम्" (वा. ६ - १-१६३) बहुपटुः । शनकैरिवेन्द्राय ।

॥ तद्धितस्य ॥ ६ - १ - १६४ ॥

चितस्तद्धितस्यान्त उदात्तः स्यात् । कौञ्जायनाः* । चफञि चित्वादेव सिद्धे परमपि ञित्स्वरं बाधितुमुक्तिः ।

॥ कितः ॥ ६ - १ - १६५ ॥

तद्धितस्यान्त उदात्तः स्यात् । नाडायनः । आक्षिकः ।

॥ ह्रस्वनुड्भ्यां मतुप् ॥ ६ - १ - १७६ ॥

ह्रस्वान्तान्तोदात्ताच्छन्दान्नुटश्च परो मतुबुदात्तः स्यात् । चरुरग्निवां इव । अग्निः निप्रत्ययान्तत्वादन्तोदात्तः । नुटः - अक्षण्वन्तः । 'छन्दस्यपि-

1 'नः पितः द्वयः अग्नेरथिनः' - क; 2 'द्वयो अ' - ग;

* गोत्रे कुञ्जादिभ्यश्च्फञ्'

दृश्यते' (७ - १ - ७६) इत्यनङ्।'अनो नुट्' (८ – २ - १६) अन्तोदात्तादित्युक्तेः ऋतुमाँ अनेनेत्यत्र न अक्षण्वन्त इत्यादौ ह्रस्वादित्येव सिद्धे नुड्ग्रहः स्वरविधौ व्यञ्जनमसद्वदित्येतदत्र नेति ज्ञापनार्थः । तेन मरुत्वाँ इन्द्रेत्यत्रान्तोदात्तत्वं न ।'रेशब्दान्मतुबुदात्तो वाच्यः' (वा. ६ - १ - १७६) रेवन्तं[1] हित्वा[2]। त्रेर्नेति वाच्यम्' (वा. ६ - १ - १७६)। त्रिवतीर्याज्यानुवाक्या भवन्ति । ह्रस्वत्वेऽपि प्रथमैकवचनेऽवर्णान्तत्वात् सावर्ण- (६ - १ - १८२) इति वक्ष्यमाणनिषेधेन सगृणानो अद्भिर्देववान् इत्यादौ मतुबुदात्तो न स्यात् । पितृमानहं भूयासम् इत्यादौ तु पितेति सावर्णान्तत्वेऽपि 'न गोश्वन्—' (६ - १ - १८२) इत्यत्र शुनो नलोपे 'सावर्णे' त्येव निषेधे सिद्धे श्वन्ग्रहादस्मिन् निषेधेऽपि न लोपोऽसिद्ध इति ज्ञापनान्मतुबुदात्त इति हरः

॥ तित्स्वरितम् ॥ ६ - १ - १९५ ॥

ललाट्[3]यम् ।

॥ ञ्नित्यादिर्नित्यम् ॥ ६ - १ - १९७ ॥

गार्ग्यः । वा*सुदेवकः । 'प्रत्ययलक्षणमत्र नेष्टम्' । गर्गाः । ञिजन्तस्यैव स्वरोक्तेस्तस्याङ्गकार्यत्वाभावाद् 'न लुमता—' (१ - १ - ६३) इत्यस्याप्रवृत्तेरत्र प्रत्ययलक्षणस्य प्रसक्तिः ।

॥ संज्ञायामुपमानम् ॥ ६ - १ - २०४ ॥

उपमानभूतस्यादिर्नाम्न्युदात्तः स्यात् । चञ्चा । इवे कनो लुप्[f] ।

॥ यतोऽनावः ॥ ६ - १ - २१३ ॥

गव्यम् । यव्यम् । दन्त्यम् । नावस्तु न (भ) वति । नाव्यम् ।

इति तद्धितस्वरः ।

---

1 'न त हि' - क; 2 त्वा श्रणोमि ? त्रे -' ग; 3 'ट्या' - ख; ग;
*वासुदेवार्जुनाभ्यां वुन्'। f 'लुम्मनुष्ये'।

अथ समासस्वरः ।

।। समासस्य ।। ६ - १ - २२३ ।।

अन्त उदात्तः स्यात् । अथिहरि । अत्राद्ययोरचोरनुदात्तत्वम् । उपान्त्यस्यातिनीचत्वं च ज्ञेयम् ।

अथ सर्वसमासेष्वेतत्प्राप्तावुक्तिः–

कूलतीरतूलमूलशालाक्षसममव्ययीभावे ।। ६ - २ - १२१ ।।

एतानि परपदान्यव्ययीभावे आद्युदात्तानि स्युः । उपकूलम् । परितीरम । परितूलम् । उपमूलम् । परिशालम् । उपाक्षम् । सुषमम् ।

।। परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेषु ।। ६ - २ - ३३ ।।

एते वर्ज्यमानवाचिनि अहोरात्रांशवाचिनि च परे प्रकृत्या स्युः । परिग्रामं सेना याति । प्रतिपूर्वाह्णम् । प्रतिपूर्वरात्रम् । उपपूर्वाह्णम् । उपापररात्रम् । अपग्रामम् । एषु प्राक् पदानि **उपसर्गा (श्चा) भिवर्जम्** **(स. क. ८ - ३ -१९०)** इत्याद्युदात्तानि ।

इत्यव्ययीभाव स्वरः ।

अथ तत्पुरुषस्वरः ।।

'समासस्य' (६ - १ - २२३) इत्यन्तोदात्तत्वम् 'सुरूपकरं अवान्तरदीक्षाया । **'इवेन नित्यसमासोविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च (वा. २ - १ - ४)** इत्यन्तोदात्तत्वापवादः प्राक् पदप्रकृतिस्वरः । इन्द्रस्येव वग्नुः ।

।। तत्पुरुषे तुल्या[1]र्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ।। ६ - २ - २ ।।

तुल्यार्थादि प्राक्पदं तत्पुरुषे प्रकृत्या स्यात् । तुल्यश्वेतः । तुल्यो **'यतोऽनावः' (६ - १ - २१३)** इत्याद्युदात्तः । सदृशश्वेतः । अत्र कृदुत्तर–

---

1 लार्थ - क;

पदप्रकृत्या ञित्स्वरः। **'कृत्य तुल्याख्या अजात्या'** (२ – १ - ६८) इति समासः। तृतीयान्ते शङ्कुलाखण्डः। कुङ्कुमशोणः। शङ्के रुलच्। सप्तम्यन्ते-पानशौण्डा। पाने ल्युट्। शस्त्रीश्यामा। '[1]ङीष्यन्तोदात्तः शस्त्री। मेघश्यामः। अचि मेघः। **'अव्यये नञ् कुनिपातानामिति वाच्यम्'** (वा. ६ - २ - २)। अब्राह्मणेश्वप्रक्तमयेत्ताम्। कुब्राह्मणः। अतिमायः। पुरोहितः। नञादे**'र्निपाता आद्युदात्ताः'** (फि. सू.) इतिस्वरः। नञादेरन्यत्र न। स्नात्वा कालकः। सा[2]मिकृतम्। द्वितीयान्ते - सर्वरात्रशोभनः। रा (त्रा' त्य) न्तादव्। कृत्ये पानीयशीतलम्। रित्युपान्त्यम्।

।। वर्णो वर्णेष्वनेते ।। ६ - २ - ३ ।।

तत्पुरुषे वर्णार्थं प्राक्पदं वर्णार्थे परे प्रकृत्या स्यात्। कृष्णकल्माषः। न[*]गन्तः कृष्णः। एते तु कृष्णैतः।

।। गाधलवणयोः प्रमाणे ।। ६ - २ - ४ ।।

प्रमाणार्थे तत्पुरुषेऽनयोः परयोः प्राक्पदं प्रकृत्या स्यात्। अरित्रगाधं जलम्। तत्प्रमाणम्। गोलवणम्। तद्देयप्रमाणम्। गमेर्डोसि गोशब्दः।

।। दायाद्यं दायादे ।। ६ - २ - ५ ।।

तत्पुरुषे दायादपदे परे दायाद्यार्थवाचि प्रकृत्या स्यात्। इह लक्षणया आदीयमाने दाये दायाद्यशब्द इति हरः। विद्यादायादः। अत्रोदात्तः क्यप्।

।। प्रतिबन्धि चिरकृच्छ्रयोः ।। ६ - २ - ६ ।।

प्र[3]तिबन्ध्यर्थे प्राक् पदं प्रकृत्या स्यात्। गमनचिरम्। गमनकृच्छ्रम्। विशेषणसमासे मयूरव्यंसकादित्वात् परनिपातः। अङ्गवैकल्यात् चिरकृच्छ्रत्वे गमनस्य प्रतिबन्धके।

---

1 'ङीपि' - ग; 2 'समि' - क;
* कृषेर्वर्णे इति नक्;
3 'अनयोः परयोः प्रतिबन्ध्यर्थे प्रा' - ग;

॥ पदेऽपदेशे ॥ ६ - २ - ७ ॥

व्याजार्थे पदे शब्दे परे प्राक्पदं प्रकृत्या स्यात्। क्रीडनपदेन यातः।

॥ निवाते वातत्राणे ॥ ६ - २ - ८ ॥

वातत्राणा[1]र्थे निवाते परे प्राक्पदं प्रकृत्या स्यात्। कुटीनिवातम्। कुटी ङीपन्तः।

॥ शारदेऽनार्तवे ॥ ६ - २ - ९ ॥

अनृतुसंबन्धे शारदपदे परे प्राक्पदं प्रकृत्या स्यात्। रज्जूशारदमुदकम्। रज्जुर्नित्स्वरः। शारदं प्रत्यग्रम्। रज्जूद्धृतत्वान्निर्मलमित्यर्थः।

॥ अध्वर्युकषाययोर्जातौ ॥ ६ - २ - १० ॥

अन्यो[2]र्जात्यर्थे तत्पुरुषे प्राक्पदं प्रकृत्या स्यात्। क[3]लापाध्वर्युः। 'कलापिनोऽण् (४ - ३ - २०८)। उमापुष्पकषायम। उमापुष्पे षष्ठीसमासः।

॥ सदृशप्रतिरुपयोः सादृश्ये ॥ ६ - २ - ११ ॥

अनयोः परयोः सादृश्यार्थे तत्पुरुषे प्राक्‌प्रकृत्या स्यात्। पितृसदृशः पितृप्रतिरुपः। पितान्तोदात्तः। अत्रसदृशस्य। 'पूर्वसदृश—' (२ - १ - ३१) इति तृतीयासमासे 'तत्पुरुषे तुल्यार्थतृतीया—' (६ - २ - २) प्रकृतिस्वरे सिद्धे षष्ठीसमासालुक्येव फलम्। चोरस्य[4] सदृशं कुलम्। चोरोऽन्तः।

॥ द्विगौ प्रमाणे ॥ ६ - २ - १२ ॥

तत्पुरुषे प्रमाणार्थे द्विगौ परपदे प्राक्पदं प्रकृत्या स्यात्। प्राच्यसप्तसमः। प्राच्ये 'यतोऽनावः' (६ - १ - २१३) (इत्याद्युदात्तः)।

---

1 'णेऽर्थे' - क; 2 योः परयोर्जात्य - ग;

3 कालापा - क; ग; 4 'स्य कु' - ग।

॥ गन्तव्यपण्यं वाणिजे ॥ ६ - २ - १३ ॥

वाणिजे परे गन्तव्यार्थं पण्यार्थं च प्राक्पदं प्रकृत्या स्यात् । मद्रवाणिजः । रगन्तेन मद्रेण सप्तमीरमासः । पण्ये गोवाणिजः ।

॥ मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥ ६ - २ - १४ ॥

क्लीबार्थतत्पुरुष एषु परेषु प्राक्पदं प्रकृत्या स्यात् । भिक्षामात्रं ददाति । भिक्षायास्तुल्यप्रमाणमिति षष्ठीसमासः । भिक्षेति गुरोरप्रत्यये । पाणिनोपज्ञम् । पाणिनोऽणन्तः । दर्शनीयोपक्रमम् । गृध्रच्छायम् । गृधेः [1]क्रन् ।

॥ सुखप्रिययोर्हिते ॥ ६ - २ - १५ ॥

अनयोः परयोर्हितार्थे तत्पुरुषे प्रक्पदं प्राकृत्या स्यात् । गमनसुखम् । गमनप्रियम् । सुखप्रिययोर्निमित्तभूतं गमनमेवमुच्यते । मयूरव्यंसकादित्वात् तयोः परत्वम । गमनस्योत्तरकालप्रीतिजनकत्वाद् हितार्थत्वम् ।

॥ प्रीतौ च ॥ ६ - २ - १६ ॥

प्रीतौ द्योत्यायां सुखप्रिययोः परयोः प्राक्पदं प्रकृत्या स्यात् । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । द्वौ प्रत्ययान्तोदात्तौ । सुखप्रिययोः प्रीत्यव्यभिचारित्वेऽपि प्रीतिग्रहोऽतिशयार्थः ।

॥ स्वं स्वामिनि ॥ ६ - २ - १७ ॥

अस्मिन् परे स्ववाचि प्राक्पदं प्रकृत्या स्यात् । गोस्वामी । एवं धनादिष्वप्यूह्यम् ।

॥ पत्यावैश्वर्ये ॥ ६ - २ - १८ ॥

ऐश्वर्यार्थे पत्यौ परे प्राक्पदं* प्रकृत्या स्यात् । गोपतिः ।

---

1 ऋधन् – क;

* एतदनन्तरं 'नञो गुणप्रतिषेधे (६ - २ - १५५) इत्यादि सूत्रस्य तद्धितार्थप्रवृत्तिनिमित्तमित्यन्तो भागः ग पाठे भ्रष्टः ।

॥ न भूवाक्चिद्दिधिषु ॥ ६-२-१९ ॥

ऐश्वर्यार्थे पत्यौ परे भ्वादयः प्रकृत्या न स्युः । भूपतिः । वाक्पतिः । दिधिषूपतिः । एषु समासस्वरः ।

॥ वा भुवनम् ॥ ६-२-२० ॥

एश्वर्यार्थे पत्यौ परे भुवनं वा प्रकृत्या स्यात् । भुवनपतिः भुवनपतिः । भुवने क्युन् ।

॥ आशङ्काबाधनेदीयस्सु सम्भावने ॥ ६-२-२१ ॥

एषु परेषु सम्भावनार्थतत्पुरुषे प्राक्पदं प्रकृत्या स्यात् । गमनशङ्कं वर्तते । गमनाबाधम् । गमननेदीयः । गमनमाशङ्क्यते, आबाध्यते, अन्तिकतरमिति च संभाव्यत इत्यर्थः ।

पूर्वे भूतपूर्वे ॥ ६-२-२२ ॥

पूर्वशब्देपरे भूतपूर्वार्थे तत्पुरुषे प्राक्पदं प्रकृत्या स्यात् दर्शनीयो भूतपूर्वो दर्शनीयपूर्वः ।

॥ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ॥ ६-२-२३ ॥

सामीप्यार्थेष्वेषु परेषु तत्पुरुषे प्राक्पदं प्रकृत्या स्यात् । व्रजसविधमित्यादि घान्तो व्रजः ।

॥ विस्पष्टादीनि गुणवचनेषु ॥ ६-२-२४ ॥

एतानि गुणवचनेषु परेषु प्रकृत्या स्युः । विस्पष्टविचित्रविचित्तव्यक्तसम्पन्नपटुपण्डितकुशलचपलनिपुणाः । विस्पष्टमधुरम् । विचित्रलवणम् । विस्पष्टो **'गतिरनन्तरः'** (६-२-४९) इत्याद्युदात्तः । विचित्रोऽव्ययस्वरेण । विचित्तो **'बहुव्रीहौ प्रकृत्या पूर्वपदम्'** (६-२-१) इत्याद्युदात्तः । व्यक्तः **'उदात्तस्वरितयोः—'** (८-२-४) इति स्वरितादिः । सम्पन्ननिपुणौ **'थाथा'**दिना (६-२-१४४) अन्तोदात्तौ । पटुः प्रत्ययस्वरेण । पण्डितचपलौ चित्स्वरेण । कुशलः कृत्स्वरेण ।

॥ श्रज्यावमकन्पापवत्सुभावे कर्मधारये ॥ ६ - २ - २५ ॥

एषु परेषु कर्मधारये भावार्थं प्राक्पदं प्रकृत्या स्यात् । गमनश्रेष्ठम् । वचनज्येष्ठम् । गमनावमम् । वचनकनिष्ठम् । गमनपापिष्ठम् । 'विन्मतोर्लुक्' (५ - ३ - ६५) मयूरव्यंसकादिः ।

॥ कुमारश्च ॥ ६ - २ - २६ ॥

एतत् प्राक्पदं प्रकृत्या स्यात् । कुमारश्रमणा । कुमारोऽजन्तः । 'कुमारः श्रमणादिभिः' (२ - १ - ७०) इति समासे एवेत्येके ।

॥ आदिः प्रत्येनसि ॥ ६ - २ - २७ ॥

कर्मधारयेऽस्मिन्परे कुमारस्यादिरुदात्तः स्यात् । कुमारप्रत्येनाः । प्रतिगतएनसा प्रतिगतमेनो वा यस्येति व्युत्पत्तिः ।

॥ पूगेष्वन्यतरस्याम् ॥ ६ - २ - २८ ॥

गणेषु परेषु कर्मधारये कुमारस्यादिरुदात्तो वास्यात् । कुमारशिबयः । पूगा*ञ् ञ्यस्य 'तद्राज—' (२ - ४ - ६२) इति लुक् ।

॥ इगन्तकालकपालभगालशरावेषु द्विगौ ॥ ६ - २ - २९ ॥

इगन्ते कालार्थे कपालादिषु च परेषु द्विगौ प्राक्पदं प्रकृत्या स्यात् । पञ्चारत्निः । दशमास्यः । 'द्विगोर्यप्' (५ - २ - ८२) पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । एषु संस्कृ(ते?ता) णोलुक् । पञ्चदण्डीत्यत्र तु नलोपस्यासिद्धत्वादयं स्वरो न ।

॥ बह्वन्यतरस्याम् ॥ ६ - २ - ३० ॥

बहुः प्राक्पदमिगन्तादौ परे द्विगौ वा प्रकृत्या स्यात् । बह्वरत्निः । बहुमास्यः । बहुकपालः । इत्यादि । कु/स्वरो बहौ । यणि (रु?उ) दात्तस्वरितयोः—' (८ - २ - ४) इति स्वरितः ।

---

* 'पूगाञ् ञ्योऽग्रामणी पूर्वात्' (५ - ३ - ११२) इति ञ्यस्य ।
ƒ 'लङ्घिबंह्योर्नलोपश्च' (उ. सुः ३०) इति कुप्रत्ययः ।

॥ दिष्टि वितस्त्योश्च ॥ ६ - २ - ३१ ॥

अनयोः परयोर्द्विगौ प्राक्पदं वा प्रकृत्या स्यात्। पञ्चदिष्टिः। पञ्चवितस्तिः। द्वे प्रमाणे।

॥ सप्तमीसिद्धशुष्कपक्वबन्धेष्वकालात् ॥ ६ - २ - ३२ ॥

सप्तम्यन्तं सिद्धादौ परे प्रकृत्या स्यात्, (तच्चेत्कालात्परं न भवति) साङ्काश्यसिद्धः। निधनशुष्कः। कुम्भीपक्वः। चक्रबन्धः।

॥ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ॥ ६ - २ - ३८ ॥

एषु परेषु महान् प्रकृत्या स्यात्। महानन्तोदात्तः। महाव्रीहिः। महापराह्णः। इत्यादि। 'सन्महत्' (२ - १ - ६१) इति समासः। षष्ठी समासे समासस्वरः। महद्व्रीहिः। 'कर्मधारयेऽनिष्ठा' (६ - २ - ४६) इति विधिः श्रेण्यादिष्वेवेति प्रवृद्धस्यात्र पाठः।

॥ क्षुल्लकश्च वैश्वदेवे ॥ ६ - २ - ३९ ॥

अस्मिन्परे क्षुल्लको महांश्च प्रकृत्या स्यात्। क्षुल्लकवैश्वदेवम्। क्षुल्लात् *कः। महावैश्वदेवम्।

॥ उष्ट्रः सादिवाम्योः ॥ ६ - २ - ४० ॥

अनयोः (उष्ट्रः प्रकृत्या स्यात्)। उष्ट्रे ष्ट्रन्। उष्ट्रसादिः। उष्ट्रवामिः। कर्मधारयः षष्ठीसमासो वा।

॥ गौः सादसादिसारथिषु ॥ ६ - २ - ४१ ॥

एषु परेषु गौः प्रकृत्या स्यात्। गोसादः। घञ् कर्मण्यण् वा। गोसादी। णिनिः। गोसारथिः।

---

* 'प्रागिवात् कः' (५ - ३ - ७०) इति कः।

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवतैतिलकद्रूः पण्यकम्बलोदासीभाराणां च ॥ ६-२-४२ ॥

द्वावविभक्तिकौ। पञ्चप्रथमान्ताः। एषां सप्तानां दासीभारादीनां च प्राक्पदं प्रकृत्या स्यात्। 'कुरुवृज्योर्गार्हपत इति वाच्यम्' (वा.) कुरुगार्हपतम् वृजिगार्हपतम्। /कुरौ (रुः?कुः) वृजौ इन्। रिक्तगुरुः। रिक्तो - 'विभाषा—' (६-१-२०८) प्राक्पदाद्युदात्तत्वम्। एतदादय कर्मधारयाः असूतजरती। अश्लीलदृढरूपा। श्लीलं श्रीमत्। नञ् स्वरेणाद्युदात्तौ। पारे बडवा। निपातनादिवार्थे समासो विभक्त्यलोपश्च। 'घृतादीनां च' (फि. २१) नञ् विषयत्वेऽप्यन्त उदात्तः स्यात् इति पारमन्तोदात्तम्। तैतिलकद्रूः। षष्ठीसमासः। तैतिलोऽणन्तः। पण्यकम्बलः। 'संज्ञायामिति वाच्यम्' (वा.)। 'यतोऽनाव' (६-१-१२३) स्वरः। दासीभारः। षष्ठीसमासः। दास्यामुदात्त[1]निवृत्तिस्वरः। "देवः सूतिहूतिजूतिषु"।

देवसूतिः। भद्रा देवहूतिर्नः। देवजूतिः। 'नीतौ वसुश्च'। (वा.) चाद् देवश्च। वसुनीतिः। देवनीतिः। वसुर्नित्स्वरः। आकृतिगणोऽयम्।

॥ चतुर्थी तदर्थे ॥ ६-२-४३ ॥

तदर्थवस्तुभिः समासे चतुर्थ्यन्तं प्राक्पदं प्रकृत्या स्यात्। कुण्डलहिरण्यम्। (*अ)लच्।

॥ अर्थे ॥ ६-२-४४ ॥

अस्मिन् परे चतुर्थ्यन्तं प्राक्पदं प्रकृत्या स्यात्। कृष्णार्थम्। देवतार्थम्।

॥ क्ते च ॥ ६-२-४५ ॥

क्तान्ते परे चतुर्थ्यन्तं प्राक्पदं प्रकृत्या स्यात्। गोहितम्। गोरक्षितम्।

---

1 'सं नि'क वार्तिकतया अयं न दृश्यते।

/ कृग्रोरुच्च (उ. १४)

* मृदिमण्डकुण्डिकन्दिभ्योऽलच्' (स)

॥ कर्मधारयेऽनिष्ठा ॥ ६ - २ - ४६ ॥

अत्र क्तान्ते परे निष्ठान्तादन्यत् प्राक्पदं प्रकृत्या स्यात्। श्रेणीकृतः। श्रेण्याद्युदात्तः। निष्ठान्ते तु कृताकृतम्।

॥ अहीने द्वितीया ॥ ६ - २ - ४७ ॥

अत्यक्तवाचिनि समासे क्तान्ते परे प्राक्पदं प्रकृत्या स्यात। कृष्णश्रितः। कालिन्दीपतितः। व्रजगतः। कालिन्द्यां ङीप्युदात्तनिवृत्तिस्वरः। हीने तु - दुःखातीतः। हीनपदमपनीय 'द्वितीयानुपसर्गे इति वाच्यम्। तेन सुखप्राप्त इत्यादौ न। 'अन्तः' (६ - २ - १४३) थाथ— (६ - २ - १४४) इत्यस्यापवादोऽयम्।

॥ तृतीया कर्मणि ॥ ६ - २ - ४८ ॥

कर्मार्थे क्तान्ते परे तृतीयान्तं प्राक्पदं प्रकृत्या स्यात्। दात्रलूनः।

॥ ईषदन्यतरस्याम् ॥ ६ - २ - ५४ ॥

एतत् प्राकपदं वा प्रकृत्या स्यात्। ईषत्कडारः। ईषत्कडारः। ईषदन्तोदात्तः।

॥ हिरण्यपरिमाणं धने ॥ ६ - २ - ५५ ॥

स्वर्णपरिमाणार्थं प्राक्पदं धने परे प्रकृत्या वा स्यात्। द्विसुवर्णधनम्। द्विसुवर्णधनम्। द्विसुवर्णपरिमाणं द्विसुवर्णम्। तत्र कर्मधारयः। बहुव्रीहिर्वा।

॥ प्रथमोऽचिरोपसम्पत्तौ ॥ ६ - २ - ५६ ॥

अभिनवत्वे द्योत्ये प्रथमः प्राक्पदं वा प्रकृत्या स्यात्। प्रथमभागवतः। २॥ सम्प्रति भगवद्भजनमारब्धवानित्यर्थः। प्रथेरमच्।

॥ कतरकतमौ कर्मधारये ॥ ६ - २ - ५७ ॥

एते प्राक्पदे कर्मधारये वा प्रकृत्या स्तः। कतराश्वः। कतमाश्वः।

॥ आर्यो ब्राह्मणकुमारयोः ॥ ६ - २ - ५८ ॥

अनयोः परयोरार्यः कर्मधारये वा प्रकृत्या स्यात् । आर्यब्राह्मणः । २। आर्यकुमारः । २ । ण्यत्यार्यः ।

॥ राजा च ॥ ६ - २ - ५९ ॥

ब्राह्मणकुमारयोः परयोः कर्मधारये राजा वा प्रकृत्या स्यात् । राजब्राह्मणः । २ । राजकुमारः । २ । कनिन् ।

॥ षष्ठी प्रत्येनसि ॥ ६ - २ - ६० ॥

अस्मिन् परे षष्ट्यन्तं राजपदं वा प्रकृत्या स्यात् । राजप्रत्येनाः । २

॥ क्ते नित्यार्थे ॥ ६ - २ - ६१ ॥

क्तान्ते परे नित्यार्थे समासे प्राक्पदं वा प्रकृत्या स्यात् । नित्यभक्तः । सततहृष्टः । नित्ये त्यप् । सतते भावे क्तश्चेत्थाथा- (६ - २ - १४४) दिनान्तो दात्तः । कर्मणि चेद् 'गतिरनन्तरः' (६ - १ - ४९) प्राक्पदप्रकृतिस्वरः । 'कालाः' (२ - १ - २८) इति समासः ।

॥ ग्रामः शिल्पिनि ॥ ६ - २ - ६२ ॥

शिल्प्यर्थे परेऽयं वा प्रकृत्या स्यात् । ग्रामकुविन्दः । २ । ग्रामकुलालः । २ । ग्रामादीनामादिरुदात्तः स्यादित्याद्युदात्तो ग्रामः ।

॥ राजा च प्रशंसायाम् ॥ ६ - २ - ६३ ॥

शिल्प्यर्थे परे राजा प्राक्पदं स्तुतौ वा प्रकृत्या स्यात् । राजरजकः । २ । कर्मधारये राजगुणारोपात् स्तुतिः । षष्ठी समासे राजार्हत्वात् ।

॥ आदिरुदात्तः ॥ (६ - २ - ६४ ॥

इतः परं प्राक्पदस्यादिरुदात्त इत्यधिक्रियते ।

॥ सप्तमीहारिणौ धर्म्येऽहरणे ॥ ६ - २ - ६५ ॥

देयस्यावश्यं स्वीकर्ता हारी। सप्तम्यन्तं हार्यर्थं च प्राक्पदं हरणादन्यस्मिन् धर्म्यार्थे परे आद्युदात्तं स्यात् । आचारनियतं देयं धर्म्यम् । हलेर्द्विपदिका । 'संज्ञायाम्' (२ - १ - ४४) इति समासः । याज्ञिकाश्वः । हरणे तु बाडवहरणम् । बाडवो निषेक्ता । अश्वः । तस्य पुष्ठ्यर्थं देयं हरणम् । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इति अहरणोक्तेर्ज्ञाप्यते । तेन बाडवहार्यमिति हारिस्वरः स्यात् ।

॥ विभाषाध्यक्षे ॥ ६ - २ - ६७ ॥

अस्मिन् परे प्राक्पदमाद्युदात्तं वा स्यात् । गवाध्यक्षः । २ ।

॥ पापं च शिल्पिनि ॥ ६ - २ - ६८ ॥

शिलप्यर्थे परे पापमाद्युदात्तं वा स्यात् । पापनापितः । २ । 'पापाणके–'(२ - १ - ५४) इति समासोऽयम् । तेन षष्ठी समासे न ।

॥ गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ॥ ६ - २ - ६९ ॥

गोत्रार्थशिष्यार्थेषु ब्राह्मणमाणवयोश्च परेषु क्षेपार्थे समासे प्राक्पदमाद्युदात्तं स्यात् । भार्यागार्ग्यः । भार्याप्राधान्यात् क्षेपः । शिष्ये ओदनपाणिनीयाः । भिक्षामाणवः । भयब्राह्मणः । अन्नार्थं भिक्षार्थं भयेन चैषां तथात्वमिति क्षेपः ।

॥ अङ्गानि मैरेये ॥ ६ - २ - ७० ॥

अङ्गमारम्भकम् । तदर्थानि प्राक्पदानि मैरेये परे आद्युदात्तानि स्युः । गुडमैरेयः । मद्यविशेषो मैरेयः ।

॥ भक्ताख्यास्तदर्थेषु ॥ ६ - २ - ७१ ॥

अन्नभेदार्थास्तदर्थपात्रादिषु परेष्वाद्युदात्ताः स्युः । भिक्षाकंसः । श्राणाकंसः ।

॥ गोबिडालसिंहसैन्धवेषूपमाने ॥ ६ - २ - ७२ ॥

उपमानार्थेष्वेषु परेषु प्राक्पदमाद्युदात्तं स्यात् । हिरण्यगाव: । श्राणविडाल: । तृणसिंह: । सक्तुसैन्धव: । गौरिव हिरण्यमिति 'उपमितं व्याघ्र–' (२ - १ ५६) इति समास: । एवं बिलाळादिषूह्यम् ।

॥ अके जीविकार्थे ॥ ६ - २ - ७३ ॥

अकान्ते परे जीविकार्थे समासे प्राकपदमाद्युदात्तं स्यात् । दन्तलेखक: ।

॥ प्राचां क्रीडायाम् ॥ ६ - २ - ७४ ॥

प्राग्देशगक्रीडार्थे समासेऽकान्ते परे प्राक्पदमाद्युदात्तं स्यात् । *वारण-पुष्पप्रचायिका । प्राग्वत् समास*f* । उदीचां तु जीवपुष्पप्रचायिका ।

'°युक्तारोह्यादिषु' (स. ८ - ४ - ८९) 'मत्स्ये वा' (स. ८ - ४ - ९०)

आगतं प्राक्पदं मत्स्ये पर आद्युदात्तं वा स्यात् । आगतमत्स्य: । कर्मधारयोऽयं, बहुव्रीहिर्वा । 'क्षीरभगिनीग्रामा होतृभर्तृगोधुक्षु'– (स - ८-४-९१) । क्षीरे होतेत्यादि । 'अश्वगर्गव्युष्टास्त्रिरात्रे' (स.८ - ४-९२) अश्वत्रिरात्र:,[1]गर्गत्रिरात्र इत्यादि । 'गणैकशिती पदपातो:' (स. ८ -४ -९३) । गणपद: । एकशी (?शि) तिपात् । अस्मिन्निगन्ते '—◎द्विगौ' (६ - २ - २९) इति सिद्धेऽप्युक्ति: शित्यन्तस्य परपदे द्विगुस्वरो नेति ज्ञापनार्था । तेन द्विशितिपादित्यत्र बहुव्रीहि स्वराद् द्विगुस्वरस्य बलीयस्त्वात् शितिरन्तोदात्त: स्यात् । ★ पात्रे समितादीनामप्यत्र पाठात् तेऽप्याद्युदात्ता: इति ।

---

1 'गणैकशीति पादपाता:' इति मुद्रिते ।

* 'वीरण' इति काशिकायाम् । *f* 'नित्यं क्रीडाजीविकयो:' इति ।

° 'युक्तारोहीयोधि प्रहारिषु चागत:' (स- ८ - ४ - ८९)

◎ 'द्विगौ (स-८ - ४ - ७)

★ 'पात्रेसमितादीनां च (स - ८ - ४ - ९४)

॥ ग्रामेऽनिवसन्तः ॥ ६ - २ - ८४ ॥

निवसन्तो निवासी (? सिनः) । तदन्यवाचि प्राक्पदं ग्रामे परे आद्युदात्तं स्यात् । मल्लग्रामः–तत्समूहः । देवग्रामः-तत्स्वामिकः । निवसिनि तु दाक्षिग्रामः ।

॥ घोषदिषु च ॥ ६ - २ - ८५ ॥

'घोषपल्वलह्रदबदर्यश्वत्थशाल्मलिशिलिपिपिङ्गलमुनितृणकूटकुन्दरक्ष (र ?) इश्रेयस्सु' (स- ८ - ४ - ९८) । एषुपरेषु प्राक्पदमाद्युदात्तं स्यात् । दाक्षि–घोषः । दाक्षिकूट इत्यादि । गणः शोध्यः ।

॥ छात्र्यादयः शालायाम् ॥ ६ - २ - ८६ ॥

एते शालायां परत आद्युदात्ताः स्युः । '◎छात्र्यैलिदाण्ड्यखण्डिव्यड्यापि-शलिगोद्ध्याघाटयः शालायाम्' (स - ८ – ४ - ९९) । छात्रिशाला, एलिशा-लेत्यादि ।

॥ प्रस्थेऽवृद्धमकर्क्यादीनाम् ॥ ६ - २ - ८७ ॥

प्रस्थे परे कर्क्यादिरन्यदवृद्धमाद्युदात्तं स्यात् । इन्द्रप्रस्थः । वृद्धे तु दाक्षिप्रस्थः । कर्क्यादावपि–कर्कीप्रस्थः । 'कर्कीकर्कन्धम*धीमकरीशमीकरी-रक*f*टुककुवलयबदरेष्वेवम् ।

॥ मालादीनां च ॥ ६ - २ - ८८ ॥

मालाशाला शोणा द्राक्षा ★ध्रक्षा क्षामा*θ*काण्डैककामाः । एषां प्रस्थे परे आदिरुदात्तः स्यात् । मालाप्रस्थ इत्यादि ।

॥ अमहन्नवं नगरेऽनुदीचाम् ॥ ६ - २ - ८९ ॥

नगरे परे महन्नववर्जितं प्राक्पदमाद्युदात्तं स्यात् । विराटनगरम् । उदीचां तु - नन्दिनगरम् ।

◎ 'छात्रि पेलिभाण्डाखण्डिव्याण्ड्यापिशलिगोड्याघाटः शालायाम्' इतिमुद्रिते । * 'मयी'; f 'कन्दुक' इति मुद्रिते (स. ८ - ४ - १००)

★ 'ध्राङ्क्षा'; θ'काञ्च्येक' मुद्रिते (स. ८ - ४ - १०१)

॥ अर्मे चावर्णं द्व्यच्त्र्यच् ॥ ६ - २ - ९० ॥

अर्मे परे द्व्यच् त्र्यजवर्णान्तममहन्नवं प्राक्पदमाद्युदात्तं स्यात् । गुप्तार्मम् । कुक्कुटार्मम् । पञ्चार्मेत्यत्र तु नलोपस्यासिद्धत्वायं स्वरो न ।

॥ न भूताधिकसंजीवमद्राश्मकज्जलम् ॥ ६ - २ - ९१ ॥

अर्मे परेऽवर्णान्तत्वेऽपि भूतादीनि नाद्युदात्तानि स्युः । भूतार्मम् । अधिकार्मम् । संजीवार्मम् । कज्जलार्मम् । मद्राश्मार्मम् । **'अमोश्म–'** (५ - ४ - ९४) इति टच् । व्यस्तादपि – मद्रार्मम् ।

व्यस्तादश्मार्ममप्यस्ति क्वचिद् वृत्तौ **हरेण** तु ।
स्वरे नलोपस्यासिद्ध्या तदयुक्तमितीरितम् ॥

॥ अन्तः॥ ६ - २ - ९२ ॥

अधिकारोऽयम् ।

॥ सर्वं गुणाकार्त्स्न्ये ॥ ६ - २ ९३ ॥

गुणकार्त्स्न्यार्थस्य सर्वशब्दस्य प्राक्पदस्यान्त उदात्तः स्यात् । सर्वकृष्णः ।

॥ संज्ञायां गिरिनिकाययोः ॥ ६ - २ - ९४ ॥

नाम्न्यनयोः परयोः प्राक्पदस्यान्त उदात्तः स्यात् । अञ्जनागिरिः । पाणिनिनिकायः ।

॥ कुमार्यां वयसि ॥ ६ - २ - ९५ ॥

कुमारीशब्दे परे वयसि द्योत्ये प्राक्पदस्यान्त उदात्तः स्यात् । अव्यूढैव वृद्धकुमारी ॥

॥ उदकेऽकेवले ॥ ६ - २ - ९६ ॥

अस्मिन्परे मिश्रार्थे समासे प्राक्मन्तोदात्तं स्यात् । तिलोदकम् । एकादेशे **"स्वरितो वानुदात्ते —'** (८ - २ - ६) इति स्वरः । केवले तु **उष्णोदकम्** ।

॥ द्विगौ क्रतौ ॥ ६-२-९७ ॥

क्रत्वर्थे समासे द्विगौ परे प्राक्पदमन्तोदात्तं स्यात्। गर्गत्रिरात्रः।

॥ सभायां नपुंसके ॥ ६-२-९८ ॥

नपुंसकसभाशब्दे परे पूर्वपदमन्तोदात्तं स्यात्। गोपालसभम्।

॥ पुरे प्राचाम् ॥ ६-२-९९ ॥

प्राग्देशजे पुरे प्राक्पदमन्तोदात्तं स्यात्। लालाट्यपुरम्।

॥ अरिष्टगौडपूर्वे च। ६-२-१०० ॥

एतद्द्वयपूर्वे समासे पुरशब्दे परे प्राक्पदमन्तोदात्तम्। अरिष्टपुरम् गौडपुरम्। पूर्वग्रहाद अरिष्टश्रितपुरम्। गौडभृत्यपुरमित्यत्रापि।

॥ न हास्तिनफलकमार्देयाः ॥ ६-२-१०१ ॥

एते प्राग्देशजत्वेऽपि पुरेऽन्तोदात्ता न स्युः। हास्तिनपुरम्। फलकपुरम्। मार्देयपुरम्।

। कुसूलकूपकुम्भशालं बिले ॥ ६-२-१०२ ॥

बिले परे एतान्यन्तोदात्तानि स्युः। कुसूलबिलम। कूपबिलम कुम्भबिलम्। शालाबिलम्।

॥ दिक् शब्दा ग्रामजनपदाख्यानचानराटेषु ॥ ६-२-१०३ ॥

एतत्त्रयार्थेषु चानराटशब्दे च परे दिक्शब्दा अन्तोदात्ताः स्युः। पूर्वकृष्णमृत्तिका। पूर्वपाञ्चालाः। पूर्वयायातमाख्यानम्। पूर्वचानराटम्। पूर्वचानराटम्।

॥ आचार्योपमर्जनश्चान्तेवासिनि ॥ ६-२-१०४ ॥

सप्तम्यर्थे प्रथमेति हरः। आचार्योपसर्जने शिष्ये परे दिक्छब्दोऽन्तोदात्तः स्यात्। पूर्वपाणिनीयाः।

॥ उत्तरपदवृद्धौ सर्वं च ॥ ६ - २ - १०५ ॥

परपदोत्तवृद्धिमति परे सर्वशब्दो दिक्छब्दश्चान्तोदात्ताः स्युः । सर्वपाञ्चालकः । पूर्वपाञ्चालकः । 'सुसर्वार्धदिक् शब्देभ्य—' (वा. ७ - ६ - १२)इति तदन्तविधेः जनपदेवुञ् । 'सुसर्वार्धात्—' (७ - ३ - १२)। दिशोऽमद्राणाम्' (७- ३ - १३) इति च परपदवृद्धिः ।

॥ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥ ६ - २ - १२२ ॥

एतानि परपदानि द्विगावाद्युदात्तानि स्युः । द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यः । द्विकाण्डः ।

॥ तत्पुरुषे शालायां नपुंसके ॥ ६ - २ - १२३ ॥

शालान्ते क्लीबे तत्पुरुषे परपदमाद्युदात्तं स्यात् । गोपशालम् । छात्र्यादिपूर्वत्वे तु 'छात्र्यादयः शालायाम् (६ - २ - ८६) इति प्राक्पदमाद्युदात्त (त्व?) मेव । छात्रिशालम् ।

॥ कन्था च ॥ ६ - २ - १२४ ॥

क्लीबे तत्पुरुषे कन्था परपदमाद्युदात्तं स्यात् । सौशमिकन्थ*म् ।

॥ आदिश्चिहणादीनाम् ॥ ६ - २ - १२५ ॥

'चिहणचिक्कण&मडरमड्डुरवैतुलवैडालिकर्णकुक्कुट पटत्कानाम् ॥ (स. ८ - ४ - १३८) कन्थान्ते क्लीबे तत्पुरुषे एषामष्टानामादिरुदात्तः स्यात् । चिहणकन्थं चिक्कणकन्थमित्यादि । गोत्रनामानि । वैडालिकर्णकन्थम् । चिक्कणो वैडालिकर्णिरिति द्वावपि केचित् ।

॥ चेलखेटकटुककाण्डं गर्हायाम् ॥ ६ - २ - १२६ ॥

एतानि परपदानि गर्हायां द्योत्यायामाद्युदात्ताः स्युः । पुत्रचेलम् । विद्वत्खेटम् । दधिकटुकम् मनुष्यकाण्डम् । वस्त्रतृणाद्दुशरा (द्य?) र्थाः

---

* 'कन्थोशीनरेषु' (२ - ४ - २०) इति नपुंसकता ।

& 'मडरमडुरवैतुल' इति मुद्रिते ।

चेलादयः । तत्तुल्याः पुत्रादय इत्यर्थः ।। तादृशा एवमुक्ताः । *तुच्छत्वदुर्बलत्वदुःस्वादुत्वभूतद्रोहित्वानि गर्हा । 'उपमितं व्याघ्र—'(२ - १ - ५६) इति समासः ।

॥ चीरमुपमानम ॥ ६ – २ - १२७ ॥

उपमानार्थं चीरमाद्युदात्तं स्यात् । वस्त्रं चीरमिव वस्त्रचीरम् ।

॥ पललसूपशाकं मिश्रे ॥ ६ - २ - १२८ ॥

मिश्रार्थे तत्पुरुषएतानि पराण्याद्युदात्तानि स्युः । घृतपललम् । मूलकसूपः । मुद्गशाकम् । 'भक्ष्येण—' (२ - १ - ३५) इति समासः ।

॥ कूलसूदस्थलकर्षाः संज्ञायाम् ॥ ६ - २ - १२९ ।

एतानि पराणि ग्रामनाम्नि आद्युदात्तानि स्युः । दाक्षिकूलम् । देवसूदम् । माहिकिस्थली । दाक्षिकर्षः । स्थलेति लिङ्गविशिष्टग्रहात् स्थली गृह्यते ।

॥ अकर्मधारये राज्यम् ॥ ६ - २ - १३० ॥

अत्र राज्यं परमाद्युदात्तं स्यात् । रामराज्यम् । कर्मधारये तु परमराज्यम् ।

॥ वर्ग्यादयश्च ॥ ६ - २ - १३१ ॥

दिग दौ वर्गपूगेत्यादि पठिता यदन्ता एव वर्ग्यादयः । तानि पराण्युक्तसमासे आद्युदात्तानि स्युः । वासुदेववर्ग्यः । अर्जुनपूग्यः । इत्यादि । चेलराज्यवर्ग्यादिष्वव्ययपूर्वत्वे तत्स्वर एवेष्टः । कुचेलः । कुराज्यम् । कुवर्ग्यः ।

॥ पुत्रः पुम्भ्यः ॥ ६ - २ - १३२ ॥

पुंशब्देभ्यः परः पुत्रः आद्युदात्तः स्यात् । नन्दपुत्रः । स्त्रियां तु गोपीपुत्रः ।

---

* 'वाक्यमिदं नास्ति' – क;

॥ नाचार्यराजर्त्विक् संयुक्तज्ञात्याख्येभ्यः ॥ ६ - २ - १३३ ॥

आचार्याद्याख्येभ्यः परः पुत्रो नाद्युदात्तः स्यात् । आख्याग्रहात् पर्यायाद् विशेषाच्च । आचार्यपुत्रः । उपाध्यायपुत्रः । पाणिनिपुत्रः । एवं राजादेरप्यूह्यम् । संयुक्ताः स्त्रीसंबन्धिनः । संयुक्तपुत्रः । स्यालपुत्रः । ज्ञातयः- पितृसंबन्धिन इति हरः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः ।

॥ चूर्णादीन्यप्राणिषष्ठ्याः ॥ ६ - २ - १३४ ॥

चूर्णचौलच*मसी/चलनकरि&पकरिचकुन्दमदलवद्राक्षातूस्तशाकिन शाकटान्यप्राणिषष्ठ्याः' (स. ८ - ४ - १४७) अप्राण्यर्थषष्ठ्यन्तात् पराण्येतानि आद्युदात्तानि स्युः । मुद्गचूर्णम् । न्यग्रोधचमसीत्यादि । प्राणिषष्ठ्यास्तु- शङ्खचूर्णम् ।

॥ षट् च काण्डादीनि ॥ ६ - २ - १३५ ॥

काण्डचीरपललसूपशाककूलानि षट परपदान्यप्राणिषष्ठ्या उक्तान्यत्रार्थेऽपि आद्युदात्तानि स्युः । काण्डमगर्ह्यायामपि - शरकाण्डम् । चीरमनुपमानेऽपि - कुशचीरम् । पललादित्रयममिश्रेऽपि लवणपललम् । मुद्गसूपः । मूलकशाकम् । कूलमनाम्न्यपि - नदीकूलम् ।

॥ कुण्डं वनम् ॥ ६ - २ - १३६ ।

वनं समुदायः । तद्वाचि कुण्डं परमाद्युदात्तं स्यात् । दर्भकुण्डं तद्वनम् ।

॥ प्रकृत्या भगालम् ॥ ६ - २ - १३७ ॥

भगालार्थं परपदं प्रकृत्या स्यात् । कुम्भीभगालम् । कुम्भीकपालम् । कुम्भीनगालम् । **'लघावन्ते द्वयोश्च बह्वषो गुरुः'** (फि. सू. ४२) बह्वचः शब्दस्यान्ते एकस्मिन् द्वयोर्वा लघोः परतो गुरुरुदात्तः स्यात् इति मध्योदात्ता भगालादयः ।

---

* 'सिचक्कनकरिपकुन्दमदलपद्राक्षा' मुद्रिते / 'चकन' - क;
& 'वकरि'- क; 'प' - क;

॥ उभे वनस्पत्यादिषु युगपत् ॥ ६ - २ - १४० ॥

वनस्पतिबृहस्पतिशचीपति तनूनपान्नराशंसशुनश्शेपशण्डामर्कतृष्णावरूत्री-बम्बाविश्व/वयोमर्मृत्युषु'(स - ८ - ४ - १५२)। एषु प्राक्पर पदे युगपत् प्रकृत्या स्तः। 'नब्विषयस्यानिसन्तस्य' (फि - २६)। इसन्तान्यक्लीबस्यादिरुदात्तः स्यात्। इति वनमाद्युदात्तम्। पातेर्डतौ पतिः। वनस्पतिः पवमान[1]:। बृहदाद्युदात्तम्। अन्तोदात्तमित्येके। बृहस्पतिस्तमसि। शचीशार्ङ्गरवादिः। वृत्रहणं शचीपतिम्। ऊप्रत्यया (न्त) स्तनूः। नपाच्छब्देऽव्ययस्वरः। नन्वा नपात् [2]तनूनपात्। केचित् तन्वामाद्युदात्तत्वमत्र निपातयतीति हरः। तनूनपादुच्यते। न्ऋ नये। बाहुलकात् कर्तरि **ऋदोरप्** (३ - ३ - ५७) ([3]मे नरे?) निपातनाद् दीर्घः। शंसेः कर्मणि घञ्। नराशंसो भवति। आ*द्युदात्तश्च। 'स्वाङ्ग (सि?शि) टामदन्तानाम् (फि.२९) स्वाङ्गार्थाः नां सर्वनाम्नां चादन्तानामादिरुदात्तः स्यात्। शुनःशेपो ह्यह्नत्-शुन इव शेपोऽस्येति बहुव्रीहिरयम्। अजन्तः शण्डो &ग्रामादित्वादाद्यु-दात्तः। **'अन्येषामपि—'** (६ - ३ - १३७) इति दीर्घः। मर्के कन्। शण्डामर्कावसुराणाम्। तृषेः क्तः। इह निपातनादनिट्त्वम्। **'निष्ठा च द्व्यजनात्'** (६ - १ - २०५) इत्याद्युदात्तत्वम्। वरूत्रीत्यन्तोदात्त इति **वृत्तिः**। प्राग्वद् दीर्घः। तृष्णावरूत्री। लम्बेः पचाद्यच्। निपातनाल्लस्य वत्वम्। **'बहुव्रीहौविश्वं संज्ञायाम्'** (६ - २ - १०६) इति विश्वशब्दोऽन्तोदात्तः। प्राग्वद् दीर्घः। बम्बाविश्ववयसौ। मृङः। **'अन्येभ्योऽपिदृश्यन्ते'** (३ - २ - ७५) इति विच्। मृङः त्युक्। मर्मृत्युः। शण्डामर्कादयश्चत्वारो द्वन्द्वाः।

॥ **सूपमानात्** क्तः। ६ - २ - १४५ ॥

सोरुपमानाच्च परं क्तान्तमन्तोदात्तं स्यात्। सुष्टुतः कृष्णः। हरिणेव हतो हरिहतः। **'कर्तृकरणेकृता—'** (२ - १ - ३२) इति समासः।

---

1 'नं क; 2 'तमित्येके तनूनपात्' क; 3 'नरेति निपातनाद्' -क-

f 'वयामर्मृत्यूनामु भे युगपत' मुद्रितपाठः। * अथादि प्राक् शकटेः, (फि - २४) इत्यस्यैकदेशार्थानुकरणमिदम्?

& ग्रामादीनां च' (फि. ३८)

गतिरनन्तरः' (६ - २ - ४९) 'तृतीयाकर्मणि' (६ - २ - ४८) इत्यनयोरपवादः ।

॥ संज्ञायामनाचितादीनाम् ॥ ६ - २ - १४६ ॥

नाम्नि गतिकारकोपपदात् परं क्तान्तमन्तोदात्तं स्यात् । परिजग्धः कौण्डिन्यः । आचितपर्याचितास्थापितास्थितपरिगृहीतनिरुक्तप्रतिपन्न प्रश्लिष्टोपश्लिष्टोपद्रुतोपस्थापितानां तु न । आचितं पर्याचितम् । इत्यादि । 'संहितायगवि' (वा.) गोरन्यस्य नाम्नि संहिता अन्तोदात्ता । संहिता । गोनाम्नि तु—संहिता विश्वरूपी इति ।

॥ प्रवृद्धादीनां च ॥ ६ - २ - १४७ ॥

क्तान्तं परपदमन्तोदात्तं स्यात् । प्रवृद्धस्य यानवृषलयोः, प्रयुक्तस्य सक्तुषु, अवहितस्य भोगाकर्षयोः । एषामेष्वर्थेष्वेव । प्रवृद्धं यानमित्यादि । 'खट्वारूढकविशस्तपुनरुतस्यूतपुनर्निष्कृतानां च' (स. ८ - ४ - १६८) । कविशस्तो बृहता भानुनाश्वः ।

॥ इत्थंभूतेन कृतमिति च ॥ ६ - २ - १४८ ॥

तदर्थे समासे क्तान्तं परमन्तोदात्तं स्यात् । उन्मत्तप्रलपितं वाक्यम् । 'तृतीया कर्मणि' (६ - २ - ४८) इत्यस्य बाधः ।

॥ सप्तम्याः पुण्यम् ॥ ६ - २ - १५२ ॥

सप्तम्यन्तात् परं पुण्यमन्तोदात्तं स्यात्। हरिभजनेपुण्यं हरिभजनपुण्यम् । 'तत्पुरुषे तुल्यार्थ—' (६ - २ - २) इत्यस्य बाधः ।

॥ ऊनार्थकलहं तृतीयायाः ॥ ६ - २ - १५३ ॥

तृतीयान्तात्परे ऊनार्था अर्थकलहशब्दौ चान्तोदात्ताः स्युः । पापोनः । पापहीनः । धान्यार्थः । तर्ककलहः ।

---

*. परीगृह्णीत' मुद्रीते (स. ८ - ४ - १५९)

॥ मिश्रं चानुपसर्गमसन्धौ ॥ ६ - २ - १५४ ॥

असन्धौ द्योत्ये तृतीयान्तात् परमनुपसर्ग मिश्रमन्तोदात्तं स्यात । गुणमिश्रः । उपसर्गे तु गुणसम्मिश्रः । 'तत्पूरुषे तुल्य—' (६ - २ - २) इति स्वरः । यदि त्वमित्थं कुर्याः अहं तवेदं कुर्यामिति पणबन्धनैकार्थ्यं तस्मिन् द्योत्ये तु–ब्राह्मणमिश्रो राजा । तेनैकार्थ्यं प्राप्त इत्यर्थः ।

॥ नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः ॥ ६ - २ - १५५ ॥

गुणस्तद्धितार्थ प्रवृत्तिनिमित्तं सम्पादित्वादि तन्निषेधार्थान्नञः सम्पाद्याद्यर्थतद्धिता अन्तोदात्ताः स्युः । अचान्दनिकमुरः । अच्छैदिकः । अवत्सीयः । असान्तापिकः ।

॥ ययतोश्चातदर्थे ॥ ६ - २ - १५६ ॥

अतदर्थवति यत् तद्धितान्तं नञः परमन्तोदात्तं स्यात् । यः- अपाश्या । यत् –अदन्त्यम् । तादर्थ्येतु- अपाद्यम् ।

॥ अच्कावशक्तौ ॥ ६ - २ - १५७ ॥

अस्यां द्योत्यायामजन्तं कान्तं च नञः परमन्तोदात्तं स्यात् । अपचो रोगी । अविलिखो मूढः । शक्तौ तु- अपचः परिव्राट् ।

॥ आक्रोशे च ॥ ६ - २ - १५८॥

अस्मिन् द्योत्ये नञः परमच्कान्तमन्तोदात्तं स्यात् । अपचोऽयं लुब्धः । अविलिखस्तन्द्रालुः । शक्तोऽप्येवमाकुश्यते ।

॥ संज्ञायाम् ॥ ६ - २ - १५९

आक्रोशे नञः परं नाम्नि स्थितं पदमन्तोदात्तं स्यात् । अविष्णुमित्रः तत्कार्यमकुर्वन् ।

॥कृत्योकेष्णुच्चार्वादयश्च ॥ ६ - २ - १६० ॥

कृत्याद्यन्तानि चार्वादीनि च नञः पराण्यन्तोदात्तानि स्युः । अकृत्यम् । अकरणीयम् । उ - अबुभूषुः । उक– अनागामुकः । इष्णुच् - अनिराकरिष्णुः ।

खिष्णुचोऽपि ग्रहात् अनाढ्यम्भविष्णुः। **चारु*साधु[1]यौधिकानङ्गमेजयवदान्याकस्माद्गृहपति गृहपतिकाः'** (स.८-४-१७३, १७४) अचारुः। असाधुः। युधा चरति [2]यौधिकः। अयौधिकः। अनन‌ङ्गमेजयः। इह द्वितीये नञि। अवदान्यः। अनकस्मात्। अत्रापि द्वितीये। संज्ञा(व) (नि ? ति) तद्रहिते च। अगृहपतिः। अगृहपतिकः। **वर्तमानवर्द्धमानत्वरमाणध्रियमाणरोचमानाः संज्ञायाम्** (वा.) अवर्तमान इत्यादि। 'राजाह्नोः छन्दसि' अराजा। अनहः। **'विकारसदृशो व्यस्तं च'** (वा.) अविकारः। असदृशः अविकारसदृशः।

॥ विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥ ६-२-१६१ ॥

नञ एषु परेष्वन्तोदात्तत्वं वा स्यात्। तृन्नन्ते—अकर्ता। अनन्नः। अतीक्ष्णः। अशुचिः।

॥ प्रतेरंशवादयस्तत्पुरुषे ॥६-२-१९३ ॥

अन्तोदात्ताः स्युः। **अंशुजनराजन्नुष्ट्रखेटकाजिरार्द्राश्रवणाकृत्तिकार्धपुराणि'** (स.८-४-२१९,२२०)। प्रतिगतोंऽशुः प्रत्यंशुः। प्रतिजनः। प्रतिराजा। टजभावे विधिः। एवं प्रत्युष्ट्रः। प्रतिखेटक इत्यादि।

॥ उपाद् द्व्यजजिनमगौरादयः θ **॥ ६-२-१९४ ॥**

उपात् परं गौरादेरन्यद द्व्यच् अजिनं चान्तोदात्तं स्यात्। उपगतो देवमुपदेवः। उपाजिनः। गौरादौ तु—उपगौरः। एवं तैषलेटलोटजिह्वाकृष्णाकन्यागुडकल्पपादेषु। लेट् लोट् धाष्टर्ये ϕपचाद्यच्।

॥ सोरवक्षेपणे ॥ ६-२-१९५ ॥

क्षेपे द्योत्ये सोः परमन्तोदात्तं स्यात्। इह खल्विदानीमास्व सुस्थले **'स्वती पूजायाम्'** (स. ३-२-१४७) इति समासः। आपन्नं प्रत्युक्ता। वाक्येन क्षेपो द्योत्यते।

---

* एतदनन्तर गपाठो भ्रष्टः। 1 'योधि'–क; 2 'योधि-'क;

θ क पाठ एतावतावसितः।

ϕ उभौ कण्ड्वादी। धौर्त्ये पूर्वभावे चेति बहुत्र।

॥ विभाषोत्पुच्छे ॥ ६ - २ - १९६ ॥

तत्पुरुषरूप उत्पुच्छेऽन्त उदात्तो वा स्यात् । उत्क्रान्तः पुच्छादुत्पुच्छः । प्रादिक्षेऽव्ययस्वरापवादः । उत्पुच्छयतेरजितिपक्षे तु 'था था'दिन नित्यमुदात्तत्वे प्राप्ते विकल्पोक्तिः ।

॥ पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः ॥ ८ - १ - ६७ ॥

पूजनार्थेभ्यः काष्ठादिभ्यः परं पूजितं सर्वमनुदात्तं स्यात् । **काष्ठदारुणाऽमाताऽपु (त्रे?त्र) वेशानाज्ञातायुताद्भुतभृशघोरपरमस्वतिभ्यः'** **(स. ८ - ३ - २४१)** काष्ठाध्यायकः । काष्ठं यथा तथा धीयत इति क्रियाविशेषणान्येतानि । मयूरव्यंसकादिः समासः । काष्ठाभिरूपक इत्यादावभिरू(प्य?प्यं) काष्ठेन विशेष्यत इति हरः । सर्वत्र क्रियाविशेषणत्वं योज्यमिति । उदात्तवता तिङा गतेः समासे ।

गतिर्गतौ ॥ ८ - १ - ७० ॥

गतौ परे गतिर्नित्यं निहन्यते । परिप्रस्यन्दते सुतः ।

॥ तिङि चोदात्तवति ॥ ८ - १ - ७१ ॥

उदात्तवति तिङन्ते परे गतिर्निहन्यते । धियो यो नः प्रचोदयात् ।

इति तत्पुरुषस्वरः ॥

॥ बहुव्रीहिस्वरः ॥

॥ बहुव्रीहौ प्रकृत्या पूर्वपदम् ॥ ६ - २ - १ ॥

अत्र पूर्वपदस्वरः प्रकृत्या स्यात् । सुतसोमाः अर्हविदः । पञ्चाक्षरा पङ्क्तिः । **'न्रः संख्यायाः' (फि. सू. २८)** नकाररेफान्तायाः द्व्यचः संख्याया आदिरुदात्तः स्यादिति पञ्चन्नाद्युदात्तः ।

॥ बहुव्रीहौ विश्वं संज्ञायाम् ॥ ८ - २ - १०६ ॥

अत्र विश्वंप्राक्पदं नाम्न्यन्तोदात्तं स्यात् * । (विश्वदेवः) *f* गोपीबन्धुः ।

* इतः परं 'उदराश्वेषुषु' (६ - २ - १०७) 'क्षेपे' (६ - २ - १०८) नदी बन्धुनि' (६ - २ - १०९) इति त्रिसूत्री न दृश्यते ।

f 'नदी बन्धुनि' इत्यत्र उदाहरणमेतत् ।

॥ निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥ ८ - २ - ११० ॥

सोपसर्गं निष्ठान्तं प्राक्पदं वान्तोदात्तं स्यात् । प्रक्षालितपादः । पक्षे गतिस्वरः ।

॥ उत्तरपदादिः ॥ ६ - २ - १११ ॥

पादान्तमधिकारोऽयम् ।

कर्णो वर्णलक्षणात् ॥ ६ - २ - ११२ ॥

वर्णार्थाल्लिक्षणार्थाच्च पर परःकर्ण आद्युदात्तः स्यात् । शुक्लकर्णः । दात्राकर्णः ।

। संज्ञौपम्ययोश्च ॥ ६ - २ - ११३ ॥

अनयोः स्थिते बहुव्रीहौ कर्णः परपदमाद्युदात्तं स्यात् । शङ्कुकर्णः । गोकर्णः ।

॥ कण्ठपृष्ठग्रीवाजङ्घं च ॥ ६ - २ – ११४ ॥

संज्ञयौपम्ययोः कण्ठादीनि पराण्याद्युदात्तानि स्युः । नाम्निनीलकण्ठः । काण्डपृष्ठः. दशग्रीवः, तालजङ्घः । औपम्ये कम्बुकण्ठः, गोपृष्ठः, गोग्रीवः, (त्र?तृ) णजङ्घः ।

॥ शृङ्गमवस्थायां च ॥ ६ - २ - ११५ ॥

संज्ञौपम्योश्च शृङ्गं परमाद्युदात्तं स्यात् । द्व्यङ्गुलशृङ्गः । ऋश्यशृङ्गः । गोशृङ्गः ।

॥ नञो जरमरमित्रमृताः ॥ ६ - २ - ११६ ॥

नञः परे जरादय आद्युदात्ताः स्युः । अजरम् । अमरः । अमित्रम् । अमृतम् ।

।। सोर्म सो अलोमोषसी ।। ६ - २ - ११७ ।।

आभ्यामन्ये सोः परे मन्नन्तासन्ता आद्युदात्ताः स्युः। सुशर्मा। सुयशाः। सुस्रत् सुध्वत्। क्विपि पदत्वे ।। 'वसुस्रंस्ु–' (८ - २ - ७२) इति दत्वम। तस्यासिद्धत्वादसन्तौ। लोमोषसोस्तु सुलोमा, सूषाः।

।। क्रत्वादयश्च ।। ६ - २ - ११८ ।।

'क्रतुदृशीकप्रतीकप्रतूर्तिहव्य*कव्य भगाश्च' (स. ८ - ४ - १३१)। तेए सोः परा आद्युदात्ताः स्युः। अस्य यज्ञस्य सुक्रतुम्। सुप्रतीकपुरस्तात्। सुप्रतूर्तिमनेहसम्। सहव्यः। सुकव्यः। सुभगं सुदंससम्।

।। आद्युदात्तं द्व्यच्छन्दसि ।। ६ - २ - ११९ ।।

वेदे सोः परमाद्युदात्तं द्व्यच् परपदं बहुव्रीहौ तथैव स्यात्। स्वश्वास्त्वा सुरथाः। अश्वे क्वन्। रथे क्थन्। अन्तोदात्तत्वात् अया सुबाहुः। एकाच्त्वात् सुगुरसत्। सुहिरण्यः।

।। वीरवीर्यौ च ।। ६ - २ - १२० ।।

वेदे सोः परावाद्युदात्तौ स्तः। शतहिमाः सुवीराः। सुवीर्यस्य पतयः स्याम। यदन्तत्वादेव सिद्धेऽप्यत्राद्युदात्तत्वविधेः **'यतोऽनावः'** (६ - २ - २१३) इत्येतद् वीर्ये नेति ज्ञाप्यते। मयीन्द्रियं वीर्यम्।

।। शितेर्नित्या बह्वज् बहुव्रीहावभसत् ।। ६ - २ - १३८) ।।

शितेः परं भसदन्यन्नित्यमबह्वच् पदं प्रकृत्या स्यात्। शितिबाहुर–न्यतः। बाहरन्तं दात्तः। नित्योक्तेः शितककुद इत्यवस्थातोऽन्यत्र बह्वच्त्वात् शितिककुदित्यत्र न। भसदि तु शितिभसदे स्वाहा। उणादि क्तिनि शितिः।

---

* कव्यशब्दो मुद्रिते नास्ति।

।। बहुव्रीहाविदमेतत् तद्भ्यः प्रथमपूरणयोः क्रियागणने ।। ६ - २ - १६२ ।।

एभ्यः परस्य प्रथमशब्दस्य पूरणान्तस्य च क्रियागणनस्य चार्थस्यान्त उदात्तः स्यात्*।

(।। संख्यायाः स्तनः ।। ६ - २ - १६३ ।। द्विस्तनाः)

।। विभाषा छन्दसि ।। ६ - २ - १६४ ।।

वेदे संख्यायाः स्तनोऽन्तोदात्तो वा स्यात्। द्विस्तनां करोति द्यावापृथिव्योर्दोहाय। चतुस्तनां करोति पशूनां दोहाय। पूर्वः स्तनोऽन्तोदात्तः पर आद्युदात्तः।

।। संज्ञायां मित्राजिनयोः ।। ६ - २ - १६५

नाम्न्यनयोः परयोरन्त उदात्तः स्यात्। देवमित्रः। वृकाजिनः। संज्ञाप्यृषौ नेष्टम्। विश्वामित्रस्य रक्षति। **'बहुव्रीहौ विश्वम्-'** (६ - २ - १०६) इति स्वरः।

।। व्यवायिनोऽन्तरम् ।। ६ - २ - १६६ ।।

व्यवधायकार्थात् परमन्तरपदमन्तोदात्तं स्यात्। पटान्तरः।

।। मुखं स्वाङ्गम् ।। ६ - २ - १६७ ।।

स्वाङ्गार्थमुखमन्तोदात्तं स्यात्। स्मेरमुखः। अस्वाङ्गे-दीर्घमुखा शाला।

।। नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ।। ६ - २ - १६८ ।।

एभ्यः परं मुखं स्वाङ्गमन्तोदात्तं न स्यात्। तेन **"बहुव्रीहौ प्रकृत्या—"** (६ - २ - १) इति स्वरः। **'भिषोऽन्त उदात्तः'** (फि. १) प्रातिपदिकस्यान्त उदात्तः स्यादिति उच्चैरन्तोदात्तः। उच्चैर्मुखः

---

* कव्यशब्दो मुद्रिते नास्ति। इतः परं किञ्चिल्लुप्तम्।
वार्तिकार्थानुकरणम्।

प्राङ्मुखः । गोमुखः । महामुखः । प्राग द्वित्वये स्वर उक्तः । स्थूलादिचतुष्कमन्तोदात्तम् । स्थूलमुखः । मुष्टिमुखः । वत्समुखः । गोमुष्टिवत्सेषु उपमानोक्तविकल्पस्यानेन बाधः ॥

॥ निष्ठोपमानादन्यतरस्याम् ॥ ६ - २ - १६९ ॥

निष्ठान्तादुपमानार्थाच्च परं मुखं स्वाङ्गमन्तोदात्तं वा स्यात् ॥ प्रक्षालितमुखः ॥ यदैतन्नास्ति तदा **'निष्ठोपसर्गपूर्वं-'** (८ - २ - ११०) इति वा प्राक्-पदान्तोदात्तत्वं गतिस्वरश्चेति त्रिधा । उपमानात्–पद्ममुखः । पद्मेमंनि पद्मम् ।

॥ जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृत–मितप्रतिपन्नाः ॥ ६ - २ - १७० ॥

वस्त्रान्यजात्यर्थात् कालवाचिनः सुखादिभ्यश्च परं कृता (दा? द्य) न्यत् क्तान्तमन्तोदात्तं स्यात् । सुरापीतः । मासयातः । द्व्यहयातः । सुखयातः । दुःखयातः इत्यादि । सुखादिरुक्तः । वस्त्रात्तु–वस्त्रच्छन्नः । वसेस्त्रन् । कृतादेस्तु-कुण्डकृतः इत्यादि । कुण्डं **'नब्विषयस्य-'** (**फि. सू. २६**) इत्याद्युदात्तः । एषु निष्ठान्तस्य प्राङ्निपाताभावोऽस्मादेव ज्ञापकात् ।

॥ वा जाते ॥ ६ - २ - १७१ ॥

जात्यादिभ्योऽस्मिन् परेऽन्तोदात्तो वा स्यात् । दन्तजातः । मासजातः । सुखजातः इत्यादि । पक्षे प्राक्पदप्रकृतिस्वरः । दन्तः **'स्वाङ्गशिटामदन्तानाम्** (**फि. सू. २९**) इत्यन्तोदात्तः । मासे (म) प्रत्ययः । (**खा?**) **'स्वान्तस्याश्मादेः'** (स. ८-३-११४) अशकारमकारादेः स्वा(खा?)न्तस्यान्त उदात्तः स्यात् । इत्यन्तोदात्तं मुखम् ।

॥ नञ् सुभ्याम् ॥ ६ - २ - १७२ ॥

आभ्यां परमन्तोदात्तं स्यात् । अयवो देशः । सुयवः । समासस्यायं विधिरिष्टः इत्यनृचे समासान्तेकृतेऽपि स्यात् ।

॥ कपि पूर्वम् ॥ ६-२-१७३ ॥

नञ् सुभ्यां (परस्य?) कपि पूर्वमन्तोदात्तं स्यात् । अकुमारीकः। अब्रह्मबन्धूकः । सुकुमारीकः ।

॥ ह्रस्वान्तेऽन्त्यात्पूर्वम् ॥ ६-२-१७४ ॥

नञ् सुभ्यां परस्य ह्रस्वान्ते पदे परे कपि परेऽन्त्यात्पूर्वमुदात्तं स्यात् । अयवको देशः । सुव्रीहिकः । पूर्वाधिकारे पुनः पूर्वग्रहो ह्रस्वान्तेऽन्त्यात् पूर्वमेवोदात्तं स्यादिति नियमार्थः । तेन अज्ञकः इत्यादौ **'नञ् सुभ्याम्'** (६-२-१७२) इत्यत्रकृतसमासान्तस्याप्ययं विधिरिष्ट इति कबन्तस्यैवान्तोदात्तत्वम् ।

॥ बहोर्नञ्वदुत्तरपदभूम्नि ॥ ६-२-१७५ ॥

परपदार्थभूमाथदि बहोः नञः परस्येव स्वरः स्यात् । 'नञ् सुभ्याम्' (इत्युक्तं बहोरपि भवति) । बहुयवो देशः । 'कपिपूर्वम्' (इति बहोरपि भवति) । बहुगोपीकः । 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' (इति बहोरपिभवति) बहुव्रीहिकः । **'नञो जरमरमित्रमृताः'** (६-२-११६) बहुजर इत्यादि । प्राक्पदभूम्नि तु—बहुषु मनोऽस्य बहुमनाः ।

॥ न गुणादयोऽवयवाः ॥ ६-२-१७६ ॥

गुणाक्षरच्छन्दोमानसूक्ताध्यायादयोऽवयवाः । अवयवार्था एते बहोः परेऽन्तोदात्ता न स्युः । बहुगुणा रज्जुः । बह्वक्षरं पदम् । छन्दो मीयतेऽनेनेति छन्दोमानं तल्लक्षणम् । बहुच्छन्दोमानः । बहुसूक्तः । बह्वध्यायः । आकृतिगणोऽयम् ।

॥ उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ॥ ६-२-१७७ ॥

प्रादेः परं पर्शोरन्यद् ध्रुवं स्वाङ्गमन्तोदात्तं स्यात् । प्रगतं पृष्ठमस्य प्रपृष्ठः । अध्रुवे तु—उद्बाहुः । पर्शावपि विपर्शुः ।

॥ द्वित्रिभ्यां पाद्दन्मूर्धसुबहुव्रीहौ ॥ ६ - २ - १९७ ॥

द्वित्रिभ्यामेषु परेषु अन्त उदात्तो वा स्यात्। द्विपात्। त्रिपदम्भ्ये(?)ति। द्विदन्। द्विमूर्धा। एवं त्रिपादित्यादि मूर्ध्नः समासान्ताभावे विधिः। समासान्ते कृतेऽपि तस्य समासांशत्वात् स्यादेव। द्विमूर्धः। त्रिमूर्धः।

॥ सक्थं चाक्रान्तात् ॥ ६ - २ - १९८ ॥

षजन्तः सक्थ शब्दोऽक्रात् परोऽन्तोदात्तो वा स्यात्। गौरसक्थः। श्लक्ष्णसक्थः। क्रान्तात् तु - चक्रसक्थः। अत्र षचि नित्यमन्तोदात्तः।

॥ परादिश्छन्दसि बहुलम् ॥ ६ - २ - १९९ ॥

वेदे सक्थे परे तस्यादिर्बहुलमुदात्तः स्यात्। अञ्जिसक्थमालभेत। त्वाष्ट्रो लोमशसक्थः। बहुलोक्तेः सक्थादन्यत्रापि–ऋजुबाहुः। वाक्पतिस्त्वा पुनातु। चित्पतिस्त्वा पुनातु। बहुलग्रहादेव त्रिचक्रादीनां परपदात्तोदात्तत्वं मरुद्वृधादीनां प्राक्पदान्तोदात्तत्वं दिवोदासादीनां प्राक्पदाद्युदात्तत्वं च सिद्धम्। चक्रेण* त्रिदिवंधुरेण। त्रिवृ(धा? ता)रथेन। दिवोदासाय रन्धयन्।

॥ इति बहुव्रीहि स्वरः ॥

॥ अथ द्वन्द्वस्वरः ॥

तत्र **'समासस्य'** (६ - १ - २२३) इत्यन्तोदात्तत्वम्। सोमापूषभ्यां जनदुस्रियासु।

॥ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ॥ ६- २- ३४ ॥

अन्धकवृष्णिराजवाचिनां बहुवचनान्तानां द्वन्द्वे प्राक्पदं प्रकृत्या स्यात्। श्वाफलकचैत्ररथाः। **'ऋष्यन्धक-'** (४ - १ - ११४) इत्यण्। शिनि वासुदेवाः। शिनिरन्तोदात्तः तत्सुतेऽभेदेन वर्तते। बहुवचनोक्तेः सङ्कर्षणवासुदेवौ।

---

* 'त्रिचक्रेण। त्रिवन्धुरेण'- काशिकायाम्।

॥ संख्या ॥ ६ - २ - ३५ ॥

संख्यार्थं प्राक्पदं प्रकृत्या स्यात्। द्व्येकादश (स्थ:?) कनि एकः द्वादश प्रधयः।

॥ आचार्योपसर्जनश्चान्तेवासी ॥ ६ - २ - ३६ ॥

गुरूपसर्जनशिष्याणां मिथो द्वन्द्वे प्राक्पदं प्रकृत्या स्यात्। आपिशलपाणिनीयाः। तस्येदमर्थेऽण्। प्रत्ययार्थस्य प्राधान्यादाचार्यस्याप्रधानत्वम्।

॥ कार्तकौजपादयश्च ॥ ६ - २ - ३७ ॥

एते प्राक् पदप्रकृतिस्वराः स्युः। 'कार्तकौजप सावर्णिमाण्डूकेय कटुकवार्चलेयशैतिकाक्षपाञ्चालेया* अवन्त्यश्मकौϕ अविमत्तकामविद्ध/तण्डवतण्डशाकल शुनकश णकबाभ्रव्यपाज्यानुवाक्यावत्सजरञ्जरामृत्युस्त्रीकु★माराः' (स. ८ - ४ - ६६) अपत्याणि कार्तकौजपौ। शाकलशुनका(न्?)शाकल्यस्य शिष्याः शाकलाः। 'कण्वादिभ्यो गोत्रे' (४ - २ - १११) इत्यण्। शुनका(न्?) बिदाद्यणन्तो बहुषु लुक्। याज्यानुवाक्ये। वत्सजरन्तौ। जरामृत्यू। स्त्रीकुमा(रं? रौ)। ण्यति याज्या। से वत्सः। अङि जरा। अन्तोदात्तः स्त्रीशब्दः। कपिपैलौ श्यावर्णये। 'कुन्तिचिन्तीa सुराष्ट्रे (स. ८ - ४ - ६७)। बाभ्रवशाbलङ्कायनदानच्युतयोः' (स. ८ - ४ - ६८)। अप्रसिद्धत्वात् सर्वेषां प्रत्ययानुक्तिः।

॥ देवताद्वन्द्वे च ॥ ६ - २ - १४१ ॥

उभे पदे युगपत् प्रकृत्या स्तः। इन्द्रावरुणयोरहम्। इन्द्राबृहस्पती वयम्।

॥ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थि[1]षु ॥ ६ - २ - १४२ ॥

पृथिव्यादि वर्जितेऽनुदात्तादौ परपदे देवताद्वन्द्वे युगपत्प्रकृत्या न स्तः। इन्द्रवायू भवामहे। अत्र समासस्वरः। पृथिव्यादौ तु—द्यावापृथिव्यौ। सोमारुद्रौ। इन्द्रापूषाणौ। शुक्लामन्थिनौ[2]।

॥ इति द्वन्द्वस्वरः ॥

---

* पञ्चालेयावन्त्य; ϕ श्मकाविमत्त; *f* 'द्धाण्डवितण्डशाक'

★ 'मारेषुकपिपैलश्यापर्णये' - मुद्रितपाठः।

a 'चिन्ति' b 'वशा' - मुद्रित पाठौ।

1,2 'मन्वि - ख।

॥ अथ साधारणसमासस्वरः ॥

॥ वनं समासे ॥ ६ - २ - १७८ ॥

प्रादेः परं वनं समासमात्रेऽन्तोदात्तं स्यात्। उद्वनादुदकानीव। प्रवणे यष्टव्यम्।

॥ अन्तः ॥ ६ - २ - १७९ ॥

अन्तःशब्दात्परं वनमन्तोदात्तं स्यात्। अन्तर्वणो देशः। सर्वत्र समासानुक्तौ यथासंभवमूह्यम्।

॥ अन्तश्च ॥ ६ - २ - १८० ॥

प्रादेः परोऽन्तशब्दोऽन्तोदात्तः स्यात्। समन्तं पर्यवद्यति। प्रान्तः। प्रादिर्बहुव्रीहिर्वा।

॥ न निविभ्याम् ॥ ६ - २ - १८१ ॥

आभ्यां परोऽन्तो नान्तोदात्तः स्यात्। न्यन्तः। व्यन्तः। प्राक् - पदप्रकृतिस्वरे 'उदात्तस्वरितयोः—' (८ - २ - ४) इति स्वरितः।

॥ परेरभितोभावि मण्डलम् ॥ ६ - २ - १८२ ॥

उभयतो भवनस्वभावमभितोभावि। तद्वाचि मण्डलं परेः परमन्तोदात्तं स्यात्। परिकूलम्। परितीरम्। परिमण्डलम्। बहुव्रीहिः प्रादिरव्ययीभावो वा।

॥ प्रादस्वाङ्गं संज्ञायाम् ॥ ६ - २ - १८३ ॥

प्रात् परमस्वाङ्गार्थं नाम्न्यन्तोदात्तं स्यात्। प्रकोष्ठम्। प्रगृहम्। प्रादिर्बहुव्रीहिर्वा प्रगृहम्। स्वाङ्गे तु प्रपदम।

॥ निरुदकादीनि च ॥ ६ - २ - १८४ ॥

अन्तोदात्तानि स्युः। 'उदकोपलोलपमशकमक्षिका[1]कालककालिकातरीकतरीपपेषपर्वा निरः' (स. ८ - ४ - २०७)। निरुदकम्। निरुपलम्। इत्यादि।

1 'कालकाकालिकतरिककतरीपवेपवषा'—मुद्रिते।

निर्मक्षिकम् । निष्कालकम् । निष्कालिकः । कालात्कन् । काल्याः कनि केऽणो ह्रस्वः । निस्तरीकः । तरीं पाति तरीपः । निस्तरीपः । निष्पेषः । एषु प्रादिर्बहुव्रीहिर्वा । 'उपसर्गात् स्वाङ्गम्' (६ - २ - १७७) इति सिद्धेऽप्युक्तिरस्वाङ्गाद्ध्रुवार्था ।

(॥ अभेर्मुखम् ॥ ६ - २ - १८५ ॥

अभेः परं मुखमन्तोदात्तं स्यात् ।) अभिमुखा शाला ।

॥ अपाच्च ॥ ६ - २ - १८६ ॥

मुखमन्तोदात्तं स्यात् । अपगतं मुखमस्य अपमुखम् । अत्राव्ययीभावोऽपि ।

॥ स्फिग[1]पूतवीणाञ्जोध्वकुक्षिसीरनाम नाम च ॥ ६ - २ - १८७ ॥

स्फिगादयः षट् सीरनामानि नाम पदं च अपात् पराण्यन्तोदात्तानि स्युः । अपस्फिगम् । अप[2]पूतः । अपवीणम् । अपाञ्जः । अपाध्वा । समासान्तस्यानित्यत्वात् । 'उपसर्गादध्वनः' (५ - ४ - ८५) इत्यजभावेऽयं विधिः । अपकुक्षिः । अपसीरम् । अपहलम् । अपनाम । सर्व दिवहुव्रीह्यव्ययीभावाः ।

॥ अधेरुपरिस्थम् ॥ ६ - २ - १८८ ॥

अधेः परमुपरिस्थवाचि अन्तोदात्तं स्यात् । अध्यारूढो द्वितीयो दन्तोऽधिदन्तः । अनुपरिस्थत्वे–अधिकरणम् । कृत्स्वरः ।

॥ अनोरप्रधानकनीयसी ॥ ६ - २ - १८९ ॥

अनोः परमप्रधानार्थं कनीयश्चान्तोदात्तं स्यात् ॥ अनुगतो ज्येष्ठमनुज्येष्ठः । प्राक्पदार्थप्रधानः प्रादिसमासोऽयम । अनुगतः कनीयान अनुकनीयान् । अत्र परपदार्थप्रधानः ।

1,2 ; 'पुत'–ख पाठः ।

॥ पुरुषश्चान्वादिष्टः ॥ ६ - २ - १९० ॥

अनोः परोऽन्वादिष्टार्थः पुरुषशब्दोऽन्तोदात्तः स्यात । अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वाचितः कथितानुकथितो वा अन्वादिष्टः ।

॥ अतेरकृत्पदे ॥ ६ - २ - १९१ ॥

अतः परमकृदन्तं पदशब्दश्चान्तोदात्तः स्यात् । अतिकृशोऽश्वः । अतिपदा शक्वरी । अकृत्पदे इत्यपनीय 'अतेर्धातुलोपे' इति (लोपः?) वाच्यम् । अतिक्रान्त इति क्रमेर्लोपो धातुलोपः । तेन **'स्वतीपूजायाम्'** **(स. ३ - २ - १४७)** इति समासे अतिगार्ग्य इत्यत्र न । क्रान्तार्थेऽप्यतिकारक इत्यत्र तु स्यात् ।

॥ नेर्निधाने ॥ ६ - २ - १९२ ॥

अनिधानादन्यत्रार्थे नेः परमन्तोदात्तं स्यात् । निमूलम् । बहुव्रीहिः प्रादिर्वा । निधाने तु–निहितदण्डो निदण्डः ।

॥ इति साधारणसमासस्वरः ॥

॥ अथ स्त्रीप्रत्ययस्वरः ॥

तत्रा (ज?द)न्तात् देवाट्टित्वाङ्ङीपि **'यस्य—'**(६ - ४ - १४८) इति लोपे कृते **'अनुदात्तस्य च यत्रोदात्तलोपः'** (६ - १ - १६१) इति ङीप उदात्तत्वम् । देवी । जनित्व्यजीजनत् ।

॥ शतुरनुमो नद्यजादी ॥ ६ - १ - १७३ ॥

नुम् रहितान्तोदात्तशत्रन्तात् परा नदी अजाद्यसर्वनामस्थानविभक्ति-श्चोदात्ता स्यात् । वायो तव पृञ्चती । । पुनती । **'बृहन्महतोरुपसंख्या-नम्'** (वा) बृहती इव सूनवे । महती ।

॥ उदात्तयणो हल्पूर्वात् ॥ ६ - १ - १७४ ॥

हल् पूर्वादुदात्तस्थानजयणः परा नदी उक्तसुप् चोदात्तः स्यात् । तृच् । कर्त्री । उदात्तः । **'नकाराच्च वाच्यम्'** (वाः) वाक्पत्नी ।

॥ मतोः पूर्वमात् संज्ञायां स्त्रियाम् ॥ ६ - १ - २१९ ॥

ङयन्तस्य नाम्न्युक्तस्य मतुपः पूर्व आत् उदात्तः स्यात् । शरावती ।

॥ अन्तोऽवत्याः ॥ ६ - १ - २२० ॥

अवतीशब्दस्यान्तो नाम्न्युदात्तः स्यात । अजिरवति । राजवतीत्यत्र तु 'नलोपः सुप्स्वरः—' (८ - २ - २) इति नलोपस्यासिद्धत्वेनापत्य भावादयं स्वरो न । तेन राजस्वर एव ।

॥ ईवत्याः ॥ ६ - १ - २२१ ॥

नाम्नि स्त्रियामीवती शब्दस्यान्त उदात्तः स्यात् । मुनिवती ॥

॥ इति स्त्रीप्रत्ययस्वरः ॥

॥ फिट्सूत्राणि ॥

॥ प्रथमपादः ॥

कृदादि प्रातिपदिके स्वरान् स्त्रीप्रत्यये तथा ।
उदीर्यान्यिप्रकृत्यर्थं फिट्सूत्राणि लिखाम्यथ ।

॥ फिषोऽन्त उदात्तः ॥ १ ॥

दृषत् । उच्चैः ।

॥ पाटलापालङ्काम्बसागरार्थानाम् ॥ २ ॥

एतन्नाम्नामन्त उदात्तः स्यात् । पाटला । फलेरुहा । अपालङ्कः । आरग्वधः । अम्बा । अक्का । सागरः । समुद्रः ।

॥ गेहार्थानामस्त्रियाम् ॥ ३ ॥

अस्त्रीलिङ्गगृहार्थनामन्त उदात्तः स्यात् । गेहम् । गृहम् । स्त्रियां तु—शाला ।

॥ गुदस्य च ॥ ४ ॥

नब्विषयत्वेऽप्यन्त उदात्तःस्यात् । गुदम् ।

॥ ध्यपूर्वस्य स्त्रीविषयस्य ॥ ५ ॥

ध्यपूर्वस्य स्त्रीलिङ्गस्य प्राग्वत्स्यात् । ध्रुवका । ध्रुवका । जाया । माया ।

॥ खान्तस्याश्मादेः ॥ ६ ॥

सुखम् । दुःखम् । श्मादेस्तु–शाखा । मखः ।

॥ हिष्ठवत्सरतिशत्थान्तानाम् ॥ ७ ॥

एतदन्तानां प्राग्वत् स्यात् । मंहिष्ठामूतिम् । संवत्सराय । परिवत्सराय । आविंशत्याम् । त्रिंशता । निशीथः । भृथे हि नो त ।

॥ दक्षिणस्य साधौ ॥ ८ ॥

साध्वर्थस्यास्य प्राग्वत् स्यात् । दक्षिणः । अन्यत्र-दक्षिणो देशः ।

॥ स्वाङ्गाख्यायामादिर्वा ॥ ९ ॥

इनन्नन्तत्वादाद्युदात्तत्वप्राप्तावुक्तिः । दक्षिणो बाहुः ।

॥ छन्दसि च ॥ १० ॥

अस्वाङ्गेऽपि दक्षिणस्यादिरन्तो वा उदात्तःस्यात् । दक्षिणो (रप?) बाहुः । २ ।

॥ कृष्णस्यामृगाख्या चेत् ॥ ११ ॥

मृगनाम्नोऽन्यत्र कृष्णास्यान्त उदात्तःस्यात् । अङ्गुष्ठ कृष्ण एक शिवात् भवति । मृगाख्यायां तु—कृष्णो रा(त्र्यै?त्रियै)

॥ वा नामधेयस्य ॥ १२ ॥

अयं वां कृष्णो अश्विना ।

॥ शुक्लगौरयोरादिः ॥ १३ ॥

शुक्लस्य(पित्?नित्) स्व(र?रे) गौरस्य प्रज्ञाद्यन्तत्वादग् स्वरे च प्राप्तावुक्तिः। शुक्लः। गौरः।

॥ अङ्गुष्ठोदकबककवसा[1]नां छ[2]न्दसि ॥ १४ ॥

एषां वेदेऽन्त उदात्तः स्यात्। अङ्गुष्ठः। उदकानीव। बकः। वसा।

॥ पृष्ठस्य च ॥ १५ ॥

वेदेऽन्त उदात्तः स्यात्। पृष्ठे निनद्धः। वा भाषायाम्। पृष्ठम्।

॥ अर्जुनस्य तृणाख्या चेत् ॥ १६ ॥

अन्त उदात्त स्यात्। अर्जुनानि तृणानि।

॥ अर्य(स्य) स्वाम्याख्या चेत् ॥ १७ ॥

अर्यो मनीषाम्। वैश्ये त्वाद्युदात्तः।

॥ आशायां अदिगाख्या चेत् ॥ १८ ॥

अभिलाषार्थेऽन्तोदात्तः। दिशि त्वाद्युदात्तः।

॥ नक्षत्राणामाब्विषयाणाम् ॥ १९ ॥

अन्त उदात्तः। आर्द्रा नक्षत्रम्। आश्लेषा नक्षत्रम्।

॥ न कुपूर्वः कृत्तिकाख्या चेत् ॥ २० ॥

कृत्तिका नाम चेत् कवर्गपूर्वो नान्तोदात्तः। कृत्तिकानक्षत्रम्।

॥ घृतादीनां च ॥ २१ ॥

घृतम्। ऋतम्। पारम्। सप्त। अष्ट। आदिशब्दः प्रकारार्थः।

---

1 'शा'--सिद्धान्तकौमुदी। 2 'न्दस्यन्तः' - सिद्धान्तकौमुदी।

॥ ज्येष्ठकनिष्ठयोर्वयसि ॥ २२ ॥

अनयोर्वयोद्योतनेऽन्तोदात्तत्वम् । प्रशस्याल्पयोराद्युदात्तौ ।

॥ बिल्वतिष्य[1]योरन्तः स्वरितो वा ॥ २३ ॥

अनयोरन्त उदात्तः स्वरितो वा स्यात् । बिल्वः । तिष्यः ।

इति फिट्सूत्रे प्रथमपादः ॥

॥ द्वितीयपादः ॥

॥ अथादिः प्राक्शकटेः ॥ २४ ॥

'शकटिशकट्योः—' (फि. ६९) इत्यतः प्राग् आदिरित्यधिकारः ।

॥ ह्रस्वान्तस्य स्त्रीविषयस्य ॥ २५ ॥

आदिरुदात्तः स्यात् । वलिः ।

नब्विषयस्यानिसन्तस्य ॥ २६ ॥

कुण्डम् । वनम् । इसन्तस्य तु—सर्पिः ।

॥ तृणधान्यानां च द्व्यषाम् ॥ २७ ॥

एतद्वाचिनां द्व्यचामादिः प्राग्वत् । कुशः । काशः । व्रीहयः । मुद्गाः । अद्व्यच्त्वे तु-गोधूमः ।

॥ त्रः संख्यायाः ॥ २८ ॥

पञ्चदेवान् । चतुश्शरावः । अद्व्यच्त्वे—एकादश ।

॥ स्वाङ्गशि[2]टामदन्तानाम् ॥ २९ ॥

कण्ठः । ओष्ठः । सर्वः । विश्वः ।

1 'योःस्त्र'–सि.कौ । 2 'शिटा'-

॥ प्राणिनां कुपूर्वः ॥ ३० ॥

प्राण्यर्थानां कवर्गात् पूर्व उदात्तःस्यात । काकः । शुकः । वृकः ।

॥ खय्युवर्ण कृत्रिमाख्या चेत् ॥ ३१ ॥

कृत्रिमनामत्वे खयि परे पूर्वमुवर्णमुदात्तः स्यात् । कन्दुकः । अकृत्रिमत्वे बन्धूकः ।

॥ उनर्व[1]न्तानाम् ॥ ३२ ॥

एतदन्तानामादिः प्राग्वत् । उन-वरुणः । तरुणः । ऋ-स्वसा । वन्-शेवन् ।

॥ वर्णानां तणति नितान्तानाम् ॥ ३३ ॥

आदिः प्राग्वत् । त-एतः । हरितः । ण-शोणः । अरुणः । नि-पृश्नि । ति-शितिः नि -हरित् ।

॥ हृस्वान्तस्य हृस्वमनृत् ताच्छील्ये ॥ ३४ ॥

ऋकारादन्यत् हस्वमुदात्तं स्यात् । मुनिर्देवस्य ३ ॥

॥ अक्षस्यादेवनस्य ॥ ३५ ॥

आदिः प्राग्वत् । अक्षः । देवनस्य तु-अक्षैर्मा दीव्यः ।

॥ अर्धस्यासमद्योतने ॥ ३६ ॥

अर्धोऽशार्थ आद्युदात्तः । समार्थेऽन्तोदात्तः ।

॥ पीतद्रवर्थानाम् ॥ ३७ ॥

पीतद्रुः । सरलः ।

---

[1] 'न्त' - सि. कौ. ।

॥ ग्रामादीनाम् ॥ ३८ ॥

ग्रामे अस्मिन्ननातुरः। सोमस्य मा तवसम्। शण्डामर्कावसुराणाम् इत्यादि।

॥ लुबन्तस्योपमेयनामधेयस्य ॥ ३९ ॥

आदिरुदात्तः। तृणपुरुषतुल्यनरश्चञ्चा।

॥ न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम् ॥ ४० ॥

एषामुपमेयाख्यानामादिरुदात्तो न स्यात्। वृक्षविशेषाणाम्–ताल इव तालः। कल्पतरुः। शैलविशेषाणाम् – मेरुरिव मेरुः। मन्दरः। व्याघ्रः। सिंहः। महिषः।

॥ राजविशेष[1]स्यविषयमन्वाख्या चेत् ॥ ४१ ॥

विषयानुसारिनाम्नो राजविशेषार्थस्यादिरुदात्तः स्यात्। पञ्चालाः। अङ्गाः।

॥ लघावन्ते द्वयोश्च बह्वषो गुरुः ॥ ४२ ॥

कल्याणः। कोलाहलः।

॥ स्त्रीविषय[2]वर्णानामक्षुपूर्वाणाम् ॥ ४३ ॥

स्त्रीलिङ्गवर्णनाम्नामक्षुपूर्वाणामादिः प्राग्वत् स्यात्। श्येनी हरिणी। रोहिणी। (तरक्षुः)।

॥ शकुनीनां च लघुपूर्वम् ॥ ४४ ॥

पक्ष्यर्थानां पूर्व लघूदात्तं स्यात्। कुक्कुटः। तित्तिरिः।

॥ नर्तुप्राण्याख्यानाम् ॥ ४५ ॥

ऋतुनाम्नां प्राणिनाम्नां च यथाप्राप्तमुदात्तत्वं न स्यात्। वसन्तः। कृकलासः। वृकः।

---

1 'स्य समन्वा चेत्' - सि. कौ। 2 'वर्णाक्षुपू';

॥ धान्यानां च वृद्ध[1]क्षन्तानाम ॥ ४६ ॥

आदिरुदात्तः स्यात्। श्यामाकः। माषः।

॥ जनप[2]दानामदन्तानाम् ॥ ४७ ॥

आदिः प्राग्वत्। पाञ्चालाः। केकयाः।

॥ *हयादीनामयुक्तलान्तानामन्तः पूर्वं वा ॥ ४८ ॥

(संयुक्त) लान्तान्यहलादिपदानां पूर्वं वान्तो वोदात्तः स्यात्। पललम्। शकलम्। संयुक्तलान्तानां तु—मल्लः।

॥ इगन्तानां च द्व्यषाम् ॥ ४९ ॥

आदिः प्राग्वत्। तुविः। चरिः।

॥ इति द्वितीयपादः ॥

॥ तृतीयपादः ॥

॥ अथ द्वितीयं प्रागीषात् ॥ ५० ॥

'ईषान्तस्य हयादेः' (फि - ६७) इत्यतः प्राग् द्वितीयमुदात्तमित्यधिकारः।

॥ त्यषां[3] प्राङ्मकारात् ॥ ५१ ॥

'मकारवरूथ[4] —' (फि-५७) इत्यतः प्राक् त्यचां द्वितीयमिति (अधिकारः)।

॥ स्वाङ्गानामकुवादीनाम् ॥ ५२ ॥

अकवर्गवादीनामङ्गार्थानां त्यचां द्वितीयमुदात्तं स्यात्। ललाटम्। अलिकम्। कुφवादेस्तु-कपोलम्। वदनम्

---

1 'क्षा' सि. कौ। 2 'दशाब्द नामषान्ता' - सि;
* हयिति हल्संज्ञा। 3 'त्यचां' - सि;
4 'ढ' - सि; φ 'वां' - सि; कौ।

॥ मादी[1]नाम् ॥ ५३ ॥

त्यचां द्वितीयं प्राग्वत् । मलयः । मशकः ।

॥ शादीनां शाकानाम् ॥ ५४ ॥

शादिशाकार्थानां त्यचां प्राग्वत् । शी[2]तलः । शतपुष्पा ।

॥ पान्तानां गुर्वादीनाम् ॥ ५५ ।

पादपः । आतपः ।

॥ युतान्यण्यन्तानाम् ॥ ५६ ॥

युतम् । अयुतम् । प्रयुतम् । अशनिः । अरणिः ।

॥ मकरमरूथपरेश्वतवितस्तेक्ष्वाजि[3]द्राक्षाकलोमाकाष्ठा[4]प्रेष्ठकाशीनामादिर्वा ॥ ५७ ॥

त्यचामिति गतम् । एषामादिर्द्वितीयं वोदात्तं स्यात् । मकरः । एवमन्येष्वपि । सूत्रे पाठः शोध्यः ।

॥ छन्दसि च ॥ ५८ ॥

केषाञ्चिच्छन्दानामादिर्द्वितीयं वोदात्तं स्यात् । लक्ष्यमन्वेष्यम् ।

॥ कर्दमादी[5]नाम् ॥ ५९ ॥

आदिर्द्वितीयं वोदात्तं स्यात् । कर्दमः । आदिशब्दः प्रकारार्थः ।

॥ सुगन्धितेजनस्य ते वा ॥ ६० ॥

अस्यादिर्द्वितीयं ते वोदात्तः । सुगन्धितेजनः ।

---

1 'ना च' - सि; 2 'तकाराद्यः । 'त्या' इत्यपि ग्रन्थे ।
3 'र्जि' - सि; 4 पेष्ठा – सि;
5 'नां च' – सि;

॥ नपः फलान्तानाम् ॥ ६१ ॥

क्लीबत्वन्धिनांफलान्तानां शब्दानामादिर्द्वितीयं वोदात्तं स्यात्। राजादनफलम्।

॥ यान्तस्यान्त्यात्पूर्वम् ॥ ६२ ॥

शालेयः। राधेयः।

॥ (आ ? था)न्तस्य च नालघुनी ॥ ६३ ॥

(आद? था) न्तस्य नाशब्दो लघुश्चोदात्तौ। सनाथासभा।

॥ शिशुमारोदुम्बरवलीवर्दोष्ट्रारपुरूरवसां च ॥ ६४ ॥

एषामन्त्यात्पूर्वं द्वितीयं वोदात्तं स्यात्। शिशुमारः। एवमुदुम्बरादौ।

॥ साङ्काश्यकाम्पिल्यनासिक्यदार्वाधा[1]टानां वा ॥ ६५ ॥

एषां द्वितीयमुदात्तं वा स्यात्। साङ्काश्यमित्यादि।

॥ ईषान्तस्य हयादेरादि[2]: ॥ ६६ ॥

हयादिर्हलादिः। हलीषा। लाङ्गलीषा।

॥ उशीरदाशेर कपा[3]लशैवा[4]लभगालशरीरशरावहृदय-
हिरण्यारण्यापत्यदेवराणाम् ॥ ६७ ॥

एषां(दशानां?) आदिरुदात्तः स्यात्। उशीर इत्यादि।

॥ महिष्यषाढयोर्जायेष्टकाख्या चेत् ॥ ६८ ॥

आदिरुदात्तः स्यात्। महिषी जाया। अषाढा इष्टकाभेदः।

॥ तृतीयपादः ॥

---

1 'टानाम्' - सि; 2 'दिर्वा' - सि;
3 'लकपालशै' - सि; 4 'लभ्यामाकशरी' - सि;

।। चतुर्थपादः ।।

।। शकटिशकटयोरक्षरमक्षरं पर्यायेण ।। ६९ ।।

अनयोरच् त्रयं पर्यायेणोदात्तं स्यात् । शकटिः । शकटी ।

।। गोष्ठजस्य ब्राह्मणनामधेयस्य ।। ७० ।।

अच् त्रयं पर्यायादुदात्तं स्यात् । गोष्ठजो नाम विप्रः ।

।। पारावतस्योपोत्तमवर्जम् ।। ७१ ।।

अस्य ववर्ज पर्यायादुदात्तं स्यात् । पारावतः ।

।। धूम्रजानुमुञ्जकेशकालपालस्थालीपाकानामधूजलस्थानाम् ।। ७२ ।।

एषां ध्वाद्यन्यमुदात्तं स्यात् । धूम्रजानुः । मुञ्जकेशः । कालपालः । स्थालीपाकः ।

।। कपिकेशहरिकेश[1]योरच्छन्दसि ।। ७३ ।।

अनयोरवेद्य्चः पर्यायादुदात्ताः स्युः । कपिकेशः ।

।। न्यङ्स्वरौ स्वरितौ ।। ७४ ।।

त इत्थान्यक् पिबते । स्वः ।

।। न्यर्बुदव्यल्कशयोरादिः ।। ७५ ।।

स्वरितः स्यात् । न्यर्बुदाय स्वाहा । पाकदूर्वा व्यल्कशा ।

।। तिल्यशि[2]क्यमर्त्यकाश्मधान्यकन्याराजन्य[3]मनुष्याणामन्तः ।। ७६ ।।

स्वरितः स्यात् । तिल्यः । धान्यमसि । कन्या वाः? । (राजन्यः कृतः ।

।। बिल्वभक्ष्यवीर्याणि छन्दसि ।।७७ ।।

अन्तस्वरितानि स्युः । बिल्वः ।

---

1 'योश्छ' - सि; 2 'क्यकाश्मर्यधान्य' - सि;
3 'जमनु' - सि;

॥ त्वत्त्वसमसिमेत्यनुच्चानि ॥ ७८ ॥

एतानि सर्वानुदात्तानि स्युः । स्तरिरुस्त्वत् । उतत्वः पश्यन् । अन्यके समे ।

॥ सिमस्याथर्वणेऽन्त उदात्तः ॥ ७९ ॥

आर्द्राश्रीवासन्तस्तनुते सिमस्मै ।

॥ निपाता आद्युदात्ताः ॥ ८० ॥

अपि एवम् ।

॥ उपसर्गाश्चाभिवर्जम् ॥ ८१ ॥

परासुवः । अभेस्तु फिट्स्वरः । अभि नो देवी ।

॥ एवादीनामन्तः ॥ ८२ ॥

एवाहि त्वाम् । नूनं सा ते । पुरोहितम् ।

॥ वा[1]वादीनामुभावुदात्तौ ॥ ८३ ॥

युगपत् (सः?स्तः) । वाव । त्वाव

॥ चादयोऽनुदात्ताः ॥ ८४ ॥

च वा ह इत्यादयः ।

॥ यथेति पदान्ते ॥ ८५ ॥

तन्नेमिमृभवो यथा । अन्यत्र (न) । यथा नो अदितिः ।

। प्रका[2]रद्विरुक्तौ परस्य ॥ ८६ ॥

॥ शेषे[3] सर्वमनुदात्तम् ॥ ८७ ॥

॥ इति फिट्सूत्रे चतुर्थः पादः ॥

दिवेःपचाद्यचि चित्त्वादन्तोदात्तः । देव सु । 'अनुदात्तौ सुप् पितौ' (३-१-४) इति सुपामनुदात्तत्वम् । अत्र तु हल्मात्रस्य विसर्गे न

---

1 'चा'–सि; 2 'रादि'-सि; 3 'षम्'-सि;

स्वरभेद: । देवो वो द्रविणोदा: । देव औ । 'वृद्धौ' 'एकादेश उदात्तेनो-दात्तः' (८-२-५) । देवौ वर्धेते । सवर्ण दीर्घे जस्यप्येवम् । देवा अग्निधारयन् । सम्बोधने तु-

॥ आमन्त्रितस्य च ॥ ६-१-१९८ ॥

आदिरुदात्त: स्यात् । देवौ बर्हि: । देवौ । देवा उन्नयथ । लुमता लुप्ते प्रत्ययलक्षणमत्र नेष्टम् । सप्तागच्छत । देवं वहन्ति । देवौ । देवान् हुवे । देवेन सवित्रा । इनस्थेकारस्योकादेश उदात्त: । नस्य तु सुवनुदात्तत्वे स्वरित: । देवाभ्याम् । देवेभि: समपृक्त । देवैर्नो देवयन्ति । प्रवो देवायग्नये । देवेभ्यो हि प्रथमं देवान् । देवस्य धीमहि । देवयो: । देवानामिदमस्तु । देवे । देवेषु धिय: । इति ।

॥ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥ २-४-३२ ॥

अन्वादेशर्थस्येदमस्तृतीयादौ सुपि परेऽनुदात्त: अश् इति सर्वादेश: स्यात् । तृतीयादौ टौसामेवाजादित्वात् तेषु चान्वादेश एनादेशोऽक्तेर्हला-दिष्वेवाशदेश: । हलादिषु च हलिलोपोक्तेरकार एवास्तीत्यशादेशेऽपि रूपभेदा-भावात् स्वर एव भेद: । आभ्यामित्यादि प्रथमोक्तावुदात्तम्, उक्तस्य पुनरुक्तावनुदात्त: । आभ्यामागतम्, अथो आभ्यामासितम् ।

॥ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ २-४-३३ ॥

अन्वादेशार्थस्यै(त)द: त्रतसो: परयोरनुदात्तोऽश् स्यात्, त्रतसोश्चानु-दात्तत्वं स्यात् । त्रतसो: प्राग्दिशीयत्वात् 'एतदोऽश्' (५-३-५) इत्यशि सिद्धेऽप्यनुदात्तत्वार्थमुक्ति: । अत्र ग्रामे सुखम्, वत्स्याम: । पूर्व आद्युदात्त:, पर: सर्वानुदात्त: । यत् क्षुधितोऽसि अतो भुज्यते ।

लोकेऽप्ययमशादेशोऽस्त्यन्वादेशे तथापि तु ।
स्वरमात्रे भिदेत्येतत्सूत्रद्वयमिहोदितम् ॥

॥ सर्वस्य सुपि ॥ ६-१-१९२ ॥

सर्वशब्दस्य सुपि परे आदिरुदात्त: स्यात् । अयमस्तु सर्व: । सर्व नन्दन्ति । प्रत्ययलक्षणेनाप्ययं स्वर इष्ट: । नि सर्व सेन इषुधी: । सर्वस्वरो नाकच्कस्य वाच्य: । सर्वक: ।

इदन्तादिषु भेदो वक्ष्यते—

॥ **तिसृभ्योजसः** ॥ ६ - १ - १६६ ॥

अर्थगतबहुत्वस्य शब्दे आरोपः। अस्मात्परस्य जसोऽन्त उदात्तः स्यात्। तिस्रो वाचः। शसि भिसादिषु च **'उदात्तयणोहल्पूर्वात्'** (६ - १ - १७४) **'षट्त्रिचतुर्भ्यो हलादिः'** (६ - १ - १७९) इति चोदात्तस्य वक्ष्यमाणत्वात्। अतितिस्राविवत्यादौ **'उदात्तस्वरितयोर्यणः—'** (८ - २ - ४) इति स्वरित एव यथा स्यादिति जस इत्युक्तम्।

॥ **चतुरः शसि** ॥ ६ - १ - १६७ ॥

अस्य शसि परेऽन्त उदात्तः स्यात्। चतुरश्चिद्ददमानान्। स्त्रियां तु **'चतस्रादेश आद्युदात्तो वाच्यः'** (वा.)। चतस्रो नावः। अत्र जस्। चतस्र आशाः (प्रचन्तु?) अत्र शस्।

॥ **सावेकाचस्तृतीयादिर्विभक्तिः** ॥ ६ - १ - १६८ ॥

सप्तमी बहुवचन एकाचः शब्दस्य तृतीयादि सुबुदात्तः स्यात्। वाचा विरूपा इषे त्वा। अद्भ्यस्त्वा। साविति सप्तमीबहुवचनोक्तेः त्वया वयं प्रवत इति त्वयेत्यत्रोदात्तत्वं नेति **वृत्तिः**। प्रथमैकवचन ग्रहेऽपि त्वादेशे शेषे लोपे च। (तुरेदन्तत्वात् ? अकारान्तत्वात्) **'नगोश्वन्सावर्ण—'** (६ - १ - १८२) इति निषेधो वक्ष्यत इति प्रथमैकवचनग्रहेऽपि को दोष इतिचिन्त्यमिति **हरः**॥

॥ **अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे** ॥ ६ - १ - १६९ ॥

नित्यसमासादन्यत्रान्तोदात्तात्परपदात् परष्टाबादि सुबुदात्तः स्यात्। परमवाचा। पक्षे समासान्तोदात्तः। नित्यसमासे तु **'गतिकारक—'** (६ - २ - १३९) इति स्वरः। अग्निचित्।

॥ **चौ** ॥ ६ - १ - २२२ ॥

लुप्तनकाराकारेऽञ्चतौ परे पूर्वस्यान्तोदात्तः स्यात्। उदात्तनिवृत्तिस्वरापवादः। दधीचः पश्य। अत्र गतिपूर्वत्वे तु **"अनिगन्तोऽञ्चतौ—"**

(६ - २ - ५२) **'न्यधीच'** (६ - २ - ५३) इत्याभ्य मुक्तस्वर एवेष्ट: । तामु पराच आहु: । **'चावतद्धित इति वाच्यम्'** (वा.) दाधीच: ।

।। अञ्चेश्छन्दस्यसर्वनामस्थानम् ।। ६ - २ - १७० ।।

अञ्चेर्वेदे शिसुडन्यसुबुदात्त: स्यात्। प्रतीचो बाहून्। देवेन्द्र(चा) दधीचो अस्थिभि:। **'चौ'** (६ - १ - २२२) प्राक्पदान्तोदात्त स्वर इष्ट-प्राप्तौ विकल्प: ।

।। ऊडिदम्पदाद्यप् पुम्रैद्युभ्य: ।। ६ - १ - १७१ ।।

एभ्य उक्त: सुबुदात्त:स्यात्। प्रष्ठौह:। **ऊठ उपधात्रा इति वाच्यम्'** । (वा.) तेनाक्षद्युवा इत्यत्र न। इदं—आभ्याम्। एभिर्नो अर्कै:। पद्दन्नोमास् हृन्निश: षट् पदादय:। पदा पणीन् : या दतो धावते। असन्नादौ सुप् स्वर एव। कक्ष आसनि। उदनि क्षियन्तम्। अपो देवी:। पुंस्--पुंस: पुत्राँ उत। रै—राया वयम्। दिवस्पृथिव्योरवसा।

।। झल्युपोत्तमम् ।। ६ - १ - १८० ।।

षट्संज्ञेभ्यस्त्रिचतुर्भ्यां च परो यो झलादि: सुप्। तदन्ते पदेऽन्त्यात्पूर्वमुदात्तं स्यात्। षट—दशभि:सोमपेयम्। गीर्भिस्तिसृभि:। पाहि चतसृभि: चतुर्भि: साकम्।

।। विभाषा भाषायाम् ।। ६ - १ - १८१ ।।

एतदुदात्तत्वं लोके वा स्यात्। पञ्चभि:।

।। अष्टनो दीर्घात् ।। ६ - १ - १७२ ।।

दीर्घान्तादष्ट (न) शिससुडन्यसुबुदात्त: स्यात्। अष्टाभिर्दशभि:। धृतादित्वादन्तोदात्तोऽष्टन्, तस्य झल्युपोत्तमापवाद:। अदीर्घात्तुअष्टसु। **'शतुरनुमो नद्यजादी'** (६ - १ - १७३) इत्यजादि सुप उदात्तत्वम्। पुनता। बृहन्महतोरुपसंख्यानाद्बृहता रथेन। महते धनाय।

।। उदात्तयणो हल् पूर्वात् ।। ६ - १ - १७५ ।।

कर्त्रा देवेन। सवित्रा।

॥ नोङ् धात्वोः ॥ ६ - १ - १७५ ॥

ऊङ धातु पर हल् पूर्वोदात्तयणः परोऽजादिरुक्तसुबुदात्तो न स्यात् । वामोर्वा । कंसल्वा । अत्रोदात्तयोर्यणि कृते **'उदात्त स्वरितयोः—'**(८ - २ - ४) इति स्वरितः ।

॥ नामन्यन्यतरस्याम् ॥ ६ - १ - १७७ ॥

मतुपि ह्रस्वरुपादन्तोदात्तात्परो नाम् उदात्तो वा स्यात् । वायूनाम् ।

॥ ङ्याश्छन्दसि बहुलम् ॥ ६ - १ - १७८ ॥

वेदे ङयन्तात्परो नाम् बहुलमुदात्तः स्यात् । देवसेनानामभिभञ्जतीनाम् । वेशो नदीनाम् ।

॥ षट्त्रिचतुर्भ्यो हलादिः ॥ ६ - १ - १७९ ॥

एभ्यःपरो हलादि सुबुदात्तः स्यात् । षड्भिर्हूयमानः । पञ्चानां त्वा पञ्चजनानाम् । उत त्रिषु । शीर्षा चतुर्गाम् ।

॥ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ ६ - १ - १८२ ॥

'सावेकाचः—' (६ - १ - १६८) **'अन्तोदात्तात्—'**(६ - १ - १६९) **'ह्रस्वनुड्भ्याम्—'** (६ - १ - १७६) इत्येभिर्यदुक्तं तन्न स्यात् । गवां नेत्री । गोभ्यो गातुम् । सुगुना शुना । परमशुना । सौ प्रथमैकवचनेऽवर्णान्तात्– तेभ्यो गोधाः । त्वया वयं प्रवतः । स गृणानो अद्भिर्देववान् राजेः क्विपि राट् । राजा । परमराजा । अङिति सनकारोक्तेः क्विनि नलोपहीनपूजाञ्चतिग्रहः । प्राञ्चा । नलोपे तूदात्तः स्यात् । प्राचा । कुञ्चा परमकुञ्च । कृदिति कृञ् कृन्ततिर्वा क्विबन्तः । कृता । सत्कृता ।

॥ दिवो झल् ॥ ६ - १ - १८३ ॥

दिवः परो झलादिः सुबुदात्तो न । द्युभिरक्तुभिः । **'सावेकाचः—'** (६ - १ - १६८) इति **'ऊडिदं—'** (६ - १ - १७१) इत्यस्य वा अपवादः ।

॥ नृचान्यतरस्याम् ॥ ६ - १ - १८४ ॥

नृशब्दात् झलादिः सुब् तोदात्तो वा स्यात् । नृभिः सोम प्रमः ।

।। पथिमथोः सर्वनामस्थाने ।। ६ - १ - १९९ ।।

इन्यन्तयोरनयोः सर्वनामस्थाने आदिरुदात्तः स्यात् । अयं पन्था अनु (वि?पि)त्तः । मन्थाः । प्रत्ययलक्षणमत्र न । पथि प्रियः ।

।। युष्मदस्मदोर्ङसि ।। ६ - १ - २११ ।।

मदिगन्तयोरनयो र्ङसि पर आदिरुदात्तः स्यात् । मारिषा मायं तव । तन्वे मम ।

।। ङयि च ।। ६ - १ - २१२ ।।

(तं?) अनयोर्ङयि परे आदिरुदात्तः स्यात् । तुभ्यं दक्ष । मह्यं त्वादुः ।

।। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।। ७ - १ - ७५ ।।

दध्ना तनक्ति सेन्द्रत्वाय । अल्लोपे सत्युदात्तनिवृत्तिस्वरः ।

।। चतुरनडुहोरामुदात्तः ।।

चत्वार ऊं । बिभ्रतीम् गामनड्वाहम् । 'आगमा अनुदात्ता' इत्यामोऽनुदात्तत्वे प्राप्त उक्तिः ।

।। आमन्त्रितस्य च ।। ८ - १ - १९ ।।

संबोधनरूपस्य पदस्य पदात्परस्य पादादौ स्थितस्य सर्वस्यानुदान्तत्वं स्यात् । उताग (त?) श्चक्रुषम् देवाः । पादादौ तु न । देवा जीवयथ । अत्रामन्त्रिताद्युदात्तत्वमेव । वाक्यादावपि नेष्टः । एवं युष्मदस्मदादेशानां वानावादीनामपि सर्वानुदात्तत्वं ज्ञेयम् । तौ तं वां रथम्?

।। आमएकान्तरमामन्त्रितमनन्तिके ।। ८ - १ - ५५ ।।

आम् प्रतिवाक्ये इत्युक्तामः परमामन्त्रितमेकान्तरमनन्तिकेस्थितं न निहन्यते । आम् पचसि देवदत्त ३ भोः । अन्तिके तु—आम् (पचसि?) देवदत्त ।

'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (८ - १- ७३)

इति विशेष्यरूपसंबोधनस्यासिद्धत्वाभावात् अग्ने पावक रोचिषेत्यादौ पावकस्य निघतः स्यात् ।

॥ विभाषितं विशेषणे बहुवचनम् ॥ ८ - १ - ७४ ॥

विशेषणवाचिनि समानाधिकरणे सम्बोधने विशेष्यं जसन्तं संबोधनमसद्वा न स्यात् । सा............। असद्वत्वे देवा गातु विदः इति ।

॥ तिङो गोत्रादीनिकुत्सनाभीक्ष्ण्ययोः ॥ ८ - १ - २७ ॥

(तिङो) गोत्र ब्रुवप्रवचनप्रकथनप्रसह[1]नप्रत्यायनप्रचक्षणविचक्ष[2]णावचक्षण स्वाध्यायभूयिष्ठानि (स. ८ - ३ - १९९) तिङन्तात् पराण्येतानि कुत्साभीक्ष्ययोरर्थयोर्निहन्यन्ते । (प?व) चति गोत्रमन्नलिप्सुः । (पःव) चिर्व्यक्तीकरणे । अन्नलाभार्थं स्वगोत्रं प्रकाशयतीति निन्दा । एवं स्तौति गोत्रम् । आभीक्ष्ण्ये—स्तौतिस्तौति गोत्रं भक्तस्य । जल्पति ब्रुवम् । अत्र निन्दायामेव । वचति प्रवचनमित्यादावात्मप्रशंसया निन्दा । 'वा नाम' (वा.) । वचति नाम । पक्षे 'नब्विषयस्य—' (फि. २६) इत्याद्युदात्तम् । सर्वत्र गोत्रादिग्रहणेकुत्साभीक्ष्ण्ययो (रनयो?) रेव कार्यं स्यादिति वृत्तिः ।

इति सुप्स्वरः ॥

अथ तिङन्तस्वरः ॥

तत्र भूधातोर्लटि तिपि शपि च कृते तयोः पित्वेनानुच्चत्वात् धातुस्वर एव शिष्यते । (भवत्यात्मना पित्स्वेवम्?) तसादौ तु—

॥ ताशनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमाहन्विङोः ॥ ६ - १ - १८६ ॥

तास्यादेः परं लसार्वधातुकमनुच्चं स्यात् ह्नुङिङोस्तु न । अदुपदेश इति शब्दादिरुक्तः । तेनात्र शपः परत्वात्तसादेः प्रत्ययस्वराभावः । भवतः, भवन्तीत्यादि । लिङि तु— 'यासुट् परस्मैपदेषु' (३ - ४ - १०३) इति

---

1 मन्त्राधिन्यय —मुद्रितं । 2 'णस्वा' मुद्रिते ।

यासुट उच्चत्वात् तदादेशेनेया सह शप एकादेशे सत्ये (के ? का) रस्योच्चत्वम्। भवेत्। भवेतामित्यादि। लोटि लङ्वत्। लङि लुङि च 'लुङ् (लङ् लृङ्) क्षु—' (६ - ४ - ७१) इत्यट उच्चत्वम्। अभवत्। अभूत्। (इदम्?)। लिटि—णलोर्लित्स्वरः। बभूव। अतुसादौ प्रत्ययस्वरः। बभूवतुः। बभूवुः। थलि तु—

॥ थलि च सेटीडन्तो वा ॥ ६ - १ - १९६ ॥

सेट् थलन्ते पदे आदिरिडन्तो वोच्चः स्यात्। सर्वत्र विकल्पाल्लित् स्वरश्च। मखवन् बभूविथ। सेटीत्युक्तेः **'बभूथाततन्थ—'** (७ - २ - ६४) इत्यनिटि तु लित्स्वर एव। उभे बभूथ। अथुसादौ प्राग्वत्। आशीर्लिङि-या सुट् स्वरः। भूयात्। भूयास्तामित्यादि। लुटि - डायामुदात्तानिवृत्तिस्वरः। अन्येषु **'तास्यनुदात्तेत्—'** (६ - १ - १८६) तासेः परस्यानुच्चत्वात् तासिरेवोच्चः। भविता भवितारौ इत्यादि। लृटि—स्यप्रत्ययस्वरः। भविष्यति। लृङि—अट् स्वरः। अभविष्यत् इति।

अनुदात्तेतः परस्य लसार्वधातुकस्यानुच्चत्वम् आस्ते। ङितः—शेते (निपद्यमानास्य?) अह्नन्विङोरित्युक्तेः—ह्नुते। यदधीते। स्वरः सति शिष्ट इत्यत्राविकरणस्येत्युक्ते पुनीतम् इत्यादौ लादेशे कृते पश्चाद्विहित-स्यापि श्नाविकरणस्वरस्य बलवत्वाभावात् तस एव स्वरः इति।

॥ आदिः सिचोऽन्यतरस्याम् ॥ ६ - १ - १८७ ॥

सिजन्तस्यादिरुच्चो वा स्यात्। मा हि कार्ष्टाम्। मा हि कार्ष्टाम्। एक आद्युच्चः। अन्योऽन्तोच्चः। मा हि लोविष्टाम्। एको मध्योच्चः। (अन्य आद्युच्चः)। 'अनिट्सिचः पिति वा वाच्यम्' (वा.) मा हि का (र्षीः ? र्षम्)। (धि ? पि) त्वाद्धातुस्वरे प्राप्त उक्तिः।

॥ स्वपादिहिंसामच्यनिटि ॥ ६ - १ - १८८ ॥

स्वपादेर्हिंसेश्चाजादावनिटि लसार्वधातुके परे आदिरुच्चो वा स्यात्। स्वपन्ति। अनचि – स्वप्यात्।

स्वपिः श्वसिरनिः सस्तिः संस्तिर्वाष्टिरितीह षट ।
स्वपादयस्त्रयोऽत्रान्त्याश्छान्दसा इति केचन ॥

॥ अभ्यस्तानामादिः ॥ ६ - १ - १८९ ॥

एषामजादावनिटि लसार्वधातुके आदिर्नित्यमुच्चः स्यात् । दंदति । जक्षति ।

॥ अनुदात्ते च । ६ - १ - १९० ॥

उदात्तहीने लसार्वधातुके परेऽभ्यस्तानामादिरुच्चः स्यात् । दधाति पुत्रः । बहुव्रीह्यक्तिर्मा हि स्म दधादित्यादौ तिप इलोपेऽप्याद्युदात्ततार्था ।

॥ भीह्रीभृहुमदजनधनदरिद्राजागरांप्रत्ययात् पूर्वं पिति ॥ ६ - १ - १९२ ॥

अभ्यस्तानामेषां पिति लसार्वधातुके परे प्रत्ययात् पूर्वमुच्चः स्यात् । बिभेति । जिह्रेति । बिभर्ति । जुहोमि ते । ममत्तु नः । **'बहुलं छन्दसि'** (२ - ४ - ७६) इति शपः श्लुः । जजनदिन्द्रम् । दधनद्धनिष्ठा । अनयोर्लेट् ।

॥ अचः कर्तृयकि ॥ ६ - १ - १९५ ॥

उपदेशेऽजन्तानां धातूनां कर्मकर्तृयकि आदिरुच्चो वा स्यात । लूयते व्रीहिः स्वयमेव । आद्युच्चत्वाभावे लसार्वधातुकानुच्चत्वे यकः स्वरः **'जनसन(ख)नामात्वमुपदेशवदिष्टः'** (वा०) । जयते स्वयमेवेत्यादि ।

॥ चङ्यन्यतरस्याम् ॥ ६ - १ - २१८ ॥

चङन्तस्योपान्त्यमुच्चं वा स्यात् । मा हि चीकरत् । पक्षे चङः प्रत्ययस्वरः । अपित्त्वचङोऽदुपदेशत्वात् **'तास्यनुदात्तेत्'**—(६ - १ - १८६) इति तामादेरनुच्चत्वम् । मा हि चीकरताम् । इत्यादि ।

॥ तिङ्ङतिङः ॥ ८ - १ - २८ ॥

अतिङन्तात्परं तिङन्तं निहन्यते । अग्निमीळे । तिङः परत्वे तु न । यक्षियासि च वायुम् ।

॥ न लुट् ॥ ८ - १ - २९ ॥

अतिङन्ताल्लुडन्तं तु तिङन्तं न निहन्यते।
तेन तासेः स्वरे चाहं कर्तास्मि हरिसेवनम् ॥

॥ निपातैर्यद् यदि हन्त कुविन्नेच्चेच्चण्कच्चिद्यत्र[1]युक्तः ॥ ८ - १ - ३० ॥

यदादिनिपातैर्युक्तस्तिङ न निहन्यते। यन्मन्यसे वरेण्यम्। (य?) यदीदग्ने प्रति त्वं देवे हव्याः?। कुविच्छकत्। कुवित्करत्। ने देवमा-युनजन। अन्यश्चेन्नाभिगच्छति। अत्र नेच्चेदित्यनयोर्निपातसमुच्चयत्वात् पदद्वयत्वेऽपिनिषेधः स्यादेव। चण् यद्यर्थः। त्वं च सोम नो वच्शः। त्वं चेद् वश उश्याः। कामयेथा इत्यर्थ। अचित्तिभिश्चकृमा कच्चिदागाः। यत्र बाणाः सम्पतन्ति। युक्तमित्युक्तेः यत्र क्वच ते मनो दक्षं दधस उत्तरमित्यत्र न। अत्रहि यत्रेत्यस्योत्तरमित्यनेन साक्षात्सम्बन्धः। हन्तो नु किमाससे हन्ताहं पृथिवीमिमां निदधानीत्यनयोश्छान्दसत्वान्निघात इति हरः ॥

॥ नह प्रत्यारम्भे ॥ ८ - १ - ३१ ॥

प्राक्प्रेरितस्य धिक्कारे ह्युपालम्भार्थमस्य तु।
सनिषेधं पुनर्वाक्यं प्रत्यारम्भः प्रकीर्तितः॥
तस्मिन्नर्थे नहयुतं तिङन्तं न निहन्यते।
कृष्ण भुङ्क्ष्वेति मात्रोक्ते नाहं भोक्ष्य इतीरिते।
कुपिता सा यशोदाह कृष्ण त्वं नह भोक्ष्यसे।

॥ सत्यं प्रश्ने ॥ ८ - १ - ३२ ॥

सत्ययुक्तं तिङन्तं तु प्रश्नेऽर्थे न निहन्यते। सत्यं भोक्ष्यसे कृष्ण।

॥ अङ्गाप्रातिलोम्ये ॥ ८ - १ - ३३ ॥

आनुकूल्येऽङ्गयुक्तस्तिङ न निहन्यते। अङ्ग हरिंस्मर। प्रातिलोम्ये तु–अङ्ग प्रलपेदानीम् ज्ञास्यसि।

---

1 'युक्तम्' काशिका पाठः।

॥ हि च ॥ ८ - १ - ३४ ॥

हियुक्तस्तिङुक्त्यर्थे न निहन्यते । (वि ? स) हि (सो ? सा) तोरसृक् क्षता ।

॥ छन्दस्यनेकमपि साकाङ्क्षम् ॥ ८ - १ - ३५ ॥

वेदे हि युक्तं साकाङ्क्षं तिङन्तमनेकमेकमपि न निहन्यते । अनृतं हि मत्तो वदति । पाप्मा एनं विपुनाति । अत्र द्वावपि न निहतौ । अजांह्यग्नेरजनिष्टगर्भम् । सा वा अपश्यज्जनितारमग्रे । अत्राद्यमाद्युच्चम् । अ[ग्नि? न्यन्नि] हतम् ।

॥ यावद्यथाभ्याम् ॥ ८ - १ - ३६ ॥

आभ्यां युक्तं तिङन्तं न निहन्यते । यावत् स्तोतृभ्यो अरदः । यथा नो अदितिः करत् । अत्रानिपातस्यापि यावतो ग्रह इति हरः । यावतोऽश्वान प्रतिगृह्णीयात् । युक्त इत्युक्तेरनयोः परत्वेऽपि........।

॥ पूजायां नानन्तरम् ॥ ८ - १ - ३७ ॥

प्रशंसायां यावद्यथाभ्यां युक्तमनन्तरं तिङन्तमनिहतं न, निहतमेव । यावदर्चति हरिं चारु । यथार्चति सुष्ठु । सान्तरे तु न निघातः । यावत्कृष्णमर्चति ।

॥ उपसर्गव्यपेतं च ॥ ८ - १ - ३८ ॥

पूजायां यावद्यथा युक्तं प्राग्व्यवहितमनन्तरं तिङन्तं निहतमेव । यावत्प्रार्चति शोभनम् । यथा प्रार्चति । सान्तरे तु—यावद्भक्तः प्रार्चति चारु ।

॥ तु पश्यपश्यताहैः पूजायाम् ॥ ८ - १ - ३९ ॥

प्रशंसाद्योतकैरेतैर्युक्तस्तिङ तत्र नो हतः ।
भक्तस्तु भजते कृष्णमेवं पश्यादिषूह्यताम् ॥

॥ अहो च ॥ ८-१-४० ॥

प्रशंसायामहोयुक्तं तिङन्तं न निहन्यते ।
अहो कृष्णो याति चारु पुष्णन् गोकुलसम्मुदम् ॥

॥ शेषे विभाषा ॥ ८-१-४१ ॥

पूजार्थादन्यत्राहो युक्तस्तिङ वा न निहन्यते ।
अहो श्लोकं करिष्यसि । असूयात्रार्थः ।

॥ पुरा च परीप्सायाम् ॥ ८-१-४२ ॥

पुरायुक्तं तिङन्तं तु त्वरायां वा निहन्यते ।
गच्छ कृष्ण पुरा याति मातेत्यूचे हरिं बलः ॥

पुरेति भविष्यदासत्तौ । भाविनोमात्रागमनस्याचिरकालत्वोक्त्यात्र त्वरा द्योत्यते ।

॥ नन्वित्यनुज्ञैषणायाम् ॥ ८-१-४३ ॥

अनुज्ञाप्रार्थनायां द्योत्यायां ननुयुक्तस्तिङ् न निहन्यते । ननु हरिं पूजयामि भोः । हरि पूजां प्रति मामनुजानीहीत्यर्थः ।

॥ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ॥ ८-१-४४ ॥

क्रियाप्रश्नार्थकियुक्तमनुपसर्गमप्रतिषिद्धं न निहन्यते । किं कृष्णः क्रीडति । अत्रानेकक्रियाप्रयोगेऽपि सर्वत्र किमर्थयोगादनिघातः स्यादेव । किं कृष्णः क्रीडत्युत गाश्चारयति । प्रादियोगे तु किं प्रक्रीडति । पृच्छ्यमाननिषेधे तु-किमयं न क्रीडति ।

॥ लोपे विभाषा ॥ ८-१-४५ ॥

किमो लोपे प्रागुक्तविशेषणस्तिङ्वा निहन्यते । कृष्णः क्रीडत्याहो-स्वित् । गाश्चारयति । अत्र किमर्थयोगेऽपि तदप्रयोगो लोपः ।

॥ एहिमन्ये प्रहसे लृट् ॥ ८-१-४६ ॥

एहिमन्ये इत्यनेन युक्तो लृडन्तस्तिङ परिहासे द्योत्ये न निहन्यते ।

जेता भविष्यसीति त्वमेहिमन्येऽध दानव ।
प्रहासे (च?चैव) पुरुषव्यत्ययोऽत्र पुरोदितः ।।

॥ जात्वपूर्वम् ॥ ८ - १ - ४७ ॥

अविद्यमानपूर्वजातुयुक्तस्तिङ न निहन्यते । जातु हरिं द्रक्ष्यसि । सपूर्वत्वे तु—हरिं जातु द्रक्ष्यसि ।

॥ किंवृत्तं च चिदुत्तरम् ॥ ८ - १ - ४८ ॥

चित्परापूर्वकिवृत्तयुक्तस्तिङ् न निहन्यते ।
कश्चित्कृष्णं सेवतेऽत्र तत्रकश्चिद्विमुच्यते ।।

॥ आहो उताहो चानन्तरम् ॥ ८ - १ - ४९

अपूर्वाभ्यामाभ्यां युक्तोऽनन्तरास्तिङ न निहन्यते । आहोभजति हरिम् । उदाहो भजति । स त्वभक्त आहो भजति ।

॥ शेषे विभाषा ॥ ८ - १ - ५० ॥

अपूर्वाभ्यामाहो उताभ्यां युक्तस्तिङ सान्तरत्वे वा न निहन्यते । आहो भक्तः सेवते हरिम् । उताहो भक्तः सेवते ।

॥ गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ८ - १ - ५१ ॥

गत्यर्थलोटा सहितं लृडन्तं न निहन्यते ।
सर्वमन्यन्न चेदत्र कारकं स्याद् द्वयोस्तिङो ।।
कारकोक्त्यात्र गृह्येते संभवात्कर्तृकर्मणी ।
आगच्छ कृष्णाटवीं त्वं तत्र गाः पालयिष्यसि ।।
उह्यतां भवता क्षीरं त्वयैवैतत् तु पास्यते ।
सर्वान्यत्वे याहि कृष्ण पिता ते भोक्ष्यते घृतम् ।।
सर्वग्रहादेकमात्रे त्वन्यस्मिन्न निहन्यते ।
आगच्छ कृष्ण त्वं चाहं चापि रंस्यावहे वने ।।

॥ लोट् च ॥ ८ - १ - ५२ ॥

कारकानन्यत्वे गत्यर्थलोटा युतो लोट् न निहन्यते । आगच्छ कृष्ण त्वं वनं पश्यैतत् । आगम्यतां रामेण वनं दृस्यतामिदम् ।

॥ विभाषितं सोपसर्गमनुत्तमम् ॥ ८ - १ - ५३ ॥

उक्तलोडन्तं सोपसर्गं तूत्तमवर्जितं वा न निहन्यते । आगच्छ हरे व्रजं प्रविश । उत्तमे तु—आगच्छानि हरे व्रजं प्रविशानि ।

॥ हन्त च ॥ ८ - १ - ५४ ॥

हन्तयुक्तं सोपसर्गमनुत्तमं लोडन्तं वा न निहन्तते । हन्त प्रविश । उत्तमे सोपसर्गे 'च निपातैर्यद्यदि-' (८ - १ - ३०) इति नित्यनिषधः स्यात् ।

॥ यद्धि तु परं छन्दसि ॥ ८ - १ - ५६ ॥

वेदे यद्धि तु परं तिङन्तं न निहन्यते । गवां गोत्रमुदसृजो यदङ्गिरः । इन्दंको वामुशन्ति हि । आख्यास्यामि तु—'निपातैर्यद्यदि—(८ - १ - ३०) 'हि च' (८ - १ - ३४) 'तु पश्य'—(८ - १ - ३९) इति च सिद्धेऽप्युक्तिरेभिरेव परैर्योगे निघाताभाव इति नियमार्था । तेन—' जाये स्वारोहावैहीत्यत्र एहीति गत्यर्थ लोड्युक्तस्य रोहावेति लोटो निघात निषेधो न ।

॥ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ८ - १ - ५७ ॥

एषु परेष्वगतेः परं तिङन्तं न निहन्यते । हरिः क्रीडति च न । हरिः क्रीडति चित् । हरिः क्रोडतीव । अन्नलिप्सुः स्तौति गोत्रम् । वाचाटो जल्पति व्रुवमित्यादि । कुत्साभीक्ष्ण्ययोरेव तद्धितोऽनुच्चो ग्राह्यः । दुस्सूदः पचति कल्पम् । चाग्मी स्तौति स्तौति । गतेः परत्वे तु—हरिः प्रक्रीडति च न । अत्र गत्युक्तेः सगतिरपि तिङित्यत्रोपसर्गग्रहो ज्ञेयः । तेन शुक्लीकरोति चनेत्यत्र निघातनिषेधः स्यात ।

॥ चादिषु च ॥ ८-१-५८ ॥

चवाहाहैवेषु परेष्वगतेः परस्तिङ् न निहन्यते। हरिः क्रीडति च गायति च। हरिर्याति वा तिष्ठति वा। एवं हरिः क्रीडत्यहेत्यादि।

॥ चवायोगे प्रथमा ॥ ८-१-५९ ॥

आभ्यां योगे आद्या तिङ्विभक्ति न निहन्यते। गां चानयति वेणुं च गायति। गां वा नयति वेणुं वा गायति। प्रथमेत्युक्तेर्बहुष्वप्याद्यस्यैवानिघातः।

॥ हेति क्षियायाम् ॥ ८-१-६० ॥

अस्यां द्योत्यायां ह युक्त आद्यस्तिङ न निहन्यते। स्वयं ह तिष्ठति। उपाध्यायं चारयति।

॥ अहेति विनियोगे च ॥ ८-१-६१ ॥

अनेकफलनियोगे क्षियायां च द्योत्यायां अहयुक्ताद्यस्तिङ न निहन्यते। त्वमह ग्रामं गच्छ (त्वमहारण्यं गच्छ) ॥ प्रैषे[1]प्लुतः। स्वयम तिष्ठति उपाध्यायं चारयति।

॥ चाहलोपएवेत्यवधारणम् ॥ ८-१-६२ ॥

अवधारणार्थैवशब्दप्रयोगे सति चाहलोप आद्यस्तिङ न निहन्यते। समुच्चयकेवलार्थौ चाहौ। हरिरेव व्रजं यातु हरिरेव वनं यातु। व्रजं च वनं चेत्यर्थः। अहलोपे—हरिरेव वनं यातु राम एवारामं यातु। वनं केवलं हरिः। रामः केवलमाराममित्यर्थः। अर्थयोगेऽप्यप्रयोगो लोपः। अवधारणादन्यत्र—क्वेव भोक्ष्यते। 'एवे चानियोगे' (वा) इति पररूपम्।

॥ चादिलोपे विभाषा ॥ ८-१-६३ ॥

चवाहाहैवलोपे आद्यतिङ् वा निहन्यते। चलोपे—शुक्ला व्रीह्यो भवन्ति, श्वेता गाव आज्याय दुहन्ति। अत्र भवन्तीति वा निहन्यते। वा लोपे—व्रीहिभिर्यजेत, (यवैर्यजेत)।

---

1 'क्षियाशीः प्रैषेषु तिङाकाङ्क्षम' (८-२-१०४)

॥ वैवावेति च छन्दसि ॥ ८ - १ - ६४ ॥

छन्दस्याभ्यां युक्ताद्यतिङ् वा न निहन्यते। बृहस्पतिर्वैदेवानां पुरोहित आसीच्छण्डामर्कावसुराणाम्। अयं वाव हस्त आसीन्नेतर आसीत्।

॥ एकान्याभ्यां समर्थाभ्याम् ॥ ८ - १ - ६५ ॥

(आभ्यां) योग आद्या तिङ्विभक्तिर्वेदे वा न निहन्यते। अजामेकां (का?) जिन्वत्यूर्जमेका रक्षति। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति। अतुल्यार्थत्वे—एको देवानुपतिष्ठते।

॥ यद्वृत्तन्नित्यम् ॥ ८ - १ - ६६ ॥

यच्छब्दाज्जातं सर्वं यद्वृत्तम्। तस्मात्परस्तिङ् नित्यमंनिहतः स्यात्। यो यजाति। यं रक्षति प्रचेतसः। यदेदयुक्त(?)। यत्कामास्ते जुहुमः। य यद्र्यङ् वायुः पवते। पञ्चम्युक्तत्वेऽप्यत्र व्यवहितेऽपि कार्यमिष्टम।

॥ सगतिरपि तिङ् ॥ ८ - १ - ६८ ॥

सगतिरगतिरपि काष्ठादिभ्यः परस्तिङ् निहन्यते यत्काष्ठं प्रदहति। यत्काष्ठं दहति। यद्दारुणं निहन्ति। यद्दारुणं हन्तीत्यादि। 'तिङतिङः' (८ - १ - २८) इति निघातस्य 'निपातैर्यद्यदि—'(८ - १ - ३०) इतिनिषेधे प्राप्त उक्तिः। सगतिरित्युक्तेर्गतिरपिनिघात इति हरः। गतिशब्देनात्रोपसर्गएवोक्तः। तेन—यत्काष्ठं शुक्लीकरोतीत्यादौ न।

॥ कुत्सने च सुप्यगोत्रादौ ॥ ८ - १ - ६९ ॥

पदादिति गतम्। गोत्रादि वर्जिते सुबन्ते परे सगतिरगतिरपि तिङ् कुत्सने निहन्यते। 'क्रियाकुत्सन इति वाच्यम्' (वा.) प्रपचति पूति। (पूति) रन्तोच्च इष्ट:। गोत्रादौ पचति। गोत्रमित्यादि कर्तृकुत्सने—पचति यतिः। 'बह्वर्थं वा निहन्यत इति वाच्यम्' (वा.)। पचन्ति पूति। 'आमन्त्रितं पूर्वमविद्यमानवत्' (८ - १ - ७२) इति संबोधनस्यासद्वत्त्वात् अग्ने याहि सुशस्तिभिः। इन्द्र पिं तुभ्यं सुतो मदायेत्यादौ(?) 'तिङतिङः' (८ - १ - २८) इति निघातो नः।

एवं यावत्सखे पूजयसि हरिमित्यादौ **'पूजायां नानन्तरम्'** (८ - १ - ३७) इत्यनिघातनिषेधः स्यादेव ।

॥ इति तिङन्तस्वरः ॥

स्व[1]रान्पदाश्रितानेवमुक्त्वा[2] संक्षेपतः पुनः ।
एकश्रुत्यादिकान् वाक्यविषयान् ब्रूमहेऽधुना ॥

॥ एकश्रुतिदूरात्संबुद्धौ ॥ १ - २ - ३३ ॥

दूरात्संबोधनार्थं वाक्यं प्रचयरूपं स्यात् । वाक्यस्य सुप्तिङन्तात्मकत्वात् स्वरत्रये प्राप्त उक्तिः । एहि कृष्ण । अत्रान्त्यवर्जितानामचामेकस्वरत्वम् । अन्त्याचस्तु—**'दूराद्धूते च'** (८ - २ - ८४) इति प्लुते **'वाक्यस्यटेः प्लुत उदात्तः'** (८ - २ - ८२) इति प्लुतस्योच्चत्वम् । एहिकृष्णा । एवं **'प्रत्यभिवादेऽशूद्रे'** (८ - २ - ८३) इत्यादि प्लुतस्याप्युच्चत्वम् । आयुष्मान् भव (ता?) नारायणा अ ।

॥ अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥ ८ - २ - १०० ॥

प्रश्नवाक्यस्यान्ते अभिपूजिते च प्लुतस्यानुच्चत्वं स्यात् । अद्या आगमा(:) । **'अनन्त्यस्यापि प्रश्नाख्यानयोः'** (८ - २ - १०५) इति प्रश्ने सर्वपदानां स्वरितः प्लुत उक्तः । तत्रान्त्यस्यानुच्चत्वमुच्यते । तस्य स्वरितत्वमपि वेति वाच्यम् । शोभनोऽसि कृष्णा । अत्र **'दूराद्धूते च'** (८ - २ - ८४) इति प्लुत इति हरः । तस्यानुच्चत्वमात्रमेत्रानेनोच्यते । **'एचोऽप्रगृह्यस्य—'** (८ - २ - १०७) इति प्लुतविकारे—आगमा हरा इ, आगमा विष्णा उ । भद्रोऽसि हरा इ। भद्रोऽसि विष्णा उ । अत्रान्त्ययोः स्वारानुच्चौ । अनयोरनुच्चतैव ।

॥ उपरिस्विदासीदिति च ॥ ८ - २- १०२ ॥

यत्र **'विचार्यमाणा नाम्** । (८ - २ - ९७) इति प्राप्तस्य प्लुतस्यानुच्चतोच्यते । उपरिस्विदासीत् । पूर्वत्राधःस्विदासीदित्यत्र प्लुतस्तूदात्त एव ।

---

1 'एवं स्वरान्'—ख पाठः । 2 'क्त्वा स्वरान्'—ख पाठः ।

'स्वरितमाम्रेडिते—' (८ - २ - १०३) इत्यादि प्लुतस्य स्वारत्वम् । उज्ज्वला उज़्ज्वल का तव शोभा इत्यादि । इति ।

।। यज्ञकर्मण्यजपन्यूङ्खसामसु ।। १ - २ - ३४ ।।

यज्ञे जपादेरन्यत्र प्रचयः स्यात् । तेन याज्यापुरोऽनुवाक्यादेरेकस्वरत्वम् । अग्निमू (र्धा?र्धा) दिवः ककुत्पतिः । पृथिव्या अयम् । अपां रेतांसि जिन्वतो म् । अत्रान्त्यस्य प्लुतरूपे प्रणवे **'वाक्यादेः—'**(८ - १ - ८) इत्युच्चत्वम् । जपादौ तु यथाप्राप्तः स्वर एव ।

।। उच्चैस्तरां वा वषट्कारः ।। १ - २ - ३५ ।।

यज्ञे वौषट् शब्दः उच्चैस्तरां, प्रचयो वा स्यात् । प्रचयात् किञ्चिदुच्चत्वमुच्चैस्तरत्वम् । जिह्वामग्ने चकृषे हव्यवाहना वौषट् । अत्र **'याज्यान्तः'** (८ - २ - ९०)**'ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः'** (८ - २ - ९१) इति च प्लुतयोः प्राग्वदुच्चत्वम् । वौषट् शब्दस्य तु प्रचयपक्षे षकारस्य प्रचय एव ।

।। विभाषा छन्दसि ।। १ – २ – ३६ ।।

वेदे सर्वत्र वा प्रचयः स्यात् । पक्षे त्रैस्वर्यम् । तेन बह्वचादीनां ब्राह्मणाद्यध्ययने एकस्वरत्वम ।

विभाषा छन्दसीत्येष विकल्पो लौकिकेष्वपि ।
इष्टस्ततो लौकिकानां स्वराभावेऽपि साधुता ।।

।। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ।। १ - २ - ३७ ।।

सुब्रह्मण्याह्वानमन्त्रे यज्ञेऽप्यध्ययने च प्रचयो न । विधि (: ?)—प्राप्तस्य स्वारस्य तूच्चः स्यात् । सुब्रह्मण्योमिन्द्रागच्छ । सुब्रह्मण्योमित्योकारस्तित्स्वरेण स्वारः, तस्योच्चत्वमुच्यते । इन्द्रस्यामन्त्रिताद्युच्चत्वे परस्य स्वारस्योच्चता । आगच्छेत्याङ एकादेशाकारस्योच्चता । छकारस्य तु नवसूत्युत्कर्षेणास्यासिद्धत्वात् **'उदात्तादनुदात्तस्य—'** (८ – ४ – ६६)

इति स्वारा भावादनुच्चतैव। एवं हरिवन्तृभ्यो स्वरितोच्चता। सुत्यामागच्छ मखवन्नित्यन्तेष्विह दृश्यतामिति ॥

'**असावमुष्येत्यन्तः** (स. ८ - ३ - २६२) सुब्रह्मण्यामन्त्रे प्रथमान्तस्य षष्ठ्यन्तस्य चान्त उच्चः स्यात्। नारायणो (ज?य) जते। विष्णो पुत्र याजयते। '**स्यान्तस्योपोत्तमश्च**' (स. ८ - ३ - २६२) स्यशब्दान्तस्योपान्त्यमन्तश्च युगपदुच्चं स्यात्। गार्ग्यस्य पिता यजते। '**वा नाम्नः** (स. ८ - ३ - २६३)। नारायणस्य पिता यजते। २। एतत्सूत्रत्रयं हरभोजाभ्यामुक्तम् इति।

॥ देवब्रह्मणोरनुदात्तः ॥ १ - २ - ३८ ॥

मन्त्रे देवब्रह्मणोः स्वरस्यानुच्चः स्यात्। देवा ब्रह्माणः। द्वयोरामन्त्रितयोराद्यु*

★

* एतावता खपाठः (Ms. 586) अवसितः ॥

।। वार्तिकसूची ।।

★

PRAKRIYĀSARVASVA

Melputtūr Nārāyaṇabhaṭṭatiri

'Prakriyāsarvasva' of Melputtūr Nārāyanabhaṭṭatiri is coeval with the 'Siddhāntakaumudi' of Bhaṭṭojidīkṣita. The grammatical process involved in the derivation of almost all words in Sanskrit are given in it. The speciality with Bhaṭṭatiri is that he is having a broader outlook on grammar. He justifies the use of a number of words which remain incorrect as per the rules of Pāṇini. For him usage is of prime importance and grammar has to follow suit. The work has not received as much attention as it deserves due to its non-availability in print. With this seventh volume subtitled 'Chāndasakhaṇḍa the work comes to a close.

Price Rupees: 35/-

Oriental Research Institute and
Manuscripts Library
University of Kerala
Kariavattom, Thiruvananthapuram